एवं तावदस्य कार्यस्य तया तया शास्त्रीयया च सांस्थिक्या चाऽऽर्थिक्या च दृष्ट्या स्वरूपपरिचापने समासतः कृते सत्येतत्-पथप्रवृत्तपूर्वाऽभ्यर्हिताऽभिवादनस्य च यावत्प्राप्ततत्तत्साहाय्यकयथासिद्धात्मोपकार्यतानिवेदनस्य च संप्रति खल्वयं प्रीतिकरः शुभोऽवसरः समुपतिष्ठते । प्रथमं तदहं तांस्तान् प्राथमिकान् वेदमन्त्रद्रष्टॄन् ऋषींश्च तदनु तांस्तान् पदकारांश्च निघण्टुकारांश्च तत्तद्वेदाङ्गोपज्ञानप्रकाशनसुगमितनिगमार्थसुकीर्तीन् **यास्क-पाणिनि-पिङ्गल-प्रभृतीनाचार्यवरांश्च** भूयो भूयो नमामि । अथाभिवादयेऽहं तांस्तानपि सर्वान् प्राग्मध्यागर्वाक्कालिकान् ब्राह्मशेमुषीज्योतिःशिखोत्सेचनैकव्रतान् वैदिकभाष्यकारांश्च तांस्तानपि च सर्वानर्वाचः स्वीयाऽजस्रमहापरिश्रमसंप्रवर्त्तितस्वोपज्ञसंप्रदायविशेषान् सतः वैदिकान् शोधकांश्चाऽनुवादकांश्चाऽऽलोचकांश्च भाषामीमांसकांश्च छन्दोविवेचकांश्च कोषकारकांश्च । नामोद्देशविशेषतश्चेह द्वे ब्लूमफील्डस्य वैदिकपुनःपाठविवरणी च तत्सहकारितस्यैज्जर्टनस्य वैदिकपाठभेदविवरणी च कृती साकल्येनैवैतद्ग्रन्थान्तःपातिते सत्या उपकारकभावेन संकीर्त्ये भवतः । यच्चाद्यतनीयैरभियुक्तैः सामान्येन च **विद्वत्परामर्शसमितीयसदस्यै**र्विशेषेण चाऽस्मिन् कार्ये प्रीतिमद्भिर्भूयते, तदहं बहु मन्यमानस्तदर्थं हृदा सर्वेषामपि तेषां सभाजनं करोमि । नित्यशब्दब्रह्मनिष्ठाऽऽदर्शोद्दिष्टमुनिजनोचितप्रभूततपस्काऽऽत्मभावस्य च समये समये प्रत्युद्भावुकसमालोचनेन चोपयोगवद्वस्तुप्रदर्शनेन च ममोपकारातिशयं चोत्साहोद्रेकं चातन्वतश्चात्मनः सुहृदः **श्रीसिद्धेश्वरवर्म**परमविदुषस्तु सुनाम सादरविशेषमुत्कीर्तयामि । अथाऽपि ये नाम विद्वांसः पुरा चाऽद्य च संस्थानीयकर्मिष्ठतयाऽस्मिन् सर्वशक्तिव्ययकरे कर्मणि भक्तिक्षमतोभयनिर्भरितसद्योगतो मम सयुग्वानोऽभूवन्, सर्वानपि तानहमद्य धन्यान् संभावयामि । यच्च एम्. ए., एम्. ओ. एल्. इत्युपाधिधरः श्री**भीमदेवशास्त्री**, विद्यावाचस्पतिः श्री**रामानन्दशास्त्री** च सर्वथाप्यभिन्नभावेन च योग्यतया च यथास्वं नियोगभारमुद्वहन्तौ मदीये संपादनकार्ये सौकर्यविशेषं सुतरामकार्ष्टाम्,

तदेतद् विशेषमानार्हतयेहोल्लिखामि । यदपि विद्यावाचस्पतिः **श्रीरघुनाथचन्द्रशास्त्री** नियोगसामान्यस्य सम्यगनुष्ठानतो व्याकरणाचार्यः **श्रीअमरनाथशास्त्री** च मुद्राप्यमुद्रणपत्रिकयोर्व्युत्पत्तिसमाधानसहकृतावलेकतो मम साहाय्यं समपीपदतां, तदपीदं विज्ञापयामि । मुद्रणगृहीयकर्मिष्ठवर्गस्य सामान्यतोऽधिष्ठातुः श्री**धनपतिराज**श्रेष्ठिनश्च मुद्रकस्य श्री**रेवतराम**स्य च स्थापयितुः **सिराजदीन**स्य च विशेषतः प्रस्तुतखण्डीयस्य सुमुद्रणस्य कृते साधुत्वं वदामि ।

अथेदम्बृहत्कार्यसिद्ध्येकनिमित्तभूतं सामग्र्यन्तरसंपत्त्येकाधारमिव च सन्तमर्थसंग्रहमधिकृत्याऽऽदौ तावद् भूतपूर्वौ **बडौदानरेशो** महामान्यो **महाराजो** गायकवाडः सरपूर्व-तृतीय-**सयाजिराव**समाख्यश्च पूर्व**मिन्दौरा**ऽधिपतिर्महामान्यो महाराजो होल्करः श्री**तुकोजिराव**-समाख्यश्च महत्या कृतज्ञतया संस्मर्त्तव्यौ भवतः, यौ लाभपुरीयसांस्थिकप्रारम्भात् पुरा **स्वामिविश्वेश्वरानन्दस्य** प्रोत्साहकभूतावेतत्कार्यसंपादनार्थं प्रत्येकमुपविंशसहस्ररूप्यकमितं परमोदारं साहाय्यविशेषमकुरुताम् । एवमेव भूतपूर्वः **पटियालानरेशो** महामान्यो महाराजाधिराजमहेन्द्रः सरपूर्व**भूपेन्द्रसिंह**समाख्यश्च **क्योंथलनरेशो** महामान्यो राजा **विजयसेनश्च** कार्तज्ञेनोत्कीर्त्यौ भवतः, यौ शिमला-पत्तन एतत्कार्यीयप्रवृत्त्युदयस्थानभूतायाः **शान्तकुट्या** निर्मापणार्थं तस्मा एव **स्वामिवराय** महार्घं भूमिखण्डं सहैव प्रादत्ताम् । इद च भूयो विशेषेणोत्साहं जनयति यद्वर्तमानौ **बडौदानरेशश्च पटियालानरेशश्च** स्वपूज्यपितृपादपद्धतिं योग्यतया सुतरामनुसरन्तौ पुष्कलार्थप्रदानतः संस्थानेनाऽनेन सद्युक्तावेव भवतः । अथ सांप्रतिकेषु वर्षेषु तावद् अस्य कार्यस्य पूर्त्यर्थं भारतीय-पञ्जापीय-संयुक्तप्रान्तीय-हैद्राबादीय-महीशूरीय ट्रावन्कोरीय-जम्बुकाश्मीरीय-योधपुरीय-कोल्हापुरीय-सांगलीय-नाभीय-क्योंथलीय-शाहपुरीय-राजकोषेभ्यश्च अवागढसंस्थानाच्च पञ्जापीय-कालिकातीय-विश्वविद्यालयाभ्यां च विश्वेश्वरानन्दनिधानतश्च मूलचन्द्रखैरातीरामनिधानतश्चास्थिरं सदपि महार्घं च महोपकारकं चार्थिकं साहाय्यकं संप्राप्तं भवति । मुंबई-विहार-मद्रास-प्रान्तीयराज्यैश्च संस्थानीयानां कियतांचिद् ग्रन्थानां क्रयणं व्यवस्थापितं भवति । सार्वदेशिक-पाञ्जापिकाभ्यामार्यप्रतिनिधिसभाभ्यां च प्रस्तावविशेषतोऽत्रत्यं कार्यं प्रमाणितं भवति । अपि च बहुभिर्बहुदायिभिः श्राद्धैः सज्जनैः संस्थानीयायाः सभायाः **संरक्षकत्वं** वा **सदस्यत्वं** वा स्वीकृतं भवति । एषां खलूक्तपूर्वाणां नानाविधानां सहायकप्रवेकाणां मध्य एकैकमपि प्रति तथाविधं मम हृदयमाभारनिर्भरं भवति, यत् तदीयं किमपि वाचनिकं प्रकाशनं कथमपि कर्त्तुं नितान्तमशक्नुवानः सन्नेतदेवाऽहं भावयेयं यथा कथंचिदप्यहमेतत्-कार्यीयपरिशीलनेन तुच्छतुच्छेनापि सता वैदिक्याः शेमुष्याश्च विशेषतो भाषाशास्त्रीयायाः प्रवृत्तेश्च सामान्यतः कमपि प्रकर्षलवं प्रयोजयेयमिति ।

७. उपसंहारः

यथा चेदं विभावयामि ग्रन्थमिमं संप्रति सांप्रतिकानां वैदिकविद्याविशारदानां करगतीकुर्यामिति, तथा चैव मदन्तर्महद् भयमिवोत्थितं भवति । जानाम्येव ह्यतिदुर्मर्षा एतदीया दोषा इति । एवं स्थिते वितर्कयेऽहं यदस्मिन्नतिगहने च विशाले चाऽजस्रं प्रगामुके च कार्ये सामान्यतोऽप्यनिवार्याऽनेकजनीयहस्तानुसंक्रमवशाच्च विशेषतोऽपि निर्देशवैतथी च व्यवस्थापनवैषमी च दुष्परिहरे इव स्यातामिति । अपि चेदमनुभवाम्यहं प्राबन्धिके चाऽऽर्थिके च भारेऽन्यत्र संक्रान्ते सत्यहं चेद् ग्रन्थसंपादनमात्रनियोगोऽभविष्यं तर्ह्यत्राऽवरतो दोषाणां मात्रा नूनमूनतामैष्यंदिति । उभाभ्यामपि त्वेताभ्यां वितर्कानुभवाभ्यां मिथ्यात्मतोषकंकराभ्यां सद्भ्यां प्रेक्षकाणां समाधानलेशस्याऽप्यसंभावनादेतदेव तावत् तान् प्रार्थये यद् येऽपि दोषास्तेषां दृष्टिपथमवतरेयुस्तेऽपि तैर्यथावत् समाधाय विज्ञाप्येरन्निति एतच्चात्राऽऽश्वासनमपि भूयः कैमुतिकीक्रियेत यथाऽस्मिन् विषये क्रियमाणोऽल्पाल्पोऽपि सहयोगो मयका प्रह्वोत्तमाङ्गतयोरीकरिष्यते चाऽऽगामुके कार्यशेषे सुतरामिवोपयोक्ष्यते चेति विदुषां वशंवदः कश्चिद्—

लाभपुरे वि. वै. शो. संस्थाने
श्रावणे, वि. १९९९ तमेऽब्दे

विश्वबन्धुशास्त्री

भूमिका

१. सजातीयसाहित्य-भित्तिका

(क) वैदिका निघण्टवः

येन क्रमेण गतेषु तेषु प्राचीनेषु दिनेषु वैदिकी सरस्वती भगवती विस्तरभरमुत्तरोत्तरं संबभार, तमेव नितरामुपचितप्रामाण्यनिर्भरेण वचःप्रवेकेण स्वकेन **यास्कः** किलोल्लिलेख । तथाहि '**साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च** (१, २०)' इति । एवं तेषु लक्षिताऽलक्ष्याऽऽर्षदृग्व्यापारेषु प्राप्तश्रुतिशेमुषीजुट्परिचितसंचितप्रचारेषु षाट्संख्यसमन्वयेन सिद्धलोकप्रसिद्धिषु वेदाङ्गेषु तावच् **शिक्षायाश्च** स्थान-प्रयत्न-स्वर-मात्राऽऽद्यानुगुण्यतस् तत्तद्वर्णसदुच्चारणस्य, **कल्पस्य** च श्रौत-गृह्य-धर्म-भेदतस्तत्तद्विधिसंगतविविधसत्कर्मणः, **छन्दसश्च** प्रतिप्रस्तारविशेषं यति-पादाऽर्धविभागतस्तत्तद्गायत्र्यादिमितिमानस्य, **ज्योतिषस्य** च दिव्य-ज्योतिःसंचारतस्तत्तन्नक्षत्रयोगसमयप्रतीतेः, **व्याकरणस्य** च प्रकृति-प्रत्ययाऽऽगमाऽऽदेश-लोप-परिभाषातस्तत्तद्वाक्यस्थशब्दप्रातिस्विकवृत्तिस्थस्वरूपपरिचापुकसूत्रस्य, **निरुक्तस्य** च वर्ण-लोपाऽऽगम-विपर्यय-विकार-सहकृताऽर्थवैशिष्ट्याऽऽत्मकपाञ्चविध्यप्रमाणतः परोक्षाऽतिपरोक्षवृत्तिद्वयप्रत्यक्षतासंप्रयोगतश्च तत्तच्छब्दीयप्रकृतिसिद्धसदर्थभानस्य प्रवर्तनेन यथायथं चारितार्थ्ययोगः संपेदे । यथा यथा च कालेन वाचिकमूलविप्रकर्षप्रकर्षतो वैदिकानां शब्दानां परोक्षाऽतिपरोक्षता वृद्धिमुपजगाम, तथा तथा खलु **निरुक्त-वेदाङ्गोपयोगाऽपेक्षाऽप्यधिकाधिकमनुबभूवे** । तत्र सौकर्यार्थमेव च तैस्तैराचार्यैस्तत्तच्छाखीया बहवो **निघण्टुसमाम्नायाः** समामम्निरे (या ७, १३) । तेषामेवाऽयमन्यतमो भवति, य एको यास्ककृतसंस्कारतः (तु. या. गपू.) मुद्रितकायः संस्तदीयेन तदाप्रभृतिस्वायत्तीकृतनिरुक्तसंज्ञाधिकारेण भाष्येण संगुप्तिमिवोपगतोऽधुनापि शाखात्रयेण (शौप १, ३०५) हस्तगतो भवति । एतन्निदर्शनत इदं विदितं भवति, यथा **निघण्टुग्रन्था नैघण्टुक-नैगम-दैवत-**प्रभेदतः काण्डत्रय्या क्रियन्ते स्म । तत्राऽपि **नैघण्टुके** काण्डे यथार्थविभागत एकार्थाऽनेकाऽभिधानानाम्, **दैवते** काण्डे च यथालोकत्रयविभागतः प्राधान्यस्तोतव्यदेवतानाम्नां सरलः संग्रह इति च, **नैगमे** काण्डे त्वनेकाऽर्थैकाऽभिधानानां चाऽनवगतार्थानां च व्यतिकरितः संग्रह इति चाऽपरः सुवेचो विशेष आधीयते स्म । यतश्चैते समाम्नाया अप्रत्यक्षसंस्कारदुरूहाणां च संग्राह्यकिंचिद्वैशिष्ट्याऽन्तरवतां च सतां कतिपयानामेव शब्दानां संस्मारुकमात्रत्वेन प्रवृत्तिमुपागमन्, तत एव प्रकृतकोषीयप्रकारकः पारायणिकः पदसंग्रह एषामविषय इति कैमुतिकायते । तदेतदत्र निदर्शनं स्याद् यत् सांप्रतिकोपलब्धिविषये निघण्टुग्रन्थे प्रकृतकोषीयेषु प्रथमेषु ५०० शब्देषु केवलं २४ शब्दाः समाम्नायिषतेति ।

(ख) प्राक्-प्रतिष्ठाः कोषाः

अथोत्तरस्मिन्ननेहसि बहवः परिसाधितपुरातननैघण्टवविधानकनैपुणीका निघण्टुकारमतल्लिका **अमरसिंह**-प्रमुखा यांस्तांस्तान् पद्यात्मकान् कोषोत्तमानकुर्वन्, तेषां किलैष प्रविभागो भवति यथैक एकार्थाऽनेकाऽभिधानस्वरूपा एके चाऽनेकार्थैकाऽभिधानस्वरूपा इति । किन्तूभयविधानामप्येषां प्राधान्येनाऽर्वाक्काव्यीयसंस्कृतैकदृष्टीनां सतां

निगमाऽवबोधे न कश्चिदुपयोग इव संभवेत् । तथाहि । संकेत्यमानैतत्कोषग्रन्थराशिप्राथम्यभाज्यमरकोषे प्रकृतकोषीयेषु प्रथमेषु ५०० शब्देषु केवलं २५ शब्दाः समावेशमलप्सत । न त्वेष्वत्यल्पसंख्याकेष्वपि सत्सु शब्देष्वेकोऽपि वेदमात्रविषय इति खलु सुस्मरं स्यात् । यद्यप्येषां कोषाणां सुदुश्छदं नैगमं नैयून्यं संपूरयितुकाम इव भास्कररायो मध्येवैक्रमोनविंशाऽब्दशतकं वैदिककोषाऽऽख्यं निबन्धमकरोत्, तदप्यकिञ्चित्करमिव स्यात् । ग्रन्थो ह्यसौ स्वरूपत उक्तपूर्ववैदिकनिघण्टुपद्यीकरणमात्रत्वादनतिरिच्यमानः सन्नैव कामपि वस्तुनिकाये नवर्द्धिमादधीत ।

(ग) अर्वाञ्चः कोषाः

यावत् प्राचीनां पद्धतिमनु शिक्षणविधौ श्रवणस्य च कण्ठाग्रकरणस्य चाऽप्रतिहतं प्रभुत्वमभवत्, तावत् संस्कृतविद्याप्रचारौपयिकत्वेनोक्तपूर्वाश्छन्दोबद्धाः कोषा अपि महान्तमुपकारं खल्वकुर्वन् । परं यतःप्रभृति मुद्रणयन्त्रोपयोगः समारम्भि, तत एवाऽऽरभ्य नूत्नं विधानक्रमन्वकारादिक्रमेणोपनिबद्धानां कोषाणां साऽवसरत्वस्य प्रतीतिरप्युत्तरोत्तरं वृद्धिमगात् । सर्वप्रथमश्चाऽत्र विषये प्रयत्नः **कलिकाता-पत्तनीयानां** पण्डितानां स्मर्यते । तदाधारेण **विलसनेन** विदुषा विरचितः कोषः (१८७४) प्रकाशं प्रपेदे । तदुपरिविततानां कृतिततीनां च मध्ये **रोथ-बोह्टलिङ्काभ्यां** विरचितः **सेंटपीटर्ज़्बर्ग**-पत्तनीयः कोषः (१९०९-३२) मुकुटमणीयते । यत् प्रकृत**कोषीयेषु** प्रथमेषु ५०० शब्देष्विह ४५० अपाठिषत, तदस्य वेदाध्ययनौपयिकंभावस्य निदर्शनं स्यात् । **ग्रासमन्नस्य** बाह्वृचः कोषोऽपि तस्य विधानकपाटवस्य च कृतिपारग्यस्य च प्रमापको भवति । **मोनियरविलिअम्जस्य** कोशश्च प्राधान्येन कोषान्तरीयविषयस्य संग्राहुकत्वेन च क्वचित् क्वचित् स्वोपज्ञवस्तुनः समर्पुकत्वेन च विशेषतः सुग्रहैकपुस्तकस्वरूपत्वेन चोपकारको भवति । **तारानाथीयो वाचस्पत्याऽऽख्य-कोषः** (१९३०-४१) आकारत एतद्वर्गीयभारतीयकृतीनां मध्ये प्राधान्यं भजते । वेदाध्ययनौपयिकत्वेन त्वस्य न कश्चिदप्युपयोगसंकेतः सुकरः । तथाहि । प्रकृत**कोषीयैः** प्रथमैः ५०० शब्दैः साऽत्रधिकेष्वेतदीयेषु प्रथमेषु ८०० शब्देषु केवलं ४० शब्दा एव वेदगोचरत्वेनोदाह्रियन्ते ।

(घ) वैदिक्योऽनुक्रमण्यः

पुरातने कालेऽध्ययनार्थप्रयोजिताश्च कर्माऽर्थप्रयोजिताश्च सत्यस् तत्तच्छाखीयपाठानुक्रमेण मन्त्रप्रतीकानां चर्षिनाम्नां च देवतानां च छन्दसां च कण्ठाग्रकरणे साचिव्यं दधाना गद्यपद्याऽन्यतराऽऽत्मिका **अनुक्रमण्यो** ग्रन्थनं संप्रापुः । आदौ तावत् प्रतिशाखं मन्त्रप्रतीकादीनि चत्वारि वस्तुजातानि पृथक्त्वेन, कालेन च क्वचित् क्वचित् सर्वाण्येतानि वस्तूनि समुह्य सार्वसाधारण्येनाऽनुचक्रमिर इत्येवमेतदीयो विकासक्रमः संभाव्येत । न त्वेतासामनुक्रमणीनां व्यूढानां वा समूढानां वापि सतीनां पदपाठीयतया विविक्ते सति नैगमपदाऽनुक्रमणे किमपि तात्पर्यमिति कृत्वा तदपेक्षयाऽपि प्रकृतकोषस्य विषयविवेकः स्पष्टो भवति ।

(ङ) एकग्रन्थीयाः पदानुक्रमाः

साकल्येन वैकांऽशेन वा वर्णमात्राऽनुक्रमेण समूढानि सन्ति तत्तद्ग्रन्थीयानि पदजातानि खलूक्तपूर्वाणामर्वाक्कोषाणां संपादन औपयिकतामभक्षतेति सहजं प्रतीयेत । एवं तावत् प्रवृत्तिकालतस् तत्तद्ग्रन्थीयपदानुक्रमसूचीनामुक्तपूर्वकोषानपेक्ष्य किञ्चिदिव पूर्वत्वमभूत् । तासां सूचीनां मध्ये कासांचिदेव पृथक् प्रकाशः समजनि । एतासां मध्ये याः प्रकृतकोषप्रस्तुतविभागीयाऽभिसंबन्धास्तासामिह संकेतः क्रियते । तद् यथा—

१. **मोक्षमूलरीया बाह्वृची पद-सूची** (१९२९-३१, १९४९-५१), यस्यां योगतोऽसमूढमेव सत् पदपाठमात्रं वर्णमात्रानुक्रमेण धृतं भवति । मन्त्राऽऽवृत्तीयानां च पदानामत्र समावेशो न भवति ।

२. इयमेव **सूची** स्वामिभ्यां **विश्वेश्वरानन्द-नित्यनान्दाभ्यामप्यभिनवं** प्रकाशमनीयत (१९६५) ।

३. **ग्रासमन्नीये बाह्वृचे कोषे** (१९३०) यथाऽऽवृत्तिपुनरुक्तभागीयपदवर्जं पदान्तरसर्वस्वस्य यथायोगं च यथास्थलं च समाविशो भवति, तथाऽनेन **पदसूच्यर्थो**ऽपि सुसाधो भवति । इहाऽऽख्याताऽनाख्यातयोर्विभागो यथा स्फुटो भवति, न तथाऽनाख्याताऽवान्तरभेदानां सतां कृत्तद्धितसमासानां पारस्परिको विवेकः । एतदीयमन्त्याक्षरीयं परिशिष्टं प्रत्ययीययोगान्वीक्षणस्य बहूपकरोति ।

४. **स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोर्यजुर्वेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणिकायां** (१९६५) माध्यन्दिन-यजुर्वेदीयानि पदानि योगतोऽसमूढान्येव सन्ति पदपाठमनु वर्णमात्रयाऽनुक्रान्तानि भवन्ति ।

५. महा. **परशुरामीया**ऽजादिपदखण्डमात्री **तैत्तिरीय-संहितायाः पदानुक्रमणी** (१९८७) वर्णमातृकं व्यवस्थापनं विहायाऽणुमात्रेणाप्यनुकृतेतिकृतिद्विरुक्तिपर्यन्तात् सतः पदपाठाद् न भिद्यते । स्थलसंकेतोऽप्येतदीयोऽन्यतः शब्दसंख्याविमिश्रणादन्यतश्च रोमकसंख्यासंमिश्रणात् प्रेक्षकाणामप्रीतिकरः ।

६. **सातवलेकरीये काठक(चरक)यजुर्वेदीये पदानुक्रमे** (१९६९) योगसमूहनमर्धजरतीयते । तथाहि । यथाधात्वाख्यातसमूहने च यथाप्रातिपदिकं नामिकसमूहने चेष्यमाणेऽपि सर्वेषामपि सकृच्छ्रुतीनां पदानां विषये धातुप्रातिपदिकाऽन्यतरप्रदर्शने च यथायोगं प्रातिपदिकाऽनुक्रमणे चाऽनादर एव प्रादर्शि ।

७. स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोः **सामवेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणिकायां** (१९६५) **कौथुम-सामवेदी**यानि पदानि स्वरतः प्रतिपदसमुचितपरिवर्तनेनाऽसनाथितानि यथासंहितापाठमेव धृतानि सन्ति बुधानां क्लेशैककराणि भवन्ति । तथाहि । '**अ॒ग्निः**' इति वस्तुतोऽभिन्नस्वरोऽपि सन्नन्यायमेव सप्तधोल्लिखितो भवति । एवम् '**अ॒भि**' इत्यस्य दशधा-कृत्या न कोऽप्यर्थः । अन्यच्च । उपसृष्टस्याऽऽख्यातस्य विषयेऽनियमो भवति । तद्धि क्वचिदेकपदतया क्वचिच्च द्विपदतयाऽकारणमेव भिद्यते । अतः शोधकार्यस्याऽनुपकुर्वाणेयमनुक्रमणिकाऽकिंचित्करी स्यात् ।

८. **ह्विनि** इत्यस्य **शौनकाऽथर्वपदानुक्रमः** (१९३८) ग्रन्थनविधानके **ग्रासमन्नीयां** बाह्वृचीं कृतिमनुविदधानस्तत्रत्येनैव संकेतेन गतार्थः सन् नितरामुपकुर्याच्छोधपराणाम् । एतदीया बाह्वृचसंमेलनविमेलनप्रक्रिया तु बाह्वृचस्थलसंकेताऽभावेऽपर्याप्ता स्यात् ।

९. **शङ्करपाण्डुरङ्गपण्डितीयः शौनकाऽथर्वपदानुक्रमः** (१९५५) योगतोऽसमूढः सन् पदपाठस्य यथावर्णमात्रं प्रणयनमात्रं भवति । यत्त्वनुपलभ्यमानपदपाठेषु स्थलेषु यथासंहितापाठं स्वरसंकेतोऽकारि तन्नितान्तमन्याय्यं च व्यामोहकं च स्यात् (तय. तु. अ॒श्वस्य, मं॒हिष्ठः इत्येतत्स्थानीयस्तत्संकेतभारः) ।

१०. **स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोर् अथर्ववेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणी** (१९६५) नान्तरीयपूर्वस्यैव मुद्रणाऽभ्यासमात्रम्[१] ।

---

[१] उक्तपूर्वैस्तैस्तैर्वैधानिकैर्दोषैश्चाऽपर्याप्तभावैश्च साकमेतेषु पदानुक्रमेष्वन्येऽपि सर्व एतद्वर्गीयग्रन्थनस्वरूपसहजा दोषाः सामान्येनैव सुलभा भवन्ति । त एवेह प्रविभज्य निदर्शनमात्रार्थं संकेत्यन्ते । आवसानिक्यः कोष्ठबद्धाः संख्या उक्तपूर्वाणां दशानां पदानुक्रमणीनां वर्णनक्रमाऽनुप्राप्ताः संख्या एव संवादुका भवन्ति—

१. **स्थलाऽसंकेतः**, तय. अ॒श्वाः ऋ ५, ६१, २ (३); अ॒श्वासः ऋ ५, ६२, ४, (१, २); **अ-सप॒त्नम्** शौ १९, २७, १४, अ॒-सतः शौ ५, ६, १ (८); अ॒सि ऋ १, ९४, ७; ५, ९, ४; ८, ९२, २८; ९३, ३३; ९५, ३; ९७, ५; ९८, ५; ६ (३); **असि॒तम्** शौ १०, ४, ५; १३, **असु-तृ॒पः** शौ १०, ५, ४९; **अस्ता॒म्** शौ १२, ४, ५२ (८); **अस्तु** ऋ १, १६२, ११; ८, १७, १० (३); **अस्मु॒त्** शौ ६,

(च) बहुग्रन्थीया अनुक्रमकोषाः

अथ यथा यथा नवजागरितसंस्कृताऽभिरुचौ पश्चापथे यथोपलभ्यग्रन्थराशिपारायणिकस्य वेदाऽध्ययनस्य वेदार्थोपदर्शनप्रयोजकत्वेन च प्रभारतीविकासैतिह्यक्रमप्रतिसंदर्भकत्वेन चोपयोगस्य प्रतिभानमभूत्, तथा तथा

२४, १; १८, ४, ६९; अस्मि शौ ६, ५८, ३, अस्मे शौ १८, ४, ४६, अहानि शौ १८, १, २७; २८ (८); आ ऋ ८, ८१, ६; ९, ८१, ४ (१, २); आह शौ १८, २, ३७, स्याम शौ ९, १५, २० ; १८, ३, १७; ४, ६९, (८)।

२. अप-मुद्रणम्, तय., अꣳशम् <अꣳशम्, अꣳशाय <अꣳशाय, अकृष्टपच्या° < °च्या° (५); अववपति < अप° (६); अभि-शाचः < °साचः (१०); उपलान् < °लान्, चकृम < चकृम मा १९, ५५, चय्यम् < चर्य्यम् (४); जजायथाः < अजायथाः (५); तवसा < तवसा (४); ततृपाणा <°पाणा (१, २); शवसानम्<°नम् (२); प्रविदम्<°द्म (४); सुप्रशस्तिम्<सु-प्रशस्तम् (९, १०), पचेत < पचते (२)।

३. मिथ्या-पदत्वम्, तय., अनुवासि < अनुवा । असि, अनुव्रताः < °ता, अनुवृद्धिम् < मनुः । ऋद्धिम् (६); अभिसंचरेण्यम् < अभि । संचरेण्यम् (३); अर्वाकः < अर्वा । अकः (६); अवसः < अवसे (४); अवान्तरा < अव । अन्तरा (६); अश्मन्वतीः < अश्मन्वती (४); अश्विना < अश्विनौ ऋ १, ११६, ५; १८२, ७; ७, ७२, ४; ७३, २, अश्विना (सं.) < अश्विना ऋ ४, ४५, ५ (३); अह्नीतमुख्यस्या < अह्नीतमुखी । अस्याः (६); आदित्याः < आदित्या ऋ २, ४१, ६ (१, २); आसन् । इषूत् < आसन्नि(न [न्]-इ)षून् काठ ४५, २१, का < एका काठ २२, ८^{३}, गायत्र्यविभक्ता < गायत्री । अविभक्ता (६); ततऽअपसे < तत्ऽअपसे (२); तरत् < प्रतरत मा ३५, १० (४); परिवृताः < परिवृता ऋ ३, १७, १ (१, २); बहिष्कनीनिके < बहिः । कनीनिके, मत्सपत्नाः < मत् । सपत्नाः (६); मा (<अस्मद्-) < मा शौ ८, १, ८ (८); वाजिनः < वाजि । नः ऋ ६, १३, ६, सूनृता < सूनृताः ऋ ८, १३, ८ (१, २)।

४. मिथ्याऽवग्रहः, तय. २नि-शित- < १निशित- अ-निशित- इत्यत्र (१, २); ?अनु-दु- < *आ-नुदु- अनानुदु- इत्यत्र, अनु-भूति- < *आऽनु-भूति- अनानुभूति- इत्यत्र (१, २, ३)।

५. मिथ्या-प्रातिपदिकत्वम्, तय., अहि-हन्->अहिघ्ने<१अहि-घ्न-(६); अ-निमिष्->अनिमिषम् <°मिष-, अनेन->अनेनः < अनेनस्- (३) ; ऋतु- > ऋत्वा < √ऋ, √अस् (भुवि) > आसन् < आसन्- (६)।

६. मिथ्या-स्थलत्वम्, तय., अप मा ५, ८६ < ५, ८^{६} (४); एति ऋ ४, ७, ४; ५ < ४, ६, ४; ५ (२); खर्ववासिनीम् शौ ११, ११, ७, १६ < ११, ११, १६ (१०) ; प्र शौ २०, ७६, ७^{२} < २०, ७७, ७^{२} (९, १०); प्रत्नेन शौ १०, ११५, २ < २०, ११५, २, मदन् शौ २, २८, ४ < २०, २८, ४ (१०); युक्तः ऋ १, १५९, ३ < १, १५८, ३ यूथे ऋ ९, ११०, ७ < ९, ११०, ९, रक्ष ऋ ७, १५, ३ < ७, १५, १३ (२); रोचनानाम् ऋ ७, ५, १० < ३, ५, १०, वितूर्य ऋ १०, ३, ३ < १०, ६८, ३, विश्वध ऋ ४, १९, ६ < ४, १६, १८ (१, २); विव्ये ऋ ९, २२, २ < ४, २२, २ (२); श्रयन्ताम् ६०२, ८ < ८४४ (=ऋ १०, १८), १२ (३).

अधिपञ्चाशेभ्योऽब्देभ्य एदमन्वभावि, यथैतदर्थं बहूनपि वैदिकान् ग्रन्थान् संमेल्य तदीयं साधारण्यं समर्पुकाश्च वस्तुवैविध्यं संग्राहुकाश्च तुलनाऽऽत्मकपरामर्शौपयिकंभावुका **अनुक्रमकोषाः** संकलनीया इति । अथ ये चैवमभिप्रायुका ग्रन्था अद्याऽवधि व्यरचिषत, ते संकेततः परिचाप्येरन् । तद् यथा—

१. **जैकबीयेऽनुक्रमकोषे** (१९४८) भगवद्गीतासहकृतानाम् उपनिषदां **वाक्यानां** प्रातिपदिकीभावित-यथावर्णमात्राऽनुक्रान्त-तदीयमुख्यपदाऽनुपातित्वेनाऽयौगिकश्चापूर्णस्थलीयश्च सन्नप्युपादेय एव संग्रहो भवति ।

२. **ब्लूमफील्डीयेऽनुक्रमकोषे** (१९६३) ऋग्वेदादीनां ११९ ग्रन्थानां यथावर्णमात्राऽनुक्रान्तानां **मन्त्रपादप्रतीकानां** संग्रहो भवति । एषां ग्रन्थानां मध्ये ५६ एव मौलिका ग्रन्थाः साकल्येन संगृहीता भवन्ति । अन्येषां तु यथाऽपेक्षमंशत एव संकलनं व्यधायि । यत्त्विहाऽन्यथा सर्वथा बहूपकारके सति संग्रह उपलभ्यमानस्वराङ्कना अपि पाठाः स्वरराहित्येनैव प्रादर्शिषत, तदस्य गुरुदोषतामावहेत ।

३. **कीथसहकृतमैकडानलीये वैदिकाऽनुक्रमकोषे** (१९६९) वैदिककालिकसांस्कृतिकविकासं वा प्राचीनेतिहासविज्ञानप्रभृतिविषयान्तरसामान्यं वाऽधिकृत्य संकेतनिर्भरांश्च सतो यथावर्णमात्रमनुक्रान्तांस्तांस्ताञ् छब्दाञ् शीर्षकीकृत्य विरचितानां स्वपरोभयोपज्ञमतवैविध्यसारं समर्पुकाणां च **निबन्धानां** संग्रहो भवति ।

४. **हंसराजीये वैदिककोषे** (१९८३) १५ ब्राह्मणग्रन्थानधिकृत्य प्राचीननिर्वचनप्रमुखकतिपयविषयप्रदर्शनपरकाणि यथावर्णमात्रमनुक्रान्तानि संकेतितविशिष्टस्थलीयपरामृश्यवाक्यावलिसनाथितानि सन्ति कतिपयान्येव **पदानि** संगृहीतानि भवन्ति ।

२. सामान्येन लक्ष्यं क्षेत्रं व्यवस्था च

(क) लक्ष्यम्

१. तत्तत्प्रकारान्तरतश्चरितार्थानामपि सतां नान्तरीयपूर्वाध्यायवृत्तोपवर्णनानामनुक्रमग्रन्थानां मध्ये न केनचिदपि यावदुपलब्धनिःशेषवैदिकवाङ्मयीयपदसर्वस्वाऽनुक्रमकोषीया चिरादनुभूयमानाऽपि सती शोधाऽभियुक्ताऽपेक्षा सुपूरा भवति । तस्याः सदपेक्षायाः पूर्तिरेव तावत् प्रकृतस्य ग्रन्थस्य मुख्यं लक्ष्यं भवति ।

२. अन्यच्च । एकान्तरीयोत्तराध्यायसमर्पितया प्रक्रिययेह प्रतिशब्दं विशेषेण योगचिन्ताप्रयोजकं सद् विविधं वस्तुजातं तथा संगृह्यते, यथैतदाधारेण पुरा प्रक्रियमाणे **वैदिकशब्दार्थकोषे** साक्षाच्छ्रुत्यर्थपर्यालोचनमप्रतिहतवेगं प्रवर्त्तेतेति ।

(ख) क्षेत्रम्

१. अत्र तावद् अद्य यावत् ४०७ आधार-ग्रन्था वृत्तसंग्रहाः समपत्सत । आऽन्त्यखण्डीयप्रकाशं चैषा संख्या ४२५ भावुकेति संभावनीयम् ।

२. अस्यां तावत् संख्यायां मुख्यात् सतो वैदिकात् साहित्याद् बाह्यानां सतां स्वरूपतो विषयतश्च तस्य संनिकर्षविशेषमादधानानां च तत्तदङ्गोपाङ्गसामस्त्याऽभिसंबद्धानां चाऽपरेषामपि बहूनां ग्रन्थानां समावेशो भवति ।

३. अथाऽऽधारग्रन्थाः स्वरूपविभागतः संकेत्यन्ते । तद् यथा—

(क) संहिताः, (ख) खिलसूक्तानि, (ग) ब्राह्मणानि, (घ) आरण्यकानि, (ङ) उपनिषदः, (च) श्रौतसूत्राणि, (छ) गृह्यसूत्राणि, (ज) मन्त्रपाठाः, (झ) धर्मसूत्राणि, (ञ) पितृमेधसूत्राणि, (ट) शुल्बसूत्राणि, (ठ) परिशिष्टानि, (ड) अनुक्रमण्यः, (ढ) शिक्षाः, (ण) प्रातिशाख्यानि, (त) पाणिनीये सूत्रपाठः, उणादिपाठः, धातुपाठः, गणपाठः, फिट्सूत्राणि, वार्तिकानि, इष्टयः,

गतपूर्वतत्तद्विभागीयलक्ष्यसर्वस्वं च, (थ) निघण्टवः (द) निरुक्तम्, (ध) छन्दः, (न) ज्यौतिषम्, (प) पूर्व-मीमांसा, (फ) उत्तर-मीमांसा, (ब) सांख्यम्, (भ) योगः, (म) भगवद्गीता च।

(ग) व्यवस्था

प्रकृते ग्रन्थ उपयुज्यमाना एते विभागा यथा समूह्यन्ते तथाऽधुना संकेतो भवति। तद् यथा—

१. संहिताः खिल-सूक्तानि च, २. ब्राह्मणान्यारण्यकानि च, ३. उपनिषद-उत्तर-मीमांसा सांख्यं योगो भगवद्गीता च, ४. अवशिष्टाः षोडश विभागाश्च।

२. यथैतेषां विभागानां सामान्येन संहिता-ब्राह्मणोपनिषत्-सूत्राऽऽत्मतया चतुर्व्यूढानां सतामन्योन्यविवेक-प्रयोजिततत्तद्व्यूहीयवैशेष्यनिर्भरः स्वाध्यायाऽभ्यास उत्तरोत्तरं संप्रवर्तेत, तथा प्रतिव्यूहं पार्थक्येन प्रवर्तमानाः प्रकृतग्रन्थीयाश्चत्वारो **विभागा** अक्लृप्सत। तद् यथा। **प्रथमो विभागः** साहितिकः, **द्वितीयो विभागो** ब्राह्मणाऽऽरण्यकीयः, **तृतीयो विभाग** औपनिषदः, **तुरीयो विभागः** सौत्रश्च। अपर आवसानिकः **पञ्चमो विभागोऽपि** क्लृप्तो भवति, यस्मिन् प्रथमेषु चतुर्ष्वपि विभागेषु संगृहीतानां सतां शब्दानामाद्याऽऽन्त्योभयवर्णाऽनुक्रमेण सकलपाठश्च संस्मरणीयपरामर्शीयैतत्क्षेत्रीयग्रन्थराशिपरिचयीयोपयोगवन्ति कानिचिद् विषयान्तराणि च समावेशायाऽभिप्रेयन्ते। एते पञ्च **विभागाश्च** यथाप्रकृतखण्डं प्रविभज्य प्रकाश्यन्ते।

३. आधार-ग्रन्थाः

(क) अथ प्रकृते **विभागे** येषां संहिता-ग्रन्थानां समावेशो भवति, त इम इह नामोद्देशमात्रतः कीर्त्यन्ते। तद् यथा—

१. **ऋग्वेद-संहिता (संक्षे. ऋ.)।**
२. **ऋग्वेद-खिलसूक्तानि (संक्षे. खि.)।**
३. **वाजसनेय (माध्यन्दिन)-शुक्ल-यजुर्वेद-संहिता (संक्षे. मा.)।**
४. **वाजसनेय (काण्व)-शुक्ल-यजुर्वेद-संहिता (संक्षे. का.)।**
५. **तैत्तिरीय-कृष्ण-यजुर्वेद-संहिता (संक्षे. तै.)।**
६. **मैत्रायणीय-कृष्ण-यजुर्वेद-संहिता (संक्षे. मै.)।**
७. **काठक (चरक)-कृष्ण-यजुर्वेद-संहिता (संक्षे. काठ)।**
८. **कपिष्ठल (कठ)-कृष्ण-यजुर्वेद-संहिता (संक्षे. क.)।**
९. **कौथुम-सामवेद-संहिता (संक्षे. कौ.)।**
१०. **जैमिनीय-सामवेद-संहिता (संक्षे. जै.)।**
११. **शौनकीयाऽथर्ववेद-संहिता (संक्षे. शौ.)।**
१२. **पैप्पलादाऽथर्ववेद-संहिता (संक्षे. पै.)।**

(ख) कस्याः कस्याः संहितायाः प्राक्प्रोक्ताः पदपाठा इदानीमुपलब्धिविषया भवन्ति, किंलक्षणश्च तदीयः प्रकृतग्रन्थीयाऽभिसंबन्ध इत्येतद्विस्तर उपरि उपादीयमानः द्रष्टव्यः (द्र. भू. ४, क, ७)।

(ग) आधारग्रन्थीयपरिशोधपरिज्ञानयोर्विषये तत्र तत्रोपयुक्तचरीणां चोपयोक्ष्यमाणानां च प्रागर्वाग्भाष्यटीकाटिप्पणनिबन्धादिप्रकारककृतीनां तन्नामतश्च तत्कर्तृनामतश्च संक्षेपेणूल्लेखो भवतीतीहापि तत्पुनर्वचनेऽभिरुचिर्न भवति ।

४. विधानक-सारसंग्रहः

१. सामान्य-प्रकरणम्

(क) सामग्र्याः संपूर्णत्वम्

एतद्ग्रन्थीये प्रकृते विभाग आधारभूतेषु श्रुतिग्रन्थेषु यावन्मात्रप्रयुक्तस्य सत एकैकस्य शब्दस्यैकैकस्य रूपस्य स्थल-नैःशेष्येण समावेशोऽकारीत्येतदीयं विशिष्टं लक्षणं भवति । एषाऽनतिशयितपूर्वकायविस्तरा सती शब्दसामग्रीहैव तावत् सर्वप्रथमं सर्वाङ्गीणया यौगिक्या प्रक्रियया व्यवस्थाप्य यथावद् निर्दिश्यते । अथ विश्वप्रागर्वाग्विबुधीयतत्तद्वैदिकविषयीयतत्तन्मतसामस्त्योल्लेखाऽऽलोचनोभयनिर्भरैश्च तस्य तस्य पाठस्य स्वरूपं च तस्य तस्य शब्दस्य व्युत्पत्तिं च तत्र तत्र विचारणीयतयोपतिष्ठमानास्तास्ताः सांहितिकीर्वा वैयाकरणीर्वा वाक्यान्वयीया वा सौवरीर्वा छान्दसीर्वाऽर्थमीमांसीया वा सांशयिकीः स्थितीश्चाधिकृत्य प्रवर्तमानैश्च प्रतिपृष्ठीयैष्टिप्पणैः समग्रोऽयं ग्रन्थो मूलार्थविशदीकृतिप्रयोजनिकया वृत्त्येव सनाथ्यते ।

(ख) आधिश्रुतिकौ संवाद-विसंवादौ

१. यदा बाह्वृचे श्रावितपूर्वः सन् पाठः पुनः श्राव्यते, तदा तस्य तत्तच्छब्दविशेषीयपुनःपाठाऽपाठविवेकतो यथायोगं प्रतिनियतस्वरूपः संकेतः क्रियते ।

२. यदा बाह्वृचः श्रुतिविशेषो ग्रन्थान्तरीयतया श्रुतिगोचरतामुपैति, तदा तस्य तत्तच्छब्दविशेषीयतद्गतपाठाऽपाठविवेकतो यथायोगं प्रतिनियतस्वरूपः संकेतः क्रियते ।

३. यदोक्तपूर्वस् तत्तच्छब्दविशेषीयः पाठभेदः स्वर-प्रत्ययान्यतरमात्रीयस्वरूपो भवति, तदा बाह्वृचमूलपाठो नित्यं टिप्पणे प्रदर्शितो भवति, तय. पृ. ४१४^{k} ।

४. यदोक्तपूर्वस्तत्तच्छब्दविशेषीयः पाठभेदस्तत्पर्यायाऽपर्यायान्यतरभूतशब्दान्तराऽऽत्मको भवति, तदापि बाह्वृचमूलः पाठो नित्यं टिप्पणे प्रदर्शितो भवति, तय. पृ. १८^{e} ।

५. यदा तूक्तपूर्वस्तत्तच्छ्रुतिविशेषीयः पाठभेदस्तच्छब्दविशेषीयप्रातिस्विकस्थानाऽऽपन्नशब्दान्तरतया व्यवस्थापयितुं दुःशको भवति, तदा बाह्वृचं मूलं स्थलाङ्कनमात्रेण विज्ञापितं भवति[1], तय. पृ. ४८^{k} ।

६. बाह्वृचभिन्न-ग्रन्थान्तरीया अन्योन्याऽपेक्षया वर्तमानाः पाठभेदा अप्येवं यथायथं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ४२^{l}, ७८^{h}, ९४^{f}, ४४५^{i} ।

७. तत्तद्ग्रन्थीयमूलकोषीया विशिष्टपाठभेदीयाः संकेता अपि यथासंभवं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ५७$^{k'm}$, ७५^{p}, ४२१^{g}, ४३८^{e} ।

८. प्रागर्वाग्भाष्योपलभ्या दुरूहपाठविमर्शीया विशिष्टसंकेता अप्येवं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ८२$^{f'g}$, ९२^{p}, ५०९^{d} ।

---

[1] उपरितनात् खण्डात् प्रभृति बाह्वृचाऽपेक्षयाऽपि तुलनात्मकाध्ययनस्य सौकर्यसंपादनार्थं ग्रन्थान्तरीयास्तत्पाठभेदा अपि समानमेव टिप्पणेषु प्रदर्शयिष्यमाणा द्रष्टव्याः ।

९. कृष्णयजुर्वेदीयब्राह्मणभागीया शब्दावलिश्च श्रुत्यन्तरविवेकतोऽध्ययनसौकर्यार्थं संकेतपार्थक्येन निर्दिष्टा भवति ।

(ग) पाठ-प्रतिष्ठापनम्

१. इहत्यादेकैकस्माद् निर्देशाच्च प्राक् तद्विषये वर्णतः स्वरतो योगतोऽन्वयतश्चाऽसकृच्च निःशेषं च स्थितिसमीक्षणं व्यधायि । येषां ग्रन्थानां प्राचीनाः पदपाठा उपालप्सत, तदीयानां निर्देशानां समये तेषामुपयोगोऽकारि । येषां तु ग्रन्थानां प्राचीनाः पदपाठा नोपालप्सत, तदीयनिर्देशसौकर्य्यार्थं तेषां प्राग्विधयैव नवीनाः पदपाठा अकृषत । एवं यावन्मात्रं प्रागर्वाग्भाष्यीय उपयोगः समभूत्, तावन्मात्रमसौ सम्यगकारि । दीर्घप्रततस्य नितरां परिश्रमसाध्यस्य चाऽस्य पर्यालोचनाऽऽत्मकस्य वैदिकग्रन्थाऽध्ययनकार्यस्य संपादनात्तावदयमनुभवः प्रापि यथा पाठपरिशुद्धिमुद्दिश्य सर्व एवैते ग्रन्थाः पुनःसंस्करणविशेषाऽपेक्षा भवन्तीति ।

२. अस्याश्चाऽऽधारग्रन्थीयाया अपेक्षाया विषये खलु स्थले स्थले तां तां विकटां स्थितिमुद्देशतश्च यथासंभवं समाधानतश्चोदाहरन्ति टिप्पणानां शतानि साक्षीणि स्युः । एषां टिप्पणानां तावदेते मुख्याः प्रकारविशेषा भवन्ति—

(अ) यत्रादर्शितसमाधानं दुरूहमात्रं संकेतितं भवति, तय. पृ. १०^{p} ।

(आ) यत्र समाधानप्रयत्नसहकृता दुरूहता संकेतिता भवति, तय, पृ २३६^{f}, ४४५^{a} ।

(इ) यत्र शुद्धतया प्रसिद्धपूर्वाणां पाठानां विषये सांशयिकत्वं प्रदर्शितं भवति, तय. पृ. ८^{i}, ७९^{i} ।

(ई) यत्र शुद्धतयोरीकृतपूर्वाणां पाठानां प्रत्याख्यानमिष्टं भवति ९^{a}, १७२^{h} ।

(उ) यत्र यथाऽभिप्रेतं शोधविशेषः समर्थितो भवति, तय. पृ. ९^{j}, १०९^{d}, २०१$^{b'g}$, २७४^{e}, ३६९^{a} ।

(ऊ) यत्र ग्रन्थविशेषीयमूनमिव सद् यथोपलम्भ-संस्करणं पूर्तिमिव नीतं भवति, तय. पृ. ९^{m} ।

(ॠ) यत्र प्राचीनाः कृतयोऽर्घत आलोचिता भवन्ति, तय, पृ. १३^{a}, ४४^{j}, २०९^{d}, २४४^{k} ।

(ऋ) यत्राऽर्वाक्तन्यः कृतयोऽर्घत आलोचिता भवन्ति, तय पृ. १३^{e}, २१^{j}, २६८^{m}, २७९^{c} ।

(घ) पाठानामर्थतोऽनुसंधानम्

यद्यपि श्रौतपदजातीयवैयाकरणव्यवस्थितिसहकृतनिर्देशमात्रोद्देशस्य सतोऽस्य ग्रन्थस्य श्रुतिपरंपरीयमर्थाऽनुसंधानं विषयो न भवति, तथाऽप्युक्तपूर्वपाठप्रतिष्ठापनशोधनप्रसङ्गाऽनुरोधतस्तत्र तत्र तदपि प्रसक्तं भवति, तय. पृ १३^{a}, १६^{n}, २१^{k}, ४७^{a}, ५२^{j}, ७०^{e}, ७३^{j}, ३०७^{h}, ३०९^{o}, ३३३^{b} ।

(ङ) श्रौतश्छन्दोविमर्शः

तत्तत्पाठपर्यालोचनप्रतिष्ठापनीयप्रयत्नप्रयोजितश्चेह तस्य तस्य मन्त्रस्य यथातत्तत्स्थितिविशेषविचारं छन्दोविमर्शोऽप्यानुषङ्गिकधर्मभाक् सन् समावेशं लभते । यच्चाऽस्मिन् विषये छन्दोऽनुलक्षणीकरणतत्त्वानुप्रापणोभयप्रयोजनकं विधानकं प्रवर्त्तितं चाऽनुसृतं च भवति (तय. पृ. ५४५^{i}, ५७२^{e}, ५९२^{i}) तस्याऽपराङ्गभावेन च पूर्णभावेन च क्रियमाणोऽभ्यासक्रमो भूयिष्ठानां पाठानां यथायथं प्रतिष्ठापकः स्यादिति प्रतीयते ।

(च) सांहितिकं दीर्घत्वम्

संहितापाठीयं दीर्घत्वं स्वरूपभेदतस्त्रेधाविशिष्टाया निर्देशिकायाः प्रयोजकं भवति । त इमे तावत् त्रयोऽपि विशेषा भवन्ति—

१. यत्र (यथा मै.) उदात्ताद्यच्के पदे परतः पदान्त्याऽऽकारात्मिका श्रुतिर् **अस्** , **ए** इत्येतयोर्मध्येऽन्यतरेण समूला भवति, तदाऽसौ यथास्वमूलविवेकतो व्यवस्थाप्य प्रत्यापन्नतन्मूलस्वरूपतया निर्दिष्टा भवति, टिप्पणगतश्च तद्विस्तरो भवति, तय. पृ. ६४०^{y} ।

२. कानिचित् तिङ्रूपाणि चाऽव्ययानि च ह्रस्वदीर्घोभयविधान्ततया श्रूयन्ते । तानीमानि प्राक्तनेषु पदपाठेषु नित्यं ह्रस्वान्ततयैव प्रदर्शितानि भवन्ति । इह तावत्तदीयस्याऽस्यौभयविध्यस्य सूचनार्थं समूढस्य सतस्तदीयस्य स्थलाङ्कनस्य मूर्धन्यः संस्तदुभयप्रकारसाधारणभूत एव तदीयो निर्देशो भवति (तु. भू. ४, ४, ग), तय. **अध > धा, अभि > भी, अभि ✓रक्ष् > अभि···रक्षथ > था, ✓अव् > अव > वा** ।

अथ यदा कश्चिदुपसर्गः पूर्वपदतां गतोऽनयैव द्विविधतया श्रूयते, तदाऽसावपि तदुभयप्रकारसाधारणभूतमेव निर्देशं भजते, तय. **१अनु,>नू-राध-** ।

३. **यङि** परतोऽभ्यासांशः प्रायेण दीर्घान्ततया श्रूयते, क्वचिदेव त्वपि ह्रस्वान्ततया वा ह्रस्वान्तमात्रतया वा । इहैतत् त्रैविध्यं यथायोगं संहितापाठमनु निर्दिष्टं भवति, तय. **वावृधध्यै, ततृषाण-** इति **तातृषाण-** इति च, **ततृदान-** (वैतु. पदपाठानां प्रायिकी ह्रस्वान्तता-मात्रीया क्वाचित्क्येव च दीर्घान्ततामात्रीया प्रवृत्तिः, तय. **ववसान-ववृषाण-, चाकनत्, चाकशीति**) ।

(छ) प्राक्तनाः पदपाठाः

१. ऋग्वेदस्य च माध्यन्दिनतैत्तिरीययोर्यजुर्वेदयोश्च कौथुमस्य सामवेदस्य च शौनकीयस्याऽथर्ववेदस्य च प्राक्तनाः पदपाठा मुद्रिताः सन्त उपलभ्यन्ते । मैत्रायणीयः पदपाठोऽप्यंशतस्तत्संस्करणीयेषु टिप्पणेषु समाविष्टो भवति[1] ।

२. अस्मिन् कोष एतेषां पुराणानां पदपाठानामुपयोगप्रकारमधिकृत्य तावदिमे केचिद् विशेषा भवन्ति—

(अ) यदाऽत्रत्यो निर्देशः पदपाठादविशिष्टो भवति, तदा पदपाठविषया परामर्शिका नैव क्रियते ।

(आ) यदाऽत्रत्यो निर्देशः पदपाठाद् विशिष्टो भवति, तदा पदपाठो नित्यं टिप्पणगोचरीक्रियते प्रायेण तत्त्वत आलोच्यते च, तय. पृ. १००^{a}, २८८^{b}, ३४९^{o}, ४१२^{c}, ६६०^{d} ।

(इ) यदाऽत्रत्यो निर्देशः सांशयिको भवति, तदा पदपाठष्टिप्पणे दीयते, तत्तत्पक्षोपवर्णनं चाऽपि तत्रैव क्रियते, तय. पृ. ७^{e}, १७४^{a}, १८२^{h} ।

(ई) नञ्समासेषु नञ उत्तरमवग्रहो न क्रियते इति पदपाठीया सामान्या प्रवृत्तिर्भवति । इह तावद् यथापेक्षं नञ उत्तरमप्यवग्रहः क्रियते । ततः खल्व् **अ-पतिघ्नी-** इत्येवंप्रकारकाणां समासोत्तरपदानां सतां नञ्-समासानां स्वरः सुस्पष्टतरः स्यात् (वैतु. **अपति-घ्नी-** इति पदपाठीयो निर्देशः, यत इह पृथग्भूतेन **पति-**शब्देन नञः समासोऽनभिप्रेतो भवति, **पति-घ्नी-** इत्येतेन समासेन चाऽभिप्रेतो भवतीति दुर्वचमिव स्यात्) ।

(उ) यत्राऽप्यन्यत्र संदिग्धस्वरूपेषु समासेषु पदपाठीयाऽवग्रहाऽप्रवृत्तिर्भवति, तत्र सर्वत्रेहाऽवग्रहः क्रियते च टिप्पणीयेनाऽऽलोचनेन सनाथ्यते च, तय. पृ ७५^{m} ।

---

[1] एतदीयः समग्रो मूलकोषोऽप्येकः पञ्जापविश्वविद्यालयपुस्तकालयीयतयाऽस्मत्पार्श्ववर्तितां भजते । यस्तु रावणकर्तृकत्वप्रसिद्धिबाह्वृचपदपाठीयसप्तमाष्टकमात्रीयोऽप्येको मूलकोष उक्तपूर्वे पुस्तकालये विद्यते, तस्य शाकलप्रसिद्धेः पदपाठान्नितरामभेदाद् रावण इत्यत्र प्रतिलेखक एव कश्चिद् स्यान्नतु स्वतन्त्रपदपाठकारः कश्चिदिति स्पष्टम् ।

(ऊ) यदाऽत्रत्यनिर्देशाऽवग्रहीया स्थितिः पदपाठाऽवग्रहीयायाः स्थितेर्भिन्ना भवति, तदाऽयं स्थितिभेदष्टिप्पणे सम्यगालोचितो भवति, तय. पृ. १०६^{e}, १८८^{k}, १९४$^{a'c}$ ।

(ऋ) श्रौता उपसर्गा उपसर्ज्यतिङपेक्षया व्यवहिताश्च भवन्त्यव्यवहिताश्च । ये तावद् व्यवहिता भवन्ति ते नित्यं सस्वरा भवन्ति, ये त्वव्यवहिता भवन्ति त उभयथा भवन्ति सस्वराश्च निःस्वराश्च । तद् ये निःस्वरा भवन्ति त एव पदपाठेषु पूर्वपदतया निर्दिश्यन्ते नेतरे । इह तु व्यवहिता अप्यव्यवहिता अप्यथ निःस्वरा अपि सस्वरा अपि येऽपि तिङ्-सापेक्षा भवन्ति, ते सर्वेऽपि पूर्वपदतया निर्दिष्टा भवन्तीत्येवमयं सहस्रशो निर्दिष्टिभेदकरः सुमहान् विशेषो द्रष्टव्यः ।

(ॠ) संहितापाठीयस्य दीर्घत्वस्य निर्देशस्य विषये च यथाऽस्य कोषस्य पदपाठेभ्यो विसंवादाऽतिरेको भवति तथोपवर्णितचरमेव भवति (तु. भू. ४, १, च) ।

(ज) वर्गिता-निर्देशिका

१. इह तावदाधारग्रन्थीयानि पदानि तिङन्तानि सुबन्तान्यव्ययानि चेति त्रेधा वर्गीकृत्य च यथासंभवं यौगिकीभाव्य च सामान्येन सतैकेन वर्णमात्राऽनुक्रमेण निर्दिष्टानि भवन्ति ।

२. यावत् प्रतिवर्गीया नैर्देशिका विशेषा उपरितनानां यथास्वप्रकरणानामेव विषयतां भजेरन्, सामान्यायाः सत्या निर्देशव्यवस्थाया विषये केचिद् विशेषास्तावदिहाऽप्युल्लिख्येरन्—

(अ) तिङन्तीये वर्ग उपसृष्टाऽनुपसृष्टोभयविधानां सतां मूलधातूनां नामधातूनां च यथोपलम्भं सर्वलकारीयाणि रूपाणि समाविष्टानि भवन्ति ।

(आ) शुद्धक्रियाख्याणि रूपाणि च णिच्प्रभृत्यर्थविशिष्टक्रियाख्याणि प्राक्रियिकाणि रूपाणि च पृथगुपवर्गकल्पनेनाऽन्योन्यतो विभज्यन्ते । एवं सार्वधातुकनिष्पन्नानि रूपाण्यार्धधातुकनिष्पन्नेभ्यो रूपेभ्यो निर्देशक्रमपार्थक्येन विविच्यन्ते ।

(इ) सुबन्तानि रूपाणि यथास्वधातु-साक्षात्परंपरिताऽन्यतराऽभिसंबद्धप्रातिपदिकशिरस्कतया निर्दिश्यन्ते । अस्पष्टयोगत्वाद् धातवीयवंशपरंपराबाह्यनिर्देशानां सतां प्रातिपदिकानां च योगपरीष्टिष्टिप्पणगता भवति ।

(ई) तद्धिता यथास्वप्रकृतिभूतेभ्यः कृद्भ्यः श्रेणि-भेदेन निर्दिश्यन्ते ।

(उ) कृतां च तद्धितानां च पूर्वपदतश्चोत्तरपदतश्च सकलं सामासिकं वृत्तं यथायथं निर्दिश्यते च तुलनात्मकाऽध्ययनविशेषप्रयोजनकेन प्रतिपरामर्शिकासुभिक्षेण सनाथ्यते च ।

(ऊ) कार्तं वा ताद्धितं वा सामासिकं वा स्त्रीवृत्तं यथायोगप्रतिविविक्तेन सता श्रेणिबन्धेन पृथङ् निर्दिश्यते ।

(ऋ) यथायोगं निर्दिष्टानां सतां सुब्योगिनां प्रातिपदिकानां वैयक्तिकसंज्ञात्वेन वा सामान्यसंज्ञात्वेन वा भावपदत्वेन वा सर्वनामत्वेन वा विशेषणपदत्वेन वा क्रियाविशेषणत्वेन वा कथंचिदन्यथात्वेन वा यथाश्रुति वृत्तिवैशिष्ट्यं यावदपेक्षं टिप्पणेषु निर्दिश्यते ।

(ॠ) विलक्षणानि सन्ति तिङ्-रूपाणि वा सुब्-रूपाणि वा द्विर्निर्दिश्यन्ते, यौगिकेनाऽनुक्रमेण च प्रतिपरामर्शिकासनाथितेन सता यथाप्रातिस्विकेनाऽनुक्रमेण च ।

(ऌ) यौगिकत्वेन चाऽयौगिकत्वेन चोभयथाऽपि निर्देशभाञ्जि सन्त्यव्ययानि सौपतैङाभ्यां वर्गान्तराभ्यां सुवेचानि भवन्ति ।

(ए) अव्ययीया पृथक्-कृतिस्त्वेषा यथाप्राक्प्रसिद्धिप्रेक्षणसौकर्यमात्रप्रयोजना भवति। व्याकृतिसीमान्तदृशा हि तत्तदव्ययं तत्तत्प्रातिपदिकीयतत्तद्विभक्तीयं रूपं क्रियाविशेषणत्वेन वोपसर्गत्वेन वा समुच्चयपदत्वेन वा तत्तद्वृत्तिवैशिष्ट्ययुतं सद् भूयो भूयोऽभिन्नतयैव श्रूयमाणत्वात् कालेनाऽसौपमित्यस्याः प्रतीतेर्विषयोऽभूत् । एवं च तावदास्थायेहाऽनेकानि प्राक्प्रसिद्धितोऽव्ययाख्यानि सन्त्यपि पदानि सुबन्ताऽन्तरसन्यायतया प्रातिपदिकशिरस्कीकृत्य निर्दिष्टानि भवन्ति । अन्यानि चापि बहून्येवमनिर्दिष्टान्यपि सन्ति टिप्पणेषु तथात्वेन व्याख्यातानि भवन्ति ।

(ऐ) कर्मप्रवचनीयानामन्यत उपसर्गगतीनां चाऽन्यतो विवेक इह सम्यक् प्रदर्शितो भवति ।

(ओ) प्राक्प्रसिद्धित उपसर्गेतिसामान्यसंज्ञावतामव्ययविशेषाणामिह यथाश्रुतिलक्षणतः क्रियाविशेषणाऽऽत्मकान्यव्ययानि, औपसर्गिकाण्यव्ययानि, उपसर्गात्मकान्यव्ययानि चेति त्रेधा विषयविभागः कृतो भवति, तय. पृपृ. ३८०^{q}, ३८५^{g} ।

(औ) प्रतिसमासं यथाश्रुत्यर्थालोचनमिह तत्पुरुषादिभेदनिर्देशः कृतो भवति यथायोगमवग्रहश्च । अनया विधया खलु तत्तत्समासवच्छ्रुतभागीया वृत्तिरिव विरचिता भवति ।

(अं) यद्यपि सवर्णानां सतां भिन्नवर्गीयाणां शब्दानां संकेतविशेषप्रयोजितो वर्गविवेक एव पर्याप्त इति कृत्वा सामान्येन तदीयः सांख्यो विवेकोऽन्यथासिद्धत्वादुपेक्षितो भवति, तथापि यत्र यत्र स्वरतो वाऽर्थतो वा वैशद्याऽर्थं सांख्यो विवेकोऽपेक्षितो भवति, तत्र तत्र सोऽपि कृतो भवति ।

(झ) स्वरः

यद्यप्युपरिष्टात् सौवरं प्रकरणं पृथग् विरचयिष्यमाणं भवति, तथाऽपि तद्विषयीयं यत् किंचित् सामान्यलक्षणं भवति, तत्तावदिदं सूच्यते—

१. एकैकः सौवरो निर्देशष्टिप्पण उपपादितो भवति ।

२. यथाश्रुतिशाखाभेदमुपलभ्यमानः स्वरभेदष्टिप्पणे सूचितश्च व्यवस्थापितश्च भवति, तय, पृ. ४४०^{k} ।

३. यथाऽपेक्षाविशेषं स्वर-शोधः कृतश्च यथायथं सूचितश्च भवति, तय. पृपृ. ९^{j}, ४५^{m}, १७१^{b}, २६२^{j} ।

४. अनङ्कितस्वरग्रन्थीयः स्वरः क्वचिदेवेहाऽङ्कितो भवति, तय. पृपृ. ७६^{c}, ७८^{c} ।

५. यद्यप्युदात्तश्च जात्यः स्वरितश्च यथाश्रुति सर्वत्राऽङ्कितौ भवतस्तथाप्युदात्त एव मौलिकः स्वर इत्यास्थाय जात्यस्य स्वरितस्य तन्मूलकतया प्रतिपादनेन तदीयः क्षैप्रस्वरितेनाऽभेदाऽन्वय इष्टो भवति, तय. पृपृ. ६२५^{a}, ६४३^{e} ।

६. यद्यप्येकपदाऽवच्छेदेन द्विस्वरत्वमपि यथाश्रुतीहाङ्कितं भवति, तथाऽप्यस्मिन् विषय एवमास्थितं भवति, यथा मौलिकस्थित्यनुदृष्ट्या सर्वत्राऽपि द्विस्वरवदेकपदताया विषय एकैकस्वरवतोर्द्वयोर्द्वयोः पदयोर्यथारूपयोश्च यथास्वरयोरेव च सतोः प्रारम्भिकसमासस्वरूपभूतं पारस्परिकसंनियोगमात्रं भवतीति च तस्मिंश्च संनियोगे सति नैरुक्तिकवर्णलोप-विकाराभ्यां च तयोः पदयोर्द्वयोः सतोरप्येकतेवाऽखण्डरूपा संपन्ना भवतीति च (तु. यथोत्तरखण्डम् एतवै, वाव, **बृहस्पति**- इह च पृपृ. २११^{g}, २१८^{b}, २१९^{r}, ३७८^{l}, ३८०^{h} ।

७. अत्रत्य उदात्तस्य चोदात्तभूमिस्वरितस्य च यथायोगमङ्कनप्रकारो नूतन इव प्रतीयमानोऽपि सन् पुराणाऽऽधारसुप्रतिष्ठो भवति । अस्य प्रकारस्य प्रकामं सारल्याच्च साक्षादिव प्रतीतिकरत्वाच्चेत ऊर्ध्वं करिष्यमाणेषु वैदिकग्रन्थीयेषु संस्करणेष्वपि तत्स्वराङ्कनसाम्यकरी सती महती खलूपादेयता स्यात् ।

(ञ) व्युत्पत्ति-योगः

१. यास्क-पाणिनिमूर्धन्यानां प्राचां निरुक्तव्याकरणप्रधान-शब्दमीमांसायाः प्रवर्त्तकानामाचार्याणां मतेन प्रत्येकमाख्यातं च नाम च योगजं भवति । तत्र तावदाद्यः प्रकृत्यात्मको भागो धातुरित्युच्यतेऽन्त्यश्च तिङ्सुबन्यतरविभक्त्याऽऽत्मकश्चाऽन्यतः कृत्तद्धिताऽन्यतरनामकरणाऽऽत्मकश्चाऽन्यतः प्रत्यय इति । केवलौ सन्तौ धातुश्च प्रत्ययश्च न प्रयुज्येते । तदीय-योगसिद्धानि सन्ति शब्दरूपाण्येव तु वाग्व्यवहारं लभन्ते । प्रत्येकं चेदृक्-स्वरूपं शब्दरूपं तत्तत्प्रत्ययीयेन काल-संख्या-कारकाऽऽदिभेदकोपाध्यात्मकेनाऽर्थेन युक्तं सन्तं क्रियामात्रस्वरूपं धात्वर्थमाह । तथाहि । **'अत्ता'**, **'अदनम्'**, **'अन्नम्'** इत्येतेषु त्रिष्वपि शब्दरूपेषु समानधात्वंशीयभक्षणाऽऽत्मकाऽर्थवाचकत्वसामान्ये सत्यपि यत्तदीयं यथाकर्म कर्तृपरत्वं च भावपरत्वं च कर्मपरत्वं च परिणतं भवति, तत्तद्गत-तृज्-ल्युट्-क्त-प्रत्ययीययथायोगोपाधिसंभवं भवति । एवं तावद् धातूनां तत्तत्प्रातिस्विकाऽर्थवत्त्वं भवति प्रत्ययानां तु प्रातिस्विकाऽर्थवत्त्वाऽभावे सति धातवीय-तत्तत्प्रातिस्विकार्थोपाधायकमात्रत्वमिति विवेकः स्पष्टो भवति ।

२. यद्यप्यस्याः प्रकृति-प्रत्ययविभागीयायाः प्रक्रियाया निरुक्त-व्याकरणोभयवेदाङ्गीयं प्रामाण्यं प्रसिद्धं भवति, तथापि व्याकरणस्यैवाऽनया प्राधान्येन स-विषयता संपद्यत आनुषङ्गिकमात्रत्वेनैव तु निरुक्तस्य । तस्य हि तावत् प्राधान्येन तत्तत्प्रकृतिकत्वेन तत्तच्छब्दार्थपरीक्षणनित्यत्वेन प्रवृत्तिर्भवति । एवमपि तदतिपरोक्षवृत्तीनां च परोक्षवृत्तीनां च सतां शब्दानां वर्णविकाराऽऽगम-लोप-विपर्ययाऽनुसंधानतः प्रत्यक्षवृत्तित्वस्य प्रत्यापादनेन तदीयप्रकृति-प्रत्ययविभागीयं सौकर्यविशेषमातन्वद् व्याकरणस्य कार्त्स्न्यमेव प्रयोजयति ।

३. अस्ति तावद् निरुक्त-व्याकरणीययोः प्रक्रिययोरन्योऽप्येको विशेषः । तथाहि । ये पदे पदे वर्णाऽऽगम-लोप-विकार-विपर्यया भवन्ति, ते वैयाकरण्यां प्रक्रियायां तत्तत्कार्यसूचकतत्तदनुबन्धवत्तत्तत्प्रत्ययसंनियोगेनाऽनुशिष्टा भवन्ति । त एव तु नैरुक्त्यां प्रक्रियायां तत्तत्प्रकृतिप्रत्ययप्रतिनियतसंनियोगनिरपेक्षं वाग्व्यवहारमात्रसिद्धेन सता तत्तद्विशेषधर्मकेण प्रातिस्वाभाव्येनोद्दिश्यन्ते ।

४. अथ शाब्दिकीं निष्पत्तिमधिकृत्य या प्रक्रियाऽस्मिन् कोषे चरितार्था भवति, तस्या अयं संक्षेपो भवति—

(अ) या नामोक्तपूर्वा पाणिनीयेति प्रसिद्धा सती प्रकृतिप्रत्यययोगनिर्भरा वैयाकरणी प्रक्रिया भवति, तन्मात्राऽनुसारीहत्यं निर्देशसर्वस्वं भवति ।

(आ) विस्पष्टव्युत्पत्तिकत्वाद् यौगिकवंशपरंपरीयत्वेन निर्दिष्टानां सतां शब्दानां विषये धातवीयांऽशस्य निगदसिद्धत्वात् प्रत्ययीयांश एव टिप्पणीयस्य विचारस्य प्राधान्येन विषयतां भजते ।

(इ) ये शब्दास्तावद् दुरूहव्युत्पत्तिकत्वाद् यौगिकवंशपरंपरातो बाह्यत्वेन निर्दिष्टा भवन्ति, तेषां व्युत्पत्तेर्विषये यत् किंचित् पुरातनं वा नूतनं वा कल्पनारूपं समभूत्, तत् सकलमपि यावच्छक्येन स्वीयेनोहापोहेन साकं टिप्पणेषु दीयते ।

(ई) बहुष्वपि शब्देषु लक्ष्यमाणानां वर्णविकारादीनां विषये व्याकरणाऽनुसारं च निरुक्ताऽनुसारं चोभयथाऽप्युत्पत्तिः प्रदर्शिता भवति । एवं खलु द्वयोरपि तयोः प्रक्रिययोराधारभूतयोर्यथास्व-संज्ञापरिभाषयोरितरेतरीयतयाऽनुवाद इव कृतो भवति ।

५. यद्यपि पाणिनीयायाः प्रक्रियायाः प्रातिस्विकगुणप्रकर्षाच्च सुप्रतिष्ठितचतुर्दिक्प्रामाण्याच्च तद्वित्तिक-विधानकत्वेनैवाऽयं कोषः प्रवर्त्तितो भवति; तथाऽपीहोपसप्तशतेषु टिप्पणेष्वार्य्यभाषीयां मौलिकीं स्थितिमुद्दिश्य स्वोपज्ञतयोपकल्पितायाः नितरां स्वतन्त्रायाश्च सत्या अपरस्या नवीनाया वैयुत्पत्तिकयाः प्रक्रियाया अप्युपयोगः कृतो भवति । तद्विषयीयास्तावदिमे कतिपये वादाः संग्रहेण सूच्यन्ते—

(अ) मूलभूताऽऽर्यभाषा सार्थक-सस्वरैकाच्क-ध्वनीनामाधारेण प्रथमां प्रवृत्तिं लेभे ।

(आ) त आधारभूता ध्वनयः स्वगताऽनेकखण्डा इव सन्त आदितो महाप्राणव्यञ्जनाऽऽत्मका अन्तश्चाऽनुनासिकंभावुक-विलोलस्वराऽऽत्मकाश्च बभूवुः ।

(इ) संख्यातस्तावत्ते ध्वनयः पञ्चाऽनतिरिक्ततया संभाव्यमानाः सन्तो *घ्ह्, *झ्ह्, *ध्ह्, *भ्ह्, *श्र्ह् इत्येवं निर्दिश्येरन्[1] ।

(ई) उच्चारणविषये प्रतिवक्तृभेदप्रातिस्वाभाव्यादेव त एत आधारभूता ध्वनयो व्यञ्जनखण्डतश्च स्वरखण्डतश्च प्रत्येकं बहुविधस्योच्चारणस्य विषयतां व्रजन्तः कालेन पश्चात्परिनिष्ठितप्रतिविविक्तस्वरूप-तत्तत्स्वरव्यञ्जनाऽऽत्मतया परिणता बभूवुः[2] ।

(उ) त एते बहुविधमुच्चार्यमाणाः सन्त आधारभूता ध्वनयः प्रत्ययप्रकारकध्वन्यन्तरसंयोगनिरपेक्षाऽव्ययप्रकारकतयैवाऽऽदिमं प्रयोगं लभिरे ।

(ऊ) आधारभूता ध्वनयो मूलतो नामतयैवोपकल्प्यमानाः सन्तस्तस्य तस्येतरेतरार्थसापेक्षतया संबद्धस्य सतोऽर्थस्य बोधनार्थमादिमवाक्यभूततत्तत्स्वीयपरंपरारूपतां चाऽन्यतस्तत्तद्वृत्तिविशिष्टयतश्च समासतश्च व्यक्तिसामान्य-भाव-त्रितयपरकसंज्ञाऽन्यतमतया च विशेषण-सर्वनामाऽन्यतरतया च कर्मप्रवचनीयतया च संसर्ग[3]ऽन्तर्ग[4]न्यतरतया चाऽऽख्याततया च क्रियाविशेषणतया

---

[1] दीर्घताऽतन्त्रा भवति । अस्या ऋ > अर्, इर्, उर् इत्यस्य त्रैविध्येनाविर्भवतः परिणामस्य पाणिनीयायां प्रक्रियायामेवमेव संभवात् तत्संवादनैकदृष्टिकत्वेनोपकल्पितमात्रत्वात् ।

[2] अस्योच्चारणीयस्य परिणामस्य प्रवृत्तिप्रकारसामान्यमुपरिष्टान्निदर्शयिष्यमाणं भवति (तु. आचि. ४)। इहापि तावदाधारध्वनीयाऽऽद्यव्यञ्जनांशनिवृत्त्याऽवशिष्टाच्च *ऋ इत्येवं निर्दिष्टव्याच्च सतो मौलिकात् स्वरात् स्वरान्तरीयो निवृत्तिपर्यवसानः परिणामक्रमोऽयं निदर्श्यते—

१. *ऋ >
- अर् > आ > अ > …
- इर् > ई > इ > …
- उर् > ऊ > उ > …

२. अयॕ् >
- आय् > आइ > ऐ > ए > ऍ > इ > …
- अय् > अइ > ए > ऍ > इ > …

३. अवॕ् >
- आव् > आउ > औ > ओ > ऑ > उ > …
- अव् > अउ > ओ > ऑ > उ > …

[**विशेषः**—ऍ, ऑ इत्येतयोः सांव्यत्वविलयाऽनुपाती द्विमात्रत्वस्यैकमात्रत्वेन परिणामो द्रष्टव्यः ।]

[3] संसृज्यते वाक्यीयो वा वाक्यप्रदेशीयो वाऽर्थोऽनेनेति कृत्वोपसर्ग-कर्मप्रवचनीयोभयभिन्नानां सतां समुच्चयापादकानां निपातानामेषा संज्ञा द्रष्टव्या (=conjunction) ।

[4] अन्तर्गच्छन्तीति कृत्वा वाक्यीयपदैरन्वयाऽभावेऽपि वाक्यीयाऽर्थसामान्यस्य तदन्तःप्रवेशेनेव प्रातिस्विकेनाऽऽश्चर्यादि-मानसभावपरेणाऽर्थेनोपाधायुकानां निपातानामेषा संज्ञा द्रष्टव्या (=interjection) ।

चोपसर्गतया चाऽऽर्थपरिणामवैविध्यं चाऽन्यतो भेजिरे[१]।

(ऋ) तस्य तस्य संबद्धस्य सतोऽर्थस्य वाचकभूताभ्यस्ताभ्यस्ताभ्य आधारध्वनीयपरंपराभ्यो भूयोनियतप्रयोगाभ्यः सतीभ्य आदौ यथावस्थिताऽवयवीयस्वरपार्थक्यं चाऽपरिनिष्ठितसमासधर्मं च सत्[२] कालेनैकस्वरतामापन्नं सकलं द्वन्द्वादिकं सामासिकं वृत्तं प्रादुर्बभूव। द्वन्द्व-तत्पुरुषावन्तोदात्तौ प्रादि-बहुव्रीही चाऽऽद्युदात्तौ बभूवतुरित्येतया मौलिकसामान्यविवेकदृष्ट्या येऽप्यन्तोदात्ताः समासा बहुव्रीहित्वेन च मध्योदात्ताः समासास्तत्पुरुषत्वेन च पाणिनीयेऽनुशिष्टा भवन्ति[३], तेऽवग्रहस्थितिपरिवर्तनेन यथायोगं तत्पुरुषत्वेन च बहुव्रीहित्वेन चोद्देश्याः स्युः।

(ॠ) अनेकाच्काः सन्तः कृतश्च तद्धिताश्च तत्परकप्रसिद्धिकप्रत्ययाऽऽख्यानामभावाद् मौलिकस्थित्यनुरोधेनाऽऽधारध्वनीयाः समासविशेषा एव भवन्ति।

(ऌ) स्त्रीप्रत्ययान्ततया प्रसिद्धानि शब्दरूपाण्यपि तत्परकप्रत्ययाऽभावसामान्याद् मूलतः समास-सवृत्तकान्येव भवन्ति (तु. पृ. ४६७^{h})।

(ऍ) सुप्तिङन्यतरप्रत्ययान्ततया प्रसिद्धानि चाऽपि शब्दरूपाणि तत्तत्प्रत्ययाऽभावसामान्यात् समास-सवृत्तकान्येव भवन्ति[४]।

(ए) बहवः पाणिनीया धातवोऽप्यनेकाऽवयवत्वात् समास-सधर्माणो भवन्ति (तु. पृ. ५६८^{o})।

(ऐ) ये चाऽनेकार्था इत्येवं प्रसिद्धिभाजः शब्दा भवन्ति, ते स्वीयतत्तदर्थपरस्परवैशिष्ट्यात्मकत्वाऽभावे सति मूलतस्तत्तदर्थवाचकत्वेन भिन्ना एव सन्तः कालेन वर्णविकाराऽऽदितः परिणतायाः सवर्णताया वशादेकत्वमिवाऽऽपन्ना भवन्ति (तु. पृ. ४९८^{e}, ५६८^{o}, ६२५^{g})।

(ऑ) ये चाऽप्यभिन्नार्था इत्येवं प्रसिद्धिभाजः शब्दा भवन्ति, तेषामपि बहवो मूलतोऽन्योन्यमभिन्ना एव सन्तः कालेन विवर्णतया परिणता भूत्वा परस्परं भेदतो व्यवहारमापन्ना भवन्ति (तु. पुनर्स्-, भूयस्-)।

---

[१] प्रथममसमस्तानां च कालेन समस्तानां च सतामाधारध्वनीनामयं तत्तद्वृत्तिवैशिष्ट्यक्रमस्तावदनया तालिकया भूय इव स्पष्टः स्यात्—



[२] यतु. वाव् इति *भर्-भर्- इत्येतदादिस्वरूपतयोपपाद्यमानम्।

[३] तु. पा ६, २, २ उउ; १६२ उउ।

[४] 'तवै' इत्यन्तानि द्विस्वराणि पदानि चान्यतोऽलुक्समासाश्चान्यतोऽत्र ज्ञापकतां यान्ति (तु. एतवै, बृहस्पति-)।

(ओ) उदात्त एव मौलिकः स्वरः सन् कालेन सामासिके वृत्त आविर्भूते सत्यनुदात्तं चान्यत उदात्ताऽनुदात्ताऽन्यतरभूमिं स्वरितं चान्यतः प्रयोजयामास ।

(औ) एवं तावत् समस्ताऽसमस्ताऽऽधारध्वनिमात्राऽऽधारेण प्रथमतो नामिके वाग्व्यवहारे परिनिष्ठिते सत्येव सकल आख्यातिको वाग्व्यवहारस्तन्मूलकतयाऽऽविर्बभूवेति च तत्तन्नाम्ना पश्चादेव तन्त्रमात्रतः प्रसिद्धिं गताः सत्यः सुप्तिङ्कृत्तद्धितवृत्तयश्चाऽपि स्वरूपतः प्रातिस्विकार्थहीनतत्तत्प्रत्ययाऽऽख्य-शब्दरूपाऽन्तत्वाऽभावे सत्याधारध्वनीयसमासाऽऽत्मकतां न व्यभिचेरुरिति चाऽत्र संग्रहो भवति ।

(ट) प्रक्रिया-संवादनम्

मौलिकाऽऽर्यभाषीयतत्त्वाऽनुसंधानतो वैयुत्पत्तिकस्य प्रकृतिप्रत्ययीयस्य विभागस्याऽनभ्युपेयत्वे (तु. पृपृ. ५२४^{e}, ५२८^{h}) सिध्यत्यपि कथमेतत्कोषोऽनिबन्धो यथापाणिनि प्राचीनयौगिकसंज्ञा-परिभाषानुसारित्वेनैव प्रवृत्तिमान् भवतीत्युपदर्शितपूर्वम् । यया रीत्या त्वेवं सति नूतना मौलिकस्थितीया नाम प्रक्रिया पाणिनीयया प्रक्रियया संवाद्यमाना सती टिप्पणविषयतां भजते, सा खल्विदानीमत्र संक्षेपेणोच्यते—

१. अर्, इर्, उर् इत्येतेषां मौलिकाऽचकानां त्रयाणामादेशानाम् ऋकार एव साधारणभूतः स्थानी स्यादिति कृत्वाऽऽधारध्वनयस्तदन्ततया निर्दिष्टा भवन्ति[१] ।

२. यदा कश्चिदाधारध्वनिराख्यातिकवृत्तिविशिष्टतया विवक्षितो भवति, तदाऽसौ पाणिनीयधातुसामान्येन धातवीयसंकेतपुरस्कारतो निर्दिष्टो भवति (तु. भू. ४, २, क, १), तय. पृ. ६५९^{a} ।

३. यदा कश्चिदाधारध्वनिर्नामिकवृत्तिविशिष्टतया विवक्षितो भवति, तदाऽसौ क्विबन्तीकृत्यैव निर्दिष्टः सन् सुब्योगीयप्रातिपदिकाऽन्तरसामान्येनाऽऽवसानिकेन विच्छेदकाऽऽख्येन संकेतेन सनाथ्यते (तु. भू. ४, ३, क, १), तय. पृ. ६६१^{b} ।

४. परःसहस्राः पाणिनीया धातवः साऽवयवा भवन्तीति सूचितचरं वादमनुसृत्य ते धातवो यथाऽपेक्षमवयवप्रदर्शनपूर्वं टिप्पणेषूपयुज्यन्ते, तय. पृ. ५६८^{o} ।

५. एकः शब्दो वृत्तिवैशिष्ट्यभिन्नस्वरूपाऽनेकार्थवाचको न भवतीत्युक्तपूर्ववादेन पाणिनीयायाः प्रक्रियायाः संवादनार्थं धातूनां बहुप्रस्थानत्वमुपकल्प्य तज्जानां कृतामेकवृन्तगताऽनेकफलन्यायतोऽनेकार्थवाचकत्वमुपपाद्यते, तय. पृ. ४९८^{e}, ५२१^{h}, ५६८^{o} ।

६. पाणिनीयायां प्रक्रियायां ये स्वतन्त्रप्रयोगाऽनर्हाश्च प्रातिस्विकाऽर्थरहिताश्च सन्तः प्रत्यया भवन्ति, ते मौलिकस्थित्यपेक्षया स्वतन्त्रप्रयोगाऽर्हप्रातिस्विकाऽर्थवदाधारध्वनिपरिणतशब्दीयवर्णविशेषाः पृथग्-निर्देश्याऽवयवधर्माणो भवन्तीत्युपवर्णितपूर्वं वादमनुसृत्य यत्र तत्र पाणिनीयानां प्रत्ययानां वास्तविकाऽऽधारभूतास्ते ते मौलिकाः शब्दा अपि निर्दिश्यन्ते, तय. पृपृ. १९३^{a}, ४०६^{f}, ४५५^{a}, ४८२^{b}, ५०७^{i}, ५०९^{i}, ५१३^{d}, ५८८^{g}, ५९२^{a,e}, ५९४^{h}, ५९७^{n} ।

७. सर्वनामान्यव्ययानि च प्रातिपदिकानि सन्ति नामाऽऽत्मकप्रातिपदिकाऽन्तरसामान्येन तत्र तत्र यौगिकवंशपरंपरितेन सनाथ्यन्ते, तय. तु. अनु, अस्मद्– ।

(ठ) अधिपाणिनीयमनुसंधानम्

यथाऽयं कोषः पाणिनीयमनुशासनं साक्षादिवाऽधिकृत्य सर्वाङ्गीणं च तुलनात्मकं चानुसंधानं प्रयोजयेत्, तथेदानीं संग्रहेणोच्यते—

---

[१] पाणिनीयायाः प्रक्रियाया बहिरस्य दीर्घत्वस्यान्यथासिद्धत्वमित्यभिसंधिर्भवति ।

१. नामाख्यातोपसर्गनिपातात्मकतया चत्वारि पदजातानीति यास्कः (१, १) आह । उपसर्गान् निपातेष्वन्तर्भाव्य (पा १, ४, ५८) च निपातान् स्वरादिगणसामान्येनाऽव्ययीभाव्य (पा १, १, ३७) चाऽव्ययानि लुप्तसुप्कतामात्रेण (पा २, ४, ८२) प्रातिपदिकान्तरेभ्यो भिन्नानि सन्त्यपि प्रातिपदिकान्येवेति कृत्वा च पाणिनिस्तु धातवः प्रातिपदिकानि प्रत्ययाश्चेत्येतत् तत्तत्पदस्वरूपापादकं सद् लाक्षणिकमात्रस्वरूपकपदार्थत्रितयमित्याह । एवं तावत् प्रत्ययानां साक्षान्निर्देशानर्हत्वाद् धातवश्च प्रातिपदिकानि चेत्येतद् वर्गद्वयमेव निर्देश्यत्वमापद्यते । एवं स्थितेऽपि तस्मिन् कोषे लुप्तसुप्कान्यव्ययानि संगृहीतार्थवैस्पष्ट्यार्थं सुप्योगीयेभ्यः प्रातिपदिकान्तरेभ्यो विशेष्य पृथगेव निर्दिश्यन्ते ।

२. अत्रत्यानां निर्देशानां पाणिनीयाऽनुशासनीयसमन्वयस्य तावदयं प्रकारो भवति—

(अ) यदा कश्चिद् निर्देशः साक्षादिवाऽष्टाध्यायी-गणोणादि-फिट्सूत्र-वार्तिकेष्टि-सव्याप्तिकस्य सतः पाणिनीयाऽनुशासनस्य विषयो भवति, तदाऽसावनुशासनविशेषो नियमेन सूच्यते, तय. पृ. ३[a,b] ।

(आ) यदा कस्यचिद् निर्देशीयस्य दुरूहस्य शब्दस्वरूपैकदेशस्य विषये पाणिनीयमनुशासनं न भवति, तदा तदनुसारं तस्योपपादनार्थं तदीयस्य विधानकस्य परिष्कारविशेषनिर्भर उपयोगोऽस्मदीयस्य प्रयत्नविशेषस्य विषयो भवति, तय, पृपृ. ७[e], ५०[o], ५१[h], ९१[c], १०५[j], १०६[n] ।

(इ) येषां निर्देशानां विषये पाणिनीयाऽनुशासनस्य नितान्तमभावः स्यात् , तानधिकृत्य तत्र तत्र धातवीय-परस्मैपदात्मनेपदविकरणेडागमान्यतमीये वा प्रत्ययीये वाऽनुबन्धीये वा तैङे वा सौपे वा कार्ते वा ताद्धिते वा सामासिके वा सौवरे वा सांहितिके वोच्चारणीये वा पाणिनीये प्रकरणे वार्तिकरीत्योपसंख्यानं (संक्षे. उसं.) क्रियते, तय. पृपृ. ५१[f], २७०[j], २८७[m], ५६०[a] ।

(ई) यदा कश्चिद् निर्देशो नैरुक्तिक्या तत्तद्वर्णलोपाऽऽगम-विकार-विपर्ययाऽऽदिस्वरूपया प्रक्रिययोपपादितो भवति, तदा पाणिनीयया प्रक्रिययाऽपि तदनुवादः क्रियते, तय पृपृ. १[u], ५६०[a] ।

(उ) यदा कस्यचिद् निर्देशस्य पाणिनीयेनाऽनुशासनेन विस्पष्टो विरोधो भवति, तदा तद्विषया स्पष्टैव सूचना क्रियते, तय. पृपृ. १३[n], ५१[j], १०५[m], २६५[p], ५३५[a] ।

(ड) पूर्वाऽभ्यर्हितीयं निदर्शनम्

टिप्पणगतेषु तेषु तेषु नानाविषयेषु नानास्वरूपेषु चोहापोहेषु प्रवर्तमानेषु तत्तत्पक्षबलाबलपर्यालोचनसौकर्यार्थं सर्वत्र तु. इतिशिरस्कतया पक्षतः, वैतु. इतिशिरस्कतया विपक्षतश्च पूर्वेषामभ्यर्हितानां मतानि यथावद् निदर्श्यन्ते, तय. पृपृ. १९८[h], २००[i,k], २०५[o], २०७[b,d], २६८[m], ३७७[f,b] ।

२. तिङन्त-प्रकरणम्

(क) धातवः

१. सर्वे धातवः प्रातिस्विकतां गतेन √ इत्येतेन संकेतेन पुरस्क्रियन्ते, तय. √अंश्, √अंह् ।

२. मा गाद् व्यर्थं धातवीयवस्त्वंश-वर्णक्रमो वैयाकुली-ग्रासतामिति सर्वे धातवो निरनुबन्धा एव निर्दिश्यन्ते, तय. √अञ्ज्, √कृ (=यक. अञ्जू, डुकृञ्) ।

३. पाणिनीय इदितः सन्तो धातव इह कृतनुमागमत्वेन निर्दिश्यन्ते, तय. √अंह् < √अहि ।

४. पाणिनीय इदित्तयाऽनिदित्तया चोभयथा निर्दिष्टिं भजमाना धातवः पार्थक्येन संख्यायन्ते । इह तु तदनुविधायि धातवीयं नुंभावाऽभावत्वं युगपदेव निर्दिश्यते, तय. **अभि ✓दभ्, दम्भ्** ।

५. पाणिनीये केचिद् धातवस्तदादेशा वाऽदन्तत्वेनाऽनुशिष्टा भवन्ति । त इह धात्वन्तरसामान्येन हलन्ततयैव निर्दिश्यन्ते, तय. **✓कथ्, ✓गण्, ✓धाव्, ✓यच्छ्** ।

६. सश्रुतयः सन्तो भिन्नार्था धातवः (तु. संक्षे. **बधा.**) तत्स्पष्टविवेचनाऽपेक्षितस्वशक्तिसमुचितमात्रासद्भावाऽभावविचारतः क्वचिदेव पृथक् संख्यायन्ते, प्रायेण तु तेन तेनाऽभिप्रेतेनाऽर्थेनैव सनाध्यन्ते, तय. तु. टिटि. **✓अँर्, ✓अर्च्> अर्कु-, ✓अश्** (बधा.), **✓अश्** (भोजने), **✓अस्** (भुवि), **✓अस्** (क्षेपणे) ; वैतु. **✓सन्** [*सरणे] (पृ. ६१५ª) ।

७. उपसृष्टा धातवो धात्वन्तरसाकक्ष्यमारोप्यमाणा यथास्ववर्णमात्रं स्वातन्त्र्येण निर्दिश्यन्ते, तय. **अति ✓पद्, अनु ✓पद्, अभि ✓पद्** । एवं स्थितेऽपि कस्को धातुः केन केनोपसर्गेणोपसृज्यत इत्यस्य समुदितपरिचयार्थमनुपसृष्टधातुनिर्देशाऽन्ते यथाश्रुति तदीया उपसर्गा अपि कोष्ठेऽन्तर्बध्यन्ते, तय. ✓अज्···[अनु°,···] । अनयैव किल द्वैधप्रक्रिययोपसृष्टमात्रतया वर्तमानानां धातूनामपि यथातद्वर्णमात्रं परामृश्यत्वेन निर्देशः संभवति, तय. **✓अङ्ख्** । ये चाऽप्यन्ये विशेषा इह वैशेष्येणाऽवधेयास्त इमे सूच्यन्ते—

(क) यत्रोपसर्गधात्वंशयोः संधिर्न भवति, तत्र तन्मध्यगो धातवीयः संकेत एव तद्व्यवच्छेदायाऽलम्, तय. **अति✓पत्** ।

(ख) यत्रोपसर्गधात्वंशयोः संधिर्भवति, तत्र सांहितिकाद् वर्णादनन्तरं बध्यमाने वर्तुलकोष्ठेऽन्तर्मध्यगेन सता धातवीयेन संकेतेन व्यवच्छिद्यमानौ विसंहितौ वर्णौ निर्दिश्येते, तय. अवा(व ✓अ)स् [क्षेपणे], अवे(व ✓इ), अभ्य(भि ✓अ)ञ्ज् ।

(ग) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयः संधिश्च न भवति, तत्र सकृद्वा भूयो वा यथापेक्षं मध्यगेन विच्छेदकाऽऽख्येन संकेतेनोपसर्गीयो व्यवच्छेदः प्रयोज्यते, तय. **अति-प्र ✓कित्, अनु-प्र ✓युज्, अनु-सं-प्र ✓या** ।

(घ) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयः संधिश्च भवति, तत्र सांहितिकाद् वर्णादनन्तरं बध्यमाने वर्तुलकोष्ठे विसंहितयोर्वर्णयोर्मध्ये विच्छेदकाऽऽख्यः संकेतो ध्रियते, तय. **अत्यु**(ति-उ)**द् ✓ग्रह्, अन्वा**(नु-आ)**✓भू, अनु-पर्या**(रि-आ)**✓वृत्** ।

(ङ) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयश्चोपसर्गधातवीयश्च संधी भवतः, तत्र प्रथमं संहितस्वरूपो निर्देशो भवति, तदन्ते च वर्तुलकोष्ठे यथापेक्षमुक्तपूर्वयोः संकेतयोरुपयोगेन समुचितोऽन्योन्यं व्यवच्छेदः प्रदर्शितो भवति, तय. **अभ्युदे**(अभि-उद्-आ ✓इ) ।

(च) यत्राऽनेकधोपसृष्टिर्भवति, तत्रोपसर्गक्रमनिर्देशस्याऽर्थक्रमनित्यस्य सतः क्वचिच् श्रुतिक्रमेण विसंवादोऽपि प्रतीयेत, तय. **उपा**(प-आ)**✓गम्>आ···उपगन्तन** ।

८. यत्र किंचिद् अनैपातिकं क्रियाविशेषणं (=सुबन्तविशेषात्मकं) गतीयते, तत्र तद्युक्तो धातुरप्युपसृष्टधातुनिर्विशेषतया निर्दिश्यते, तय. **अन्तर्-आ ✓धा, अन्तरि** (र् ✓इ), **अस्तमि** (म् ✓इ) ।

९. नामधातवो यथास्वनामिकप्रकृतिमनु यथावर्णमात्रं निर्दिश्यन्ते । तद्विषय एते विशेषाः सूचनीया भवन्ति—

(क) येऽदन्तप्रकृतिकाः सन्तः क्विपि निष्पन्ना भवन्ति, ते स्वराङ्कनं विनैव निर्दिश्यन्ते, तय. √अव् > ओम- > √*ओम् ।

(ख) ये णिचि निष्पन्ना भवन्ति, ते चौरादिक-हेतुमदन्यतर-णिजन्तधात्वन्तरवत् स्वराङ्कनमभजमानाः सन्त इकारान्ततया निर्दिश्यन्ते, तय. अन्त- > √*अन्ति, २अन्ध- > √*१अन्धि ।

(ग) उक्तपूर्वद्वैविध्यविभिन्ननिष्पत्तीनि नामधात्वन्तराणि प्रायेण पाणिनीयप्रक्रिययाऽनभिमततत्क्लेशनाऽतिरेकव्यतिरेकतो[1]ऽनुवादयितुमशक्यानीति कृत्वाऽङ्गरूपता[2]मापाद्य सस्वराणि निर्दिश्यन्ते, तय. अंहस्- > √अंहोयु, अघ- > √अघायु, अन्न- > √अन्निय ।

१०. पाणिनीये येषां धातूनामन्योऽन्यमादेशादेशिभावो विधीयते, तदीय इहत्ये निर्देश एते विशेषा भवन्ति—

(क) यदैवंविधयोः कयोश्चिद् धात्वोरापातिक्या[3] भाषाशास्त्रीयया दृष्ट्या पार्थक्यमेव प्रतीयते, तदा तयोरसंबद्धधात्वन्तरद्वयसामान्येन पृथङ् निर्देशो भवति, तय. √अस् (भुवि), √भू च, √दा, √यच्छ् च, √ब्रू, √आह् च, √सृ, √धाव् च, √दृश्, √पश् च, √इ, √गा च ।

(ख) यदैवंविधयोः कयोश्चिद् धात्वोरापातिक्याऽपि भाषाशास्त्रीयया दृष्ट्या साजात्यसंनिकर्षः प्रतीयते, तदा तयोर्मध्ये यस्य भूयसी रूपसंपत्तिः स्यात्तदनुगततया चाऽवान्तरपार्थक्येन चाऽल्पीयोरूपसंपत्तेर्धातोर्निर्देशो भवति । एवं स्थितेऽपि परामर्शसौकर्यौपयिकतया तस्य यथातद्वर्णमात्रं पृथगपि धातुमात्रीयो निर्देशो भवति, तय. √इच्छ् > √इष्, √ऋच्छ् > √ऋ, √गच्छ् > √गम्, √यच्छ् > √यम् ।

११. यदा कस्यचिद् धातोस्तदीयाया रूपसंपत्तेरादिवर्णतो बहुविधत्वाद् विशदवैयुत्पत्तिकप्रतीत्यर्थं तदानुगुण्येनाऽऽदिवर्णभेदतो बहुधा निर्देशः कृतो भवति, तदा प्रतिनिर्देशविशेषं निर्देशान्तरीयः परामर्शो वर्तुलकोष्ठेऽन्तर्बध्यते, तय. √अर्च् (= √ऋच्), √अर्ह् (= √*ऋंह्) ।

१२. नवोपकल्पिता धातवः प्रायेणा[4]ऽधितारकिता भवन्ति । अथ यैरपेक्षाविशेषैस्तदीयोपकल्पना प्रयोजिता भवति, त इमे स्मर्य्यन्ते—

(क) यदा तन्मूलानि कृत्तिङ्रूपाण्युपलभ्यन्ते, तय. अंहस्- > √*अंहोयु, अंहुर्- > √*अंहूरि, √*अघ्, √*अङ्कूयु, √*अप्, √*ऋंह् ।

(ख) यदा तदीयेन यथावर्णमात्रेण व्यवस्थापनेन परामर्शे सौकर्यविशेषः संजायते, तय. √*अर्, √*अर्धं, √*अर्ष् ।

(ग) यदा तद्द्वारा विशेषतो मौलिकीमार्य्यभाषामपेक्ष्य योग-संपत्तिर्भवति, तय. √*ऋ (पृ. ४७५^{a}), √*मृ (पृ. ४८८^{b}), √*धृ, √*क्षृ (पृ. ५७९^{d}) ।

---

[1] अनभिमतस्तस्याः (=पाणिनीयायाः प्रक्रियायाः) क्लेशनाऽतिरेकस्तद्व्यतिरेकतस्तामतितरामिवाऽक्लेशयित्वेत्यर्थः ।

[2] तिङि परतः सति नामधातवीयं यदङ्गं तद्रूपतामिति भावः ।

[3] मौस्थि. अपेक्षया तत्संबन्धसंभवविच्छेदो मा भूदित्यर्थमेतद् विशेषणं दीयते ।

[4] क्वचिदनवधानात् तारकेयं नापि प्रत्ता भवतीत्येतत्सूचकमिदं विशेषणं द्रष्टव्यम् ।

१३. पाणिनीये विकरणभेदेन पृथक् संख्यायमाना धातव उपरिवक्ष्यमाणेन प्रकारेण तदीयेषु रूपेषु गणभेदतः पार्थक्येन संघटितेषु सत्स्विहैकत्रैव निर्दिश्यन्ते, तय. **√इ, √कृ** ।

(ख) तैङान्यङ्गानि

१. तिङि परतोऽङ्गीभविष्यति धातौ लक्ष्यमाणमवान्तरप्रत्यय-तत्प्रकारकोपजनाऽन्यतरप्रयोजितं द्विर्वचनं वाऽन्यत् किंचित् कार्यं वाऽवान्तराऽङ्गस्य प्रयोजकमिव सत् तेन सार्कं निर्दिश्यते, तय. **अति √ष्ठा(<स्था)>तिष्ठ (=°ष्ठ्), अभि √हन्>जिघांस(=°स्), अभि-सं √पद्>पादि** ।

२. यदैवमभिनिर्वर्तुकान्यवान्तराङ्गाणि भूयांसीव भवन्ति, तदा तेषां यथास्वं रूपखण्डानामादौ निर्देशो भवति, तय. **अति √तॄ>अति √तर्, अति √ततॄ, अति √तुर्, अति √तारि** ।

(ग) तैङानि रूपाणि

१. यथाश्रुतसंगृहीतानां सतां तैङानां रूपाणां मध्ये प्रथमं सार्वधातुकलकारीयाणि शुद्धवृत्तीयानि[1] रूपाणि लङ्-लेड्-लोड्-लङ्-विधिलिङानुपूर्व्या निर्दिश्यन्ते, तय. **अनु √ब्रू, √अस(भुवि)** ।

२ यदैतानि रूपाणि गणतो भिद्यन्ते, तदा तानि प्रतिगणभेदं खण्डपार्थक्येन निर्दिश्यन्ते, तय. **अति √तॄ, अनु √भृ** ।

३. तत्पश्चादवशिष्टलकारीयाणि शुद्धवृत्तीयाणि रूपाणि लिड्-लृडाशीर्लिङ्-लुङ्-लृङामनुक्रमेण निर्दिश्यन्ते, तय. **अनु √वृत्, अनु √ष्ठा (<√स्था), √अस्(भुवि), √अस् (क्षेपणे)** ।

४. आर्धधातुकायमानस्य लेटो रूपाणि सार्वधातुकलेड्रूपेभ्योऽवच्छिद्य लुङ्रूपैः साऽङ्गानि सन्ति तैः सहैव निर्दिश्यन्ते, तय. **अति √तॄ>?अतितरः, अति⋯तारिषत्** ।

५. अनयैव दिशा लोड्रूपाणि विधिलिङ्रूपाणि चाङ्गभेदवन्ति सन्त्यन्तरतमलकारान्तरीयरूपाण्यनु विविच्य विविच्य निर्दिश्यन्ते, तय. **अप √भू>अप⋯भवतु, अपभूतु, अपि⋯भूतु, अपि⋯जगम्युः** ।

६. वेदे लुड्दुर्भिक्षमिव भवति । तृच एवौत्तरकालिकी तदर्थताऽविरभूदित्यभिसंधायोपलभ्यमानेव सत्येकैतदीया श्रुतिः कृत्तयैव निरदेशि, तु. **अन्वा √गम्>अन्वा-गन्तृ-** ।

७. उभयपदीयानां रूपाणां मध्य आत्मनेपदीयानां पूर्वभावः परस्मैपदीयानां चोत्तरभावो भवति, तय. **अभि √मृश्, अभि √रक्ष्** ।

८. रूपाणां पुरुषतः प्रथममध्यमोत्तमक्रमेण वचनतश्चैकद्विबहुक्रमेण व्यवस्थापनं भवति, तय. **√अव्>रक्ष्, √ अस् (भुवि), √अस् (क्षेपणे)**।

९. सस्वर-निःस्वररूपाणां मध्ये सस्वराणां पूर्वभावो निःस्वराणां चोत्तरभावो भवति, तय. **√अव्>अवति, अवति, √अस् (भुवि) >अस्ति, अस्ति** ।

१०. शुद्धवृत्तीयानि रूपाण्यनु तद्वदेव व्यवस्थापितानि सन्ति प्राक्रियिकाणि **यग्-णिच्-सन्-यङन्तजातीयानि** यानि रूपाणि निर्दिश्यन्ते, तय. **√अञ्ज्, अति √तॄ, √अद्, अनु √शक्** ।

११. यत्र तत्रोपलभ्यमानस् तिङ्रूपान्तीयः सांहितिको दीर्घभावः सार्कं निर्दिश्यते (तु. भू. ४, १, च, २), तय. **अप √हन्>अप...हत>ता, अपि √भू>अपिभूम>मा, √अव्>अव>वा** ।

---

[1] णिजाद्यभिव्यञ्जितहेतुत्वाद्यर्थविशेषानुपहितं सदप्राक्रियिकं यद् वृत्तं भवति तदेवेह शुद्धमिति विशिष्योच्यते ।

१२. तिङ्-रूपाणि परिसमाप्य तेन तेन प्रकृतेन धातुना योगमाप्नुवानानामुपसर्गाणां संग्रहो वर्गकोष्ठेऽन्तर्बध्यते, तय. **√अद्**···[अपि°, आ°, वि°]।

१३. विलक्षणानि रूपाणि यथास्ववर्णमात्रमप्यनुक्रम्यन्ते च ततो यथास्वधातु प्रतिपरामृश्यन्ते च, तय. **अप्सन्त < √*अप्**, **आश्नन् < √अश्** (भोजने)।

१४. अथोपसृष्टधातवीयरूपनिर्देशीयाः केचिद् विशेषा उल्लिख्येरन्—

(क) व्यवहिताऽव्यवहितोभयथाप्रयुक्तानामुपसर्गाणां विषये प्रतिस्थलं वाक्यान्वयीयायाः सौवर्याश् छान्दस्याः सांहितिक्याश् च स्थित्या भूयोभूय आलोच्यत्वाद् नितान्तं दुष्करोऽपि सन्नेष निर्णयो दुर्वारो भवति यथोपसर्गत्वेन निर्दिश्यमानं पदं वस्तुतोऽतिक्रियाविशेषणभावं सदेव संसिद्धोपसर्गभावं भवतीति (तु. भू. ४, १, ञ, ५, अ उउ)।

(ख) अव्यवहितोपसृष्टानां धातूनां रूपाणि यथाश्रुतमेव निर्दिश्यन्ते, तय. **अति√कृ>अतिकरोति**।

(ग) व्यवहितोपसृष्टानां धातूनां रूपाणि तु कतिभिश्चिद् माध्यमिकैर्बिन्दुभिः सह निर्दिश्यन्ते, तय. **अति√तॄ>अति···तरामसि**।

(घ) यदोपसर्गमात्रस्य पुनःश्रुतेः श्रावितचरस्य तिङ्-रूपस्याऽध्याहारः साऽवसरो भवति, तदोपसर्गे भूयः पृथग् निर्दिष्टे सत्यध्याहर्त्तव्यं तिङ्-रूपं विभिन्नं मुद्रितं सद् वर्तुलकोष्ठेऽन्तर्बध्यते, तय. **अप√नुद्>अप**[1](**नुदस्व**)[1]।

(ङ) प्रतीकगताश्चोपसर्गमात्रश्रुतयस्तत्तन्मूलत आहारितैस्तद्युक्तपूर्वैस्तिङ्-रूपैर्विमुद्रितैश्च कोष्ठबद्धैश्च सद्भिः सनाथीकृत्य निर्दिश्यन्ते, तय. **अभी** (**भि√ई**)>**अभि** (**ईमहे**)।

(च) यदोपसर्गमात्रश्रुतिः कल्पयितव्याऽऽक्षेप्ययोग्यतिङ्-रूपा भवति, तदा तदव्यवधानेन दक्षिणतो विच्छेदिकासनाथितं सद् धातवीयसंकेतमात्रं प्रदाय तदीये टिप्पणे तिङंशो निर्दिश्यते, तय. **अति√-**। परं प्रायेण यदा साक्षाद् निर्दिष्टस्यैव सतः कस्यचिद् धातोः किंचिद् रूपमुक्तपूर्वविधया प्राकरणिकीं योग्यतामपेक्ष्याऽध्याहार्य्यं स्यात्, तदा तद् रूपमपि कोष्ठेऽन्तर्बद्धं सत् तद्धातुरूपान्तरसंपत्त्या सह निर्दिष्टमेव भवति, तय. **अप√गम्>अप** (गमयन्तु)।

(छ) रूपनिर्देशाऽवसर उपसर्गगतो वोपसर्ग-धातुगतो वा संधिः कोष्ठकान्तर्बध्यमानयथास्वविच्छिन्नरूपः सन् यथाश्रुतं निर्दिश्यते, तय. **अभ्यु** (**भि-उ**)**पा**(**प-अ**) **व√हृ> अभ्युपावहरामि**।

३. सुबन्त-प्रकरणम्

(क) वैशेषिकाः संकेताः

१. सर्वेषां सुबर्हाणां प्रातिपदिकानामन्ते तत्प्रातिस्विकसंकेततया दीयमानो विच्छेदकसंकेतस्तेषामन्यतो धातुभ्योऽन्यतश्चाऽव्ययेभ्यः पृथक्करणः सन् प्रयोगे तदीयस्य सुप्प्रत्यययोगस्याऽवश्यंभावित्वं सूचयेत्, तय. **अंश-**, **अंशु-**, **अग्नि-**, **अग्नायी-**, **आग्नेय-**, **अग्नि-दग्ध-**।

२. यदा किञ्चित् सुबर्हतयाऽप्रसिद्धचरं प्रातिपदिकं तथात्वेन निर्दिश्यते, तदा तदन्त्यो विच्छेदकस्तारकया सनाथ्यते, तय. २**अवस्-***।

---

[1] अत्र मूर्धन्या संख्याऽऽवृत्तित्रिकं सूचयति।

३. अलुक्-समासीयं पूर्वपदं पृथगवान्तरप्रातिपदिकीकृत्य स्वरेण च विच्छेदकेन च विना निर्दिश्यते, तय. **अग्र- > अग्रे** ।

४. व्यवहितपदश्रुति सामासिकं प्रातिपदिकं ϕ इत्येतेन संकेतेन पुरस्क्रियते (द्र. भू. ४, २, ग, १४, ग), तय. **अप-घ्नत्-** -घ्नन् ऋ ८,४३,२६ϕ, ϕ**अप-दुहत्** ।

(ख) कृद्-व्यवस्थापनम्

१. धातोश्च तज्जस्य कृत्-प्रातिपदिकस्य च मध्ये सति तद्धात्वे तद्धातवीयतिङ्-रूपाणि विहाय नान्यत् किमपि व्यवधायकं भवति, तय. **अंहोयू-**, **अङ्कूयत्-**, **अभि-श्वसत्-**, **अपि-हीन-** ।

२. मुख्यधात्वनुगताऽवान्तरीकृतधातुजं प्रातिपदिकं मुख्याऽवान्तरोभयप्रकारकधातवीयरूपसर्वस्वं परिसमाप्य तदुपरि निर्दिश्यते, तय. **अनु √गम् > गच्छ् > अनु-गच्छन्ती-**, **अति √तॄ > अति √तर् > अति-तर-** ।

३. बहुत्वे सति धातुविशेषजानि कृत्-प्रातिपदिकानि यथास्ववर्णमात्रं निर्दिश्यन्ते, तय. **√अव् > अव्-**, **अव-**, **ऊति-**, **ऊम-** ।

४. गणभावेन निर्दिष्टानां सतां प्रातिपदिकानामवान्तरीकृताः प्रभेदा मुख्यैः प्रभेदैः साकं वा यथास्ववर्णमात्रं च यथाप्रातिस्विकरूपखण्डशीर्षण्यतया च वा निर्दिश्यन्ते[1], तय. **अदस्- > अमी-**, **अमु-**…, **अस्मद्- > अस्म-**, **अस्मद्-**, **अहम्**, **आव**…; **अहन्- > अह-**, **अहन्-**, **अहर्-**, **अहस्-** ।

५. यथावर्णमात्रमनुक्रमस्य कृन्मात्रसामान्यात् सुबर्हाणां प्रातिपदिकानां सतां कृतां पार्श्वत एवाऽसुबर्हाणामव्ययानां सतां कृतामपि निर्देशो भवति, तय. **अनु-दृश्य**, **अभि-दुह्य**, **अभि-द्रुह्य** ।

(ग) तद्धित-व्यवस्थापनम्

१. ताद्धितानि प्रातिपदिकानि यथास्वं नामिकप्रकृतीनामुपरिष्टादव्यवधानेन यथावर्णमात्रं निर्दिश्यन्ते, तय. **अग्नि- > अग्नि-मत्-**, **आग्नेय-**; २**अ-दिति- > अदिति-त्व-**, **आदितेय-**, **आदित्य-** ।

२. येषां तद्धितानां स्वनामिकप्रकृतिभिराद्यक्षरसामान्यं भवति, ते तत्पूर्वपदैः समासैः सस्थितयः सन्तस् तदीयस्तम्भाऽपेक्षयैकया मात्रया व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. १**अग्नीषोम- > अग्नीषोमीय-**; **अग्र- >** १**अग्रिय-**, २**अग्रिय-**, **अग्र्य-** ।

३. येषां तद्धितानां स्वकृत्प्रकृतिभिराद्यक्षरेण वैषम्यं भवति, ते तत्प्रकृतिकेभ्यः समासेभ्यः प्रागेव तदीयस्तम्भाऽपेक्षया मात्राद्वयेन व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. **अतिथि- > आतिथ्य-** ।

४. यदा तु विषमाऽऽद्यक्षरस्याऽपि सतस्तद्धितस्य नामिकी प्रकृतिः सामासिकीं पूर्वपदतां नोपेयात्, तदा तन्निर्देश एकया मात्रया व्यवहिते स्तम्भ एव क्रियते, तय. **अग्रयण- > आग्रयण-** ।

५. ताद्धितानां तद्धितानां विषयेऽयं सामान्यो नियमो भवति, यथा यस्य या प्रकृतिस्तस्य तदपेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्देशः स्यादिति, तय. **अ-दिति- > आदित्य- > आदित्य-वर्-** ।

(घ) समास-व्यवस्थापनम्

१. माध्यमिकविच्छेदकान्तरसमन्वितानि सन्ति सामासिकानि प्रातिपदिकान्यन्तमात्रविच्छेदकितसुबर्हप्रातिपदिकान्तरमात्रात् सुवेचानि स्युः, तय. **अघ-रुद्-**, **अघ-शंस-**, **अघ-हार्-** ।

---

[1] उपरितनात् खण्डात् प्रभृति णत्व-तदभावाभ्यां च षत्व-तदभावाभ्यां च लक्षितानि प्रातिपदिकान्यप्यनयैव दिशा मुख्याऽवान्तरीकृत्य निर्देक्ष्यन्ते, तय. **धनुर्**, **ष्**, **स्**,:-, **पूषण्**, **न्-** (वैतु. इह **अर्यमन्-**) ।

२. समासेऽसमस्तप्रातिपदिकान्तरेण समस्य समासान्तराऽवयवतामुपेयुषि माध्यमिकविच्छेदकस्तदीय-पूर्वोत्तरान्यतरपदताया अनुरोधात् तदन्त्यो वा तदाद्यो वा यथायोगं संजायते, तय. **अघशंस-हुन्-**, ***अधि-कृष्णाजिन-** ।

३. समासद्वयेन समासान्तरे जन्यमाने तत्समासान्तरमात्राऽपेक्षया मध्ये विच्छेदको दीयते, तय. **अघशंस-दुःशंस-**, **अजात-पुत्रपक्षा-** ।

४. स्वपूर्वपदीयेष्वाद्यक्षरेण वैषम्यभाक्षु तद्धितेषु यथायथं निर्दिष्टेषु सत्सु समासा यथावर्णमात्रं निर्दिश्यन्ते, तय. **अतिथि-** > **अतिथि-ग्व**, **अतिथि-पति-** ।

५. प्राथमिकः समासः स्वपूर्वपदापेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्दिश्यते, तय. **१असुर-** > **असुर-क्षयण-** ।

६. समासजः समासः स्वसमस्तपूर्वपदापेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्दिश्यते, तय. **अग्निष्टोम-प्रायण-** ।

७. यदा समस्यमानयोः पूर्वोत्तरपदयोरन्त्याऽद्यवर्णयोस्तयोरन्यतरस्मिन् वा सांहितिको विकारो भवति, तदाऽसौ तन्मध्यप्रवेशिते वर्तुलकोष्ठे यथायथं निर्दिश्यते, तय. **अग्न्यु(ग्नि-उ)पस्थान-**, **अक्षितो(त-ऊ)ति-**, **अती(ति-इ)त्वरी-**, **अनु(स>)षत्य-** ।

८. यदा पूर्वपदाऽन्त्यो दीर्घः स्वरः पौर्वकालिकह्रस्वमूलो भवति (तु. भू. ४, १, च, २ उउ.), तदाऽसौ ह्रस्वो यथापरिचितपरिभाषं सुगमय्य निर्दिश्यते[1], तय. **अ(क्ष>)क्षा-नह्-**, **अ(जि>) जी-गर्त-**, **अ(ति>)ती-काश-**, **अ(नु>) नू-वृत्-** ।

(ङ) स्त्रीलिङ्गक-व्यवस्थापनम्

१. पाणिनीयायां प्रक्रियायां स्त्रीलिङ्गकमात्रतया सिषाधयिष्यमाणानि सन्ति दीर्घान्तानि प्रातिपदिकानि **तथैव** निर्दिश्यन्ते, तय. **अर्हणा-** ।

२. यानि प्रातिपदिकानि पाणिनीये संभवल्लिङ्गान्तरतया शिष्यमाणानि सन्त्यप्युपलब्धस्त्रीलिङ्गकमात्रश्रुतीनि भवन्ति, तानि वर्तुलकोष्ठित-कोणपुङ्खान्यतरसरूपसंकेतसहकृताऽस्त्रीपरकपूर्वरूपोपकल्पनानि कृत्वा निर्दिश्यन्ते, तय. **अश्यमा(न>) ना-**, **अति-चर(त्>)न्ती-** ।

३. स्वराऽभेदेन लिङ्गपर्यायतोऽकाराऽऽकारान्यतराऽन्तततयोपलब्धश्रुतीनि प्रातिपदिकानि प्रार्धविराम-विविक्तोभयप्रकारसाधारणाऽन्त्यविच्छेदकतया समुह्य निर्दिश्यन्ते, तय. **अघ, घा-**, **२अज,जा-**, **अज्ञान,ना-** ।

४. इवर्णोवर्णान्यतराऽन्तानि प्रातिपदिकान्यपि नान्तरीयोक्तपूर्वयाऽवर्णान्तपरया दिशैव निर्दिश्यन्ते, तय. **अराति, *ती-**, **अभि-दिप्सु,प्सू-**, **अवस्यु,स्यू-** ।

५. उक्तपूर्वव्यतिरिक्तानि सर्वाण्यपराणि स्त्रीलिङ्गकानि प्रातिपदिकानि यथास्वाऽनुगताऽस्त्रीपरकपूर्वरूपीय-स्तम्भापेक्षयैकया मात्रया व्यवहिते स्तम्भान्तरे तत्तद्रूपसुवारसंभेदनिवृत्त्यर्थं पृथग् निर्दिश्यन्ते । एतानि तावत् प्रविभज्य किंचित् सूच्येरन्—

(अ) यान्याकारान्तानि सन्त्यर्थतश्च योगतश्च विशिष्टानि स्युः, तय. **अघा-**, **२अषाढा-** ।

---

[1] मूआ. परिभाषया त्वेतद् दीर्घत्वं यथायोगम् **अर्**, **इर्**, **उर्** इत्येतदन्यतममूलकं भवति (तु. भू. ४, १, ञ, ५, अ उउ.

(आ) यानि दीर्घेकारान्तानि सन्त्यकार-हलन्यतरान्ताऽस्त्रीपरकपूर्वरूपाणि स्युः, तय. १अ॒-देव- > अ॒देवी-, अ॒सत्- > अ॒सती-, अर्कि॒न्- > अर्कि॒णी- ।

(इ) यानि दीर्घेकारान्तानि सन्ति भिन्नस्वर-ह्रस्वेकारान्त-मौलिकपूर्वरूपाणि स्युः, तय. अ॒क्षि- > अक्षी॒-, अर्ष॒णि- > अर्षणी॒- ।

(ई) यानि दीर्घेकारान्तान्यभिन्नस्वर-ह्रस्वेकारान्त-मौलिकपूर्वरूपाणि सन्त्यन्यथा कथञ्चित् सुवेचानि स्युः, तय. अरुणि॒- > १अरुणी॒- ।

(उ) यानि दीर्घेकारान्तानि सन्त्यृकारान्ताऽस्त्रीपरकपूर्वरूपाणि स्युः, तय. अवितृ- > अवित्री॒-, अनु-ष्ठातृ- > अनुष्ठात्री- ।

(च) कालिकलकारार्थक-सुबर्हकृद्-निर्देशिका

क्त-क्तसु-कानच्-शतृ-शानच्-स्यतृ-स्यमानाऽन्यतमाऽन्ताः सुबर्हाः कृतः सांप्रतिकेषु कोषेष्वाख्यातिक-प्रकरणे लकाररूपाऽनुपदं निर्दिश्यमानाः सन्त इह तावत् सुबर्हकृदन्तरसामान्येन यथावर्णमात्रं निर्दिश्यन्ते, तय. अप√रुध् > अ॒प-रुद्ध-, अप-रुध्य॒मान- ।

(छ) क्रियाविशेषणंभावुक-सुबर्हप्रातिपदिक-निर्देशिका

येषां सुबर्हाणां रूपविशेषाः क्रियाविशेषणंभावुका भवन्ति, तेषां सुबर्हान्तरनिर्विशेषं निर्देशो भवति, प्रस्तुतवैशिष्ट्यं च तदीयं यथावट् टिप्पण्यते, तय. २अनु-का॒म- > -मम्, अ॒-विद्वेष- > -षम् ।

(ज) अयौगिक-सुबर्हप्रातिपदिक-निर्देशिका

यानि निमित्तान्यादाय कानिचित् सुबर्हाणि प्रातिपदिकानि कृद्बाह्यीकृत्य स्वतन्त्रशब्दतया यथावर्णमात्रं निर्दिश्यन्ते, तानीमानि सूच्येरन्—

१. यदा कृज्जातीयस्य सुबर्हस्य प्रातिपदिकस्य व्युत्पत्तिरज्ञाता वा दुरूहा वा संदिग्धा वा मूलाऽऽर्यभाषीया सत्यप्रसिद्धा वा स्यात्, तय. अ॒नस्-, २अन्य॒- ।

२. यदा कृत्तद्धितसमासाऽन्यतमजातीयं सुबर्हं प्रातिपदिकं वर्णविकारतो यौगिकव्यवस्थितिकतया दुरीक्षमिव संजायेत, तदेवंविधे स्वतन्त्रनिर्देशे क्रियमाणे सति समुचिता प्रतिपरामर्शिकाऽपि क्रियते, तय. ऊति॒-, ऊ॒म-, स॒त-, आग्नेय॒-, आतिथ्य॒-, अग्ना॒-वि॒ष्णु- ।

३. यदा समासत्वेनोपकल्प्यमाने सुबर्हे प्रातिपदिकेऽवयवतः संशयो भवति, तय. अ॒नीक-, अभी॒क-, अ॒नर्विश्- ।

४. अथ गणतो निर्देशभाजां सुबर्हाणां प्रातिपदिकानां येऽवान्तराः प्रभेदा भवन्ति, ते प्रत्येकं प्रतिपरामर्शिकया सनाथ्यैवं स्वतन्त्रतयाऽपि निर्दिश्यन्ते, तय. अमी॒-, अमु॒-, अ॒ह-, अ॒हर्-, अ॒हस्- ।

५. पूर्वपदतया समासान्तरमननुप्रविष्टः सन् नञ्-समासश्च प्रथमस्तम्भीयतया स्वतन्त्रं निर्दिश्यते, तय. अ॒-पति-, अ॒-पतिघ्नी-, अ॒-जात- (वैतु. अ॒जात-शत्रु-) ।

(झ) विसंख्यात-सुबर्हप्रातिपदिक-निर्देशिका

१. स्वर-भेदेन श्रूयमाणानि सवर्णानि सुबर्हाणि प्रातिपदिकानि विसंख्याय निर्दिश्यन्ते, तय. १अ॒पस्-, २अप॒स्-, १अ॒-मेनि-, २अ-मेनि॒-, १अरुणी॒-, २अ॒रुणी- ।

२. अथ स्वरभेदव्यतिरिक्तकारणान्तरप्रयोजितार्ऽथभेदप्रदर्शनौपयिकतयाऽपि सुबर्हप्रातिपदिकविसंख्यानमाद्रियते, तय. १अप्-, २अप्-; १अरति-, ?२अरति-; १अरत्नि-, ?२अरत्नि-; २असुर-, ३अ-सुर- ।

(ञ) सौपरूप-निर्देशिका

१. सुब्योगे प्रातिपदिकस्याऽन्त्यमेकाज्मात्रं तत्पूर्ववर्तिनः प्रातिपदिकावशेषस्य संग्राहकेण सता विच्छेदकेन पुरस्कृतं सन्निर्दिश्यते, तय. अंश- > -शः, -शम् , -शस्य ।

२. एकाज्मात्रकाणां प्रातिपदिकानां सुब्योगीये निर्देशे तावद् विच्छेदकेन संग्राह्यस्य पूर्ववर्तिनः प्रातिपदिकांऽशस्यैवाऽभावात् तत्प्रयोजनाभावाद् तत्प्रयोगाभावो भवति, तय. सत्- > सत् , सन्तः, सन्तौ ।

३. प्रातिपदिकाऽपेक्षया स्वरतो विशेषे प्रदर्शयितव्ये सत्येव सुब्योगीये निर्देशे स्वराङ्कनमाद्रियते, तय. सत्- > सतः, सताम् , सद्भ्यः ।

४. सौपानि रूपाणि संघटितपरामर्शिकासौकर्याऽनुरोधेन यथावर्णमात्रं न तु यथाव्यक्ति वा यथाविभक्ति वा निर्दिश्यन्ते, तय. अंशु- > -शवः, -शवे, -शुः; अग्र,ग्रा- > -ग्रम् , -ग्रा, -ग्राः, -ग्रान् ।

५. [1]गाणप्रातिपदिकाऽत्रान्तरप्रातिपदिकीयानि सौपानि रूपाणि यथोक्तपूर्वसामान्यव्यवस्थं पार्थक्येन निर्दिश्यन्ते, तय. अदस्- > अमी- > -मी, -मीभ्यः, -मीषाम् ।

६. साऽऽम्रेडितानि सुब्-रूपाणि माध्यमिकविच्छेदकवन्ति सन्ति यथोक्तपूर्वसामान्यव्यवस्थं पार्थक्येन निर्दिश्यन्ते, तय. अंशु- > - शुःऽ-शुः; अंहस्- > -हसःऽ-हसः, अग्नि- > -ग्निम्ऽ-ग्निम् ।

(ट) उत्तरपदत्व-निर्देशिका

एकैककस्य सुब्-रूपीयस्य खण्डस्याऽन्ते वर्गकोष्ठेऽन्तस् तत्तत्प्रकृतप्रातिपदिकोत्तरपदाः समासाः पूर्वपदतो विमुद्रं निर्दिश्यन्ते, तय. अंशु- ··· [°शु- अन्°, उप°, तृप्त°] ।

४. अव्यय-प्रकरणम्

१. अव्ययमात्रं वैशेषिकसंकेतविरहितं सद् यथास्ववैशेषिकसंकेताभ्यां धातोश्च सुब्योगीयात् प्रातिपदिकाच्च सुवेचं भवति, तय. अथ, अनु, ✓अद् > अत्त्वा, अत्तवे; अनु ✓दिश् > अनु-दिश्य, अधरात् ।

२. त्त्वान्त-तुमुन्नन्तप्रकारकाणि कृज्जातीयान्यव्ययानि सांप्रतिकेषु कोषेष्वाख्यात-प्रविषयीक्रियमाणान्यपि सन्तीह सजातैः सुब्योगीयैः कृदन्तरैः सस्तम्भीकृत्य तत्साधारण्येन यथास्ववर्णमात्रं निर्दिश्यन्ते, तय. ✓अद् > अत्तवे, अत्तुम् , अत्त्वा ।

३. अनूपचितकायानि सन्ति कृज्जातीयान्यव्ययानि यथास्वप्रकृतिभूताऽव्ययान्यनु मात्रयैकया व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, ✓ अद् > अत्त्वा > अत्त्वाय ।

---

[1] गणभावेन निर्दिष्टे तद्धितो द्रष्टव्यः ।

४. यान्यव्ययानि स्वप्रकृतिभूतेभ्यः सुब्योगीयेभ्यः प्रातिपदिकेभ्यः स्वरूपतो नाऽतिविप्रकृष्टानि स्युः, तानि तदुपरि तदवान्तरप्रातिपदिकतया पृथङ् निर्दिश्यन्ते, तय. अधर- > अधरात् ।

५. समासाऽवयवतां प्रपन्नानामव्ययानां विषय एते विशेषा अवधेया भवन्ति—

(क) तत्तदव्ययपूर्वपदतया विशिष्टानां धातूनां च प्रातिपदिकानां च तत्तदव्ययाऽनधीनतया यथास्ववर्णमात्रं निर्देशा भवन्ति, तय. अनु √पत् (गतौ), अनु-पथ-, अभि √ रुह्, अभि-रूप- ।

(ख) मूलतः समासाऽवयवभूतानि सन्ति प्रतीकगतत्वेन पृथगिव श्रूयमाणान्यव्ययानि यथोक्तपूर्वसामान्य-व्यवस्थं वर्तुलकोष्ठेऽन्तःप्रदर्शितैः सद्भिर् मौलिकैरुत्तरपदैः सनाथ्य निर्दिश्यन्ते (तु. भू. ४, २, ग, १४, ङ), तय. अभी(भि √ई) > अभि(ईमहे) ।

(ग) यदा समस्तस्य कृज्जातीयस्याऽव्ययस्योपसर्गांशो मूले व्यवहित इव श्रूयते, तदा तस्य निर्देशः ϕइत्येतेन संकेतेन पुरस्क्रियते (तु. भू. ४, २, ग १४, ग), तय. अभि-समे(म्-आ√इ) > ϕअभि-समेत्य ।

(घ) मूलत उत्तरपदविधया समासाऽवयवतां भजदपि सद् निहतंभावुकमव्ययं यथास्ववर्णमात्रं स्वातन्त्र्येण निर्दिश्यते[1], तय. इव, उ, च, चित् ।

(ङ) यदा तूक्तपूर्वं निहतंभावुकमव्ययमव्ययान्तरस्याऽन्ते श्रूयते, तदा तद् यथासामान्यव्यवस्थं समासाङ्ग-भूतमेव निर्दिश्यते, अथ>अथो ।

(च) एवं सत्यपि यदा तु निहतंभावुकमव्ययमुपसर्गभावुकस्याऽव्ययान्तरस्याऽन्ते श्रूयते, तदा तत् ततो व्यवच्छिद्य पृथगेव निर्दिश्यते येनोपसर्गोपसृष्टसंबन्धोऽव्यवहित इव प्रतीयेत, तय. अपे(प√इ) > अप(एतु) < अपो(एतु), अप√म्यक्ष् > अप ··म्यक्ष < अपो ··म्यक्ष, अपे(प√ई)ज् > अप ··अपेजते < अपो ··अपेजते ।

६. अव्ययानां विसंख्यानेऽयं वक्ष्यमाणो निमित्तोद्देशोऽवधेयः—

यदा तानि सस्वर-निःस्वरोभयथा श्रूयन्ते, तय. कम्, कम्, यथा, यथा ।

७. समस्तानामव्ययानां यथासामान्यप्राप्ति द्वेधा निर्देशो भवति । यथास्ववर्णमात्रं च पूर्वपदीयप्रति-परामर्शिकासहकृतं यथोत्तरपदनिर्देशं च, तय. सम(म्√अ)र्धि > समर्धयित्वा इति च अर्धयित्वा सम्° इति च ।

५. स्वर-प्रकरणम्

(क) आधारग्रन्थीयं स्वराङ्कनम्

यथोपलम्भमेतद्ग्रन्थप्रकृतविभागीयाऽऽधारग्रन्थानां मध्ये सप्तसु तावत् सामग्र्येण स्वरोऽङ्कितो भवति । त एत ऋग्वेदो माध्यन्दिन-यजुर्वेदः काण्व-यजुर्वेदस्तैत्तिरीय-यजुर्वेदो मैत्रायणीय-यजुर्वेदः कौथुम-सामवेदः शौनकीया-

---

[1] एतान्यव्ययानि सर्वाणि तैत्तिरीये पदपाठे, पदपाठान्तरेषु च इव-व्यतिरिक्तानि, पृथक्-पदतया पठयन्ते।

ऽथर्ववेदश्च सन्ति । अपरेषां मध्ये तु खिलसूक्तेष्वंशतः काठक-यजुर्वेदे च क्वचित् क्वचित् स्वराङ्कनमुपलभ्यते । कपिष्ठल-कठ-यजुर्वेदस्य जैमिनीय-सामवेदस्य चाऽद्यावधि निःस्वरमेव संस्करणमभूत् ।

(ख) रेखीयो गम्यः प्रकारः

१. ऋग्वेदे तैत्तिरीय-यजुर्वेदे चोदात्तो नाम मुख्यः स्वरः स्वतोऽनङ्कितः सन्नन्यतोऽधोरेखितप्रागनुदात्ततोऽन्यतश्चोर्ध्वदण्डित-स्वरितितोत्तराऽनुदात्ततो विज्ञप्तो भवति, तय. अग्नये । स्वरितोत्तरवर्त्यनुदात्तमात्रमप्याऽधोरेखितोदात्त-स्वरितान्यतरोदयानुदात्तमनङ्कितं भवति, तय. अग्निमीळे पुरोहितम् (ऋ १, १, १) इत्यत्र पु° इत्येतद्वैपरीत्येन °ळे इति । अस्य खलु स्वरितोत्तरस्याऽनङ्कितस्य सतोऽनुदात्तस्योदात्ततयाऽऽभासो मा भूदित्यर्थं स्वरितस्य च तदुपरितनस्योदात्तस्य च मध्ये संकेतविशेषौ स्थाप्येते । तथाहि । यदा स्वरितो ह्रस्वो भवति, तदा १ इति, यदा चाऽसौ दीर्घस्तदा तस्मिन् स्वयमप्यधोरेखिते सति ३ इति, तय. अप्स्व१न्तः (ऋ १, २३, १९), क्व३दानीम् (ऋ १, ३५, ७) । उदात्त-स्वरितान्यतरोदयोऽनुदात्तोऽधोरेखितो भवतीति सूचितमिवाऽधस्तात्, तय. अग्निम् कन्या । मन्त्राऽर्धादौ वा वाक्यादौ वा वर्तमानमनुदात्तमात्रमङ्कितं भवति, तय. अनुकामम् (ऋ १, १७, ३) ।

२. अयमङ्कनप्रकारः शौनकीयाऽथर्ववेदे माध्यन्दिन-यजुर्वेदे काण्व-यजुर्वेदे यथामूलकोशं कपिष्ठलकठ-यजुर्वेदे चाऽपि लब्धप्रचारोऽभूत् । एवमपि तावद् उदात्ताऽनुदात्तयोर्विषये सामान्ये सत्यपि स्वरितस्य विषये सन्त्येव बाह्वृचतैत्तिरीयेतरग्रन्थीयाः केचिद् विशेषाः, तथाहि—

(अ) शौनकीयेऽथर्ववेदे स्वरितादुपरि ʃ इति संकेतो भवति, तय. वीर्यंʃम्, सर्वा ह्यʃस्मिन् (११, ८, ३२), ज्येष्ठवरोʃऽभवत् (११,८,१) । उदात्तादुपरितनः स्वरितस्तु बाह्वृचवत् साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. तं व्यूर्णुवन्तु सूतवे (१,११,२) । उदात्ते परतो ह्रस्वात् स्वरितादूर्ध्वदण्डितात् सत उपरि १ इति संकेतो भवति, तय. अप्स्व१न्तः (१, ४, ४) । तस्यैव दीर्घस्य सतस्तु संकेतो बाह्वृचनिर्विशेषो भवति, तय. विकेश्यो३ विघ्नताम् (१, २८, ४) ।

(आ) माध्यन्दिन-यजुर्वेदे ∟ इत्येतेनाधो-दीर्घहस्तकेन स्वरितः साधारण्येन संकेत्यते, तय. दिवीव (६, ५), वीर्यमसि (१९,९), आस्येन (२, ११) । उदात्ते परतस्त्वसावधस्त्रिशूलकेन संकेत्यते, तय. वीर्यं मयि (१९,९), अप्स्वन्तः (९,६) योऽस्मान् (१, २६) । यदा तावत् स्वरितोदात्तयोर्मध्ये विरामो व्यवधत्ते, तदाऽधोदीर्घहस्तकस्यैवोत्सर्गो भवति, तय. वरूथ्यः । वसुः (३,२५) । यजुरादौ वाऽर्धर्चादौ वा वर्तमानश्चोदात्तादुपरितनभूतश्च स्वरितस्तु साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. त्र्यम्बकं यजामहे (३,३०), अव देवं त्र्यम्बकम् (३,५८), उर्व्या व्यद्यौत् (१२,१) ।

(इ) काण्व--यजुर्वेद उदात्ते परतः स्वरितमात्रमधोरेख्यत इत्येव विशेषः[1], तय. अप्स्वन्तः (१०, २,३), योऽस्मान् (१, ९, ४) प्रसवेऽश्विनोः (१,३,६) ।

(ई) कपिष्ठलकठ-यजुर्वेदेऽन्यथा सर्वथा काण्व-यजुर्वेदेन स-प्रक्रिय एव वर्तमान उदात्तोदयोऽधोरेख्यमाणो ह्रस्वस्वरितो दीर्घतामप्यापाद्यत इत्यस्त्येवाऽणीयान् विशेषः, तय. उर्वान्तरिक्षम् (१,२), अप्स्वान्तः (४८,४) ।

---

[1] अस्मदीये मूलकोषे माध्यन्दिनप्रकारीयः संभेदोऽपि लक्ष्यते । एतच्छाखीयत्वेनाऽनुदात्तभूमिस्वरितीयस्याऽधोवर्तुलकस्योपलम्भोऽपि परैः सूचितो भवति (तु. ZDMG ४९, १५१) ।

(ग) संख्याङ्कीयः सिद्धः प्रकारः

सामवेदे मूर्धन्यसंख्याऽऽत्मको विभिन्नः किल सिद्धः प्रकारः प्रवर्तते । एतदीया मुख्या विशेषा इमे सन्ति[1]—

१. सामान्येनोदात्तस्वरितानुदात्ता यथाक्रमं मूर्धन्यस्थितिभिः १, २, ३ इत्येताभिः संख्याभिः ससंकेता भवन्ति तय. अ३ग्निं वे३ः (१, २१) ।

२. परंपरिताऽनेकोदात्तमध्ये प्रथम एव लब्धसंकेनो भवति, तय. आ१ तु (१, १६७), स्३पार्हा२१ तद् आ (१, २०७), न१ हि (१, २४१) ।

३. आवसानिक उदात्तः १ इत्यस्य स्थाने २ इत्यनेन संकेत्यते, तय. व३यं२म् (१, १४) ।

४. आवसानिकपरंपरिताऽनेकोदात्तमध्ये प्रथम एव नान्तरीयोक्तपूर्वया दिशैव च संकेत्यते, तय. म३हा२९ हि षः (२, ९६), उ३तं२ द्याम् (२, १५६), ना२न्यं त्वत् (२, ३३४) ।

५. अनुदात्तव्यवहितयोरुदात्तयोर्मध्ये प्रथमः २ इत्यनेन संकेत्यते, तय. अ२ग्न३ आ१ या२हि (२,१०) ।

६. यदा परंपरिताऽनेकोदात्ताऽनुग उदात्तोदयोऽनुदात्तो भवति, तदा परंपरितप्रथम उदात्तः २उ इत्येवं संकेत्यते, परश्च १ इत्येवम्, तय. शं२उयो३र१भिं (१, ३३) व३ना२उ त्वं यन्मा३तृ१ः (१, ५३) ।

७. परंपरितानेकोदात्ताऽनुगः स्वरितः २ इत्यस्य स्थाने २र इत्येवं संकेत्यते, तय. नि१ होता२र (१, १), नि१र्गा अ२रकृन्तत (१, ५८५) ।

८. यदा उदात्तभूमिः स्वरित आवसानिको वाऽनुदात्तोदयो वा भवति, तदाऽसौ २र इत्येवं संकेत्यते, तय. उ३कक्थ्य२रम् (२, १११६), मनु३कष्ये२रभिः (१, ७९), नीव२र (२, १००६), दे३क२व्ये२रतु (१, ५६) ।

९. उदात्तोदय उदात्तभूमिः स्वरितः २ इत्येवं संकेत्यते प्लुतिं चाऽऽपाद्यते, तय. पा३ह्यू२ ३ तं२ द्वि३ती१ये२या (१, ३६), अ३भ्या२ ३ दि२शं३ः सू१रं२ः (१, १२८) ।

१०. उदात्त-स्वरिताऽन्यतरोदयपरंपरिताऽनेकाऽनुदात्तमध्ये चरम एव संकेत्यते, तय. समु३द्र१२म्, इन्द्रा३भ्या२ ३ दि२श३ः (१, १२८) ।

११. स्वरितस्याऽनुगतया वर्तमानमनुदात्तमात्रं न संकेत्यते, तय. चि३त्रं१ राधो२र अमर्त्य (१, ४०) ।

१२. आवसानिकाऽनुदात्तोदयान्यतरस्वरितोदयोऽनुदात्तः ३क इत्येवं संकेत्यते (इह तु. अधस्तनम् ८मीयमुदाहरणम्) ।

(घ) प्रथमः प्राक्तनो रेखीयः सिद्धः प्रकारः

अथ यो मुख्यस्योदात्त-स्वरस्य साक्षादिव संकेततः सिद्धंभावुकः प्राक्तनो रेखीयः प्रकारो मैत्रायणीय-यजुर्वेदे, काठक-यजुर्वेदे, पैप्पलादाऽथर्ववेदे चोपलभ्यते, स एवात्र संगृह्यते—

१. मैत्रायणीय-यजुर्वेदे काठक-यजुर्वेदे चोदात्त ऊर्ध्वदण्डयते, तयः अग्निः ।

२. उदात्तभूमेः स्वरितस्य कृते चोभयत्राऽधोभुग्नकः ⌞ इति सामान्यः संकेतो भवति, तय. दि॒वीव (मै १, २, १४), व्यसृपः (काठ ७, १२), शुण्ठोऽधि° (मै २, ६, १३), क्व ।

---

[1] उदाहरणीयस्थलसंकेताः कौथुमसामवेदीया भवन्ति ।

३. मैत्रायणीय-यजुर्वेदे सन्नतरो[1]ऽधोरेख्यते (तय. अ॒ग्नि-), काठक-यजुर्वेदे चासावधोदण्डेन संकेत्यते[2], तय. अग्नि- ।

४. उदात्तोदयस्य स्वरितस्य विषयेऽपि चैतयोः शाखयोर्मध्ये भवत्येव कियानपि वि-संवादः । तथाहि । मैत्रायणीयाः ३ इत्यङ्कं ततः पुरस्तात् प्रयुञ्जते, कठाश्च तं स्वरितमेव काण्वसाधारण्येनाऽधोरेखयन्ति[3], तय. प्र॑सु॒३॑वे॒-ऽश्विनोः (मै १, २, १५), वैतु. प्रसु॒वेऽश्विनोः (काठ २, ९) ।

५. स्वरितीयह्रस्व-दीर्घ-भेदप्रयोजितस्तु नेहोभयत्र कोऽप्यवान्तरविशेषो भवति ।

६. मैत्रायणीया अनुदात्तभूमेः स्वरितस्य कृते सामान्येन तिरोरेखा प्रयुञ्जते, तय. धि॑यः ।

७. सन्नतरोदयत्वे त्वस्याऽनुदात्तभूमेः स्वरितस्य कृते त ऊर्ध्वत्रिपुण्ड्रकं प्रयुञ्जते[4], तय. प्र॑थु॒मः॑, प्र॑सु॒३वे॒-ऽश्विनोः (मै १, २, १५) ।

८. कठा अनुदात्तभूमेः स्वरितस्य कृते सामान्येनाऽधोबिन्दुना निर्वाहं पश्यन्ति[5], तय. धि॑यः ।

९. पैप्पलादाऽथर्ववेदेऽप्युदात्तीय ऊर्ध्वदण्डः प्रयुज्यते सन्नतरश्च काठक-यजुर्वेदवदधोदण्डेन संकेत्यते च, तय. दाता॑ ।

१०. यत्तत्राऽनुदात्तभूमिः स्वरितोऽधोबिन्दुना सनाथ्यते तदपि काठकेन सामान्यमावहति, तय. का॑मः ।

११. माध्यन्दिन-यजुर्वेद-सामान्येन च मैत्रायणीय-काठकयजुर्वेद-भेदेन च तत्रोदात्तभूमिः स्वरितः साधारण्येनाऽधोदीर्घहस्तकेन द्योत्यते, तय. न्यक्, शरव्या या॑ (१४, २, ७), तन्वा शंतमया (१४, २, ८) ।

१२. स्वरितादुपरितनस्योदात्तस्य यथावदूर्ध्वदण्डप्रहात् तस्य स्वरितस्य कृते विशिष्टतरं संकेतान्तरं नाऽपेक्ष्यते ।

१३. स्वरितादुपरितनस्याऽनुदात्तस्य त्वनुदात्तभूमिस्वरितवदुपचार इष्यते यावताऽसावधोबिन्दुना सनाथ्यते, तय. आस्याय (१६, १०४, ६) ।

(ङ) द्वितीयः प्राक्तनो रेखीयः सिद्धः प्रकारः

काण्व-माध्यन्दिनीययोः शतपथ-ब्राह्मणयोः केषुचिद् ग्रन्थान्तरेषु (तु. O. काशब्रा. भू. पृ. ९) चाऽपरः खलु रेखीयः सिद्धः प्रकारो लब्धप्रतिष्ठो भवति । इमे तावदेतदीया विशेषा भवन्ति—

१. अत्रोदात्तोऽधोरेख्यते[6]ऽनुदात्तश्चाऽनुदात्तभूमिः स्वरितश्च नाऽङ्क्यते, तय. अग्नि॒ना ।

२. उदात्तोदय उदात्तो नाऽङ्क्यते, तय. केतपूः कु॒तम् (५, १, १, १६)[7] ।

---

[1] सन्नतरो नामोदात्तस्वरितान्यतरोदयोऽनुदात्तः प्रसिद्धो द्रष्टव्यः ।

[2] Sch. त्वियमधोरेखा न प्राऽयोजि । अत एवेहाऽप्युदाहरणान्तरेष्वेतदप्रयोगो द्रष्टव्यः ।

[3] Sch. त्वस्या अधोरेखायाः स्थान ऊर्ध्वबुध्नितं काकपदकं (Λ) प्रयुङ्क्ते ।

[4] मैत्रायणीयानां पदपाठ उक्तपूर्वो बाह्वृचः प्रकारो लब्धप्रतिष्ठोऽभूदित्यपरो विशेषोऽप्यत्र वैचित्र्यैकवृद्धिकरो भवति ।

[5] Sch. अनुदात्तभूमिं स्वरितं नैव संकेतयति । सात. तु मूलोक्तस्थितिद्वयनिर्वाहाय यक्र. अधोहस्तकं (ᒪ) चाऽधस्त्रिशूलकं (ᴗ) च प्रयुङ्क्ते ।

[6] तु. O. काश. भू. पृ. ९ यत्र भाषिकस्वरस्य स्वरूपत आलोचनायां प्रवृत्तायां पुरातन उदात्तः कालेनाऽनुदात्ततां गत इत्यभिप्रायः परकीयो वादः प्रयुक्तो भवति ।

[7] एतत्खण्डोदाहरणीयस्थलसंकेताः माश. द्र. ।

३. परंपरितानां सतां बहूनामुदात्तानां मध्ये चरम एवाङ्क्यते, तय अग्निर्हि वै धूर॒थ (१, १, २, ९)।

४. उदात्तभूमि-स्वरितस्य संकेतार्थं तदुदयमक्षरमधोरेख्यते[1], तय. वी॒र्यम् ।

५. एवं तावदुदात्तभूमि-स्वरितोदयेऽक्षर उदात्ते सति तदीयाऽधोरेखा तस्य चोपरितनस्य स्वरितस्य च समानं ग्राहिका भवति। एवं च स्थिते तदुदयमुदात्तान्तरं चेद् भवति, तर्हि तन्नाङ्क्यते, तय. यज्ञो वै॒ स्वः (१, १, २, २१), मानुषं ने॒द् व्यृद्धम् (१, ७, २, ९), वैतु. इ॒ति॒ सैषा (१, ४, १, २६) यत्र तिकारोऽनुदात्तः सन्नात्मोदयोदात्तेकारीयाऽधोरेखाया अन्यथासाधने प्रयोजको न भवति ।

६. उदात्त-स्वरिताऽन्यतरोदयस्य स्वरितस्य तूक्तपूर्वः संकेतो न व्याहन्यते, तय यज्ञो वै॒ स्वर॒हः (१, १, २, २१), दैवा वै॒ स्वर॒गन्म (१, ९, ३, १४), इ॒ति॒ सै॒षैतम् (१, ४, १, २६)।

७. कण्डिका-ब्राह्मणान्यतराऽवसानीय उदात्तः कण्डिका-ब्राह्मणान्यतराऽऽद्य उदात्ते परतस्त्रिभिरधोबिन्दुभिः संकेत्यते[2], तय. देवत्रा ॥ स॒ः (५, १, ४,७उ)।

८. उदात्तो वाऽनुदात्तो वाप्यावसानिकः सन् स्वरिते परत एवमधोबिन्दुत्रिकेण संकेत्यते, तय. इ॒ति ॥ तेऽविदुः (३, ४, ३, ७उ) प्रतिप्रस्थाता ॥ सोऽध्व॰ (४, २, १, १३ उ)।

९. यदाऽऽवसानिकस्याऽपि सतोऽक्षरस्य परेणाऽक्षरेण संहिते पाठे सति स्वरितः संभवति, तदा तदुदयस्योपान्त्यस्याऽक्षरस्यैवमधोबिन्दुत्रयेण संकेतो भवति, तय. एव । ए॒त॒न् (३, ४, २, १३)।

१०. अङ्कितस्य सत उदात्तस्याऽनुनासिकतां प्राप्तावनुनासिकचिह्नमप्यधोरेख्यते, शत॒ꣳ-शतꣳ ह (३, ४, ३, १८); वैतु. यज्ञꣳ स॒मभरन् (३, १, ४, ४)।

(च) एतत्कोषीयो रेखीयः सिद्धः प्रकारः

१. एवं तावद् यत्र कुत्रचित् किंचित् सामान्यमपि बिभ्राणेषु प्रायेण त्वन्योन्यं नितरामिव विशिष्यमाणेष्वेव पुरातनेषु बहुषु स्वराङ्कनप्रकारेषु विद्यमानेष्वपि कथमिव सर्वशाखीयसौवरस्थितिर् नाम केनाऽपि शाखासर्वस्वसाधारणतां भजमानेन सता प्रकारविशेषेण युगपदेव हस्तामलकीक्रियेतेत्येवमभिप्राया खलु प्रक्रियमाणस्य सतोऽस्य समस्तवैदिकवाङ्मयस्य प्रातिनिध्यमिव कुर्वाणस्य चैतिहासिकदृष्ट्या तदीयतुलनात्मकाऽध्ययनमधिकृत्यौपयिकतां बिभ्राणस्य च कोषस्य बलवत्यपेक्षाऽभूत् ।

२. अस्याश्चाऽपेक्षायाः पूर्त्यर्थं यः सम्यग् विचारितः सन् पुराणानां प्रकाराणां सारायमाण इव प्रकारविशेषोऽत्र लब्धप्रवेशो भवति, स सर्वेषां प्रेक्षकाणां प्रकाममभिमतः सन् सुकरत्वाच्च सुग्रहत्वाच्चाऽपि सर्वत्र भविष्यति प्रकाशमेष्यत्सु वैदिकग्रन्थीयसंस्करणेषु चरितार्थ्येत ।

३. अस्मिंस्तावत् प्रकारेऽनुदात्तमात्रमनङ्कितं भवति। अनुदात्तो ह्युदात्ताऽभावस्य संज्ञा भवति। अस्य नीचैस्त्वं नामाऽऽपेक्षिको धर्मो भवति। उदात्त एव किल मौलिक आर्यभाषीयः स्वरो भवति। तदपेक्षयाऽनुदात्तो नीचैरुच्चार्यते। यदाऽयमुदात्तोदयो भवति, तदा भूयोऽपि नीचैर्गत इव लक्ष्यमाणः सन् सन्नतर इत्युच्यते। यदा चायमुदात्ताऽनुगो भवति, तदाऽस्मिन् सोपानक्रमिकस्य सतः स्वराऽवरोहस्य लक्ष्यमाणत्वादाद्यंशत उदात्तधर्मतायाः समावेश इव भवति, तेन चाऽयं समाहाररूपः सन् स्वरित इत्युच्यते। छायारूपस्त्वयं भवति। न ह्यस्या-

---

[1] web. अत्राऽधोरेखाद्वयं प्रयुक्तं द्र. ।

[2] web. तावदेषा स्थितिर्द्वाभ्यामधोबिन्दुत्रिकाभ्यां संकेत्यते ।

ऽनुदात्तभूमेः सतः काऽपि प्रागुदात्तस्वतन्त्रा सती प्रातिस्विकी स्थितिर्भवति । तथा ह्युदात्तान्तरोदयत्वे सत्ययमनुदात्त एव सन् सन्नतरतामुपगतोऽनुदात्त एव पुनर्भवति । एवं तावच् शुद्धो वा सन्नतर-स्वरिताऽन्यतरत्वोपाधिको वाऽनुदात्तः पूर्वोत्तरान्यतरपार्श्ववर्तिनः सन्नतर-च्छायास्वरिताऽन्यतरव्यवहितस्य वा नान्तरीयतया स्थितस्य वोदात्तस्यैव स्थितिलक्षकमात्रतामनुप्राप्तः संस्तदीयाऽङ्कनत एव स्वतःसिद्धविज्ञप्तिकयथायोगविभिन्नोक्तपूर्वावान्तरस्वरूप इति कृत्वैव नैतदीयाऽन्यथासिद्धाङ्कनगौरवमिहाऽऽद्रियते ।

४. यदधस्तादुदात्तो मौलिकस्वर इति कृत्वाऽङ्कनार्हत्वेन प्रत्यपादि, तत्र खलूदात्तभूमेः सतोऽभिनिहित-प्रश्लिष्ट-क्षैप्र-जात्याऽन्यतमत्वेन प्रातिस्विकस्थितिमतो वास्तविकस्य स्वरितस्याप्यङ्कनार्हत्वस्य समावेशोऽभिप्रेतो भवति[1] । एवं तावदुदात्तश्चोदात्तभूमिः स्वरितश्च द्वावेव स्वराविह पार्थक्येनाऽङ्कनमर्हत इति कृत्वा पुरातनानामुक्तपूर्वाणां संकेतानामेव मध्याद् ऋग्वेदे, तैत्तिरीय-यजुर्वेदे, तैत्तिरीय-ब्राह्मणे, तैत्तिरीयाऽरण्यके, तैत्तिरीयोपनिषदि, काण्व-यजुर्वेदे, कपिष्ठल-कठ-यजुर्वेदे चैकान्तिकतया, माध्यन्दिन-यजुर्वेदे, शौनकीयाऽथर्ववेदे च यथास्वोक्तपूर्वप्रक्रियं पर्याप्ततया, स्वरितसंकेतत्वेन प्रयुक्तपूर्वत्वादूर्ध्वदण्डः (=अ॑) एव चोदात्तभूमिस्वरितस्य, शातपथप्रसिद्धिरधोरेखा (= अ॒) चोदात्तस्य संकेतौ निर्धारितौ भवतः[2] ।

५. ये चैतद्ग्रन्थीय-स्वराङ्कनीया व्यावहारिका विशेषा भवन्ति, त इमे संगृह्योल्लिख्यन्ते—

(क) अगतिका वा सगतिका वा मूलधातवश्च, क्विब्-णिजन्यतरान्ता नामधातवश्च तदीयविभिन्नस्वराणां सतां रूपाणामसंभिन्नं संकेतनं सुकरं स्यादिति स्वरतो नाङ्क्यन्ते, तय. √अक्ष् (वेधने), √अक्ष् (व्याप्तौ), अति√मुच्, अखल्ली√कृ, √अव् > √ओम्, अ॒न्त- > √अन्ति ।

(ख) नामधात्वन्तराणि तु स्वरतः संकेत्यन्ते (तु. भू. ४, २, क, ७, अ), तय. अ॒घ- > √अघायु॒ ।

(ग) तिङन्तानि रूपाणि स्वरतः संकेत्यन्ते, तय. √अक्ष् (वेधने) > अक्ष्णुते॒ ।

(घ) संनिहितपदान्तरनिमित्तप्रयोजितनिघातानि तिङ्-रूपाणि स्वरतो न संकेत्यन्ते[3], तय. √अक्ष् (वेधने) > अक्ष्णुयात् ।

(ङ) अनङ्कितस्वर-संस्करणेभ्यो ग्रन्थेभ्यः संगृहीतानि सन्ति तिङ्-रूपाणि तदीयशब्दान्तरसामान्येनाऽनङ्कितान्येव ध्रियन्ते, तय. √अज् > अजामसि, अजन् ।

(च) यदाऽङ्किताऽनङ्कित-स्वरेभ्य उभयेभ्यो ग्रन्थेभ्यस्तिङ्-रूपाणि संगृह्यन्ते, तदाऽनङ्कितस्वर-ग्रन्थीयानि तिङ्-रूपाणि यथाऽङ्कितस्वरग्रन्थीयस्वरवच्छ्रुति[4] निर्दिश्यन्ते, तय. अनु √ध्व(ध्वं)स् > अनुदध्वसे॒ ।

(छ) अङ्कितस्वर-ग्रन्थीयं सुब्योगीयं वाऽव्ययं वा कृन्मात्रं स्वरवद् निर्दिश्यते, तय. √अद् > अ॒तव-अ॒तिथि-, √अद् > अ॒त्तवे, अ॒त्तुम् ।

(ज) अनङ्कितस्वर-ग्रन्थीयः कृद् निःस्वरं निर्दिश्यते, तय. अ॑ग्नि-मेदिन्–, अग्नि-यानी- ।

---

[1] मूलतो जात्य-क्षैप्रयोरभेदो द्रष्टव्यः (तु. पृपृ. ५१०^{l}, ६२५^{a}, ६२६^{m}) ।

[2] तस्मिंस्तस्मिन् पुराणे वा नूतने वा सौवरे संकेते प्रतिनियतायाः स्वरविशेषसंकेतनविषयायाः स्वाभाविक्याः शक्तेरभावाद् यथासमयं शक्तिविशेष उपाधीयत एव ।

[3] अस्य ग्रन्थस्य यथाश्रुतानुक्रमणस्वरूपताया एतदीयलक्षणशास्त्रस्वरूपताऽतिरेकित्वादित्यभिप्रायः ।

[4] अपि तानि स्वरतो वस्तुतस्तथा स्युर्न वा स्युरित्यस्य तत्तन्मूलीयवाक्यस्वतन्त्रविचाराधीनत्वादस्मिन् विषयेऽत्रत्यो निर्देशोऽप्रमाणं भवति ।

(झ) अङ्किताऽनङ्कितस्वरेभ्य उभयेभ्यो ग्रन्थेभ्यः संगृह्यमाणः कृद् यथास्वरवद्ग्रन्थीयश्रुति निर्दिश्यते[1], तय. अंशु- ।

(ञ) व्युत्पत्त्यौपयिकतयोपकल्पितानां कृतां स्वरनिर्देश औपकल्पनिको भवति, तय. *अन्तः-पर्शु- ।

(ट) यदा व्युत्पादनप्रयोजितः सन् स्वर उपकल्पनाया विषयो भवति, तदा स्वरवदक्षरं स-तारकं निर्दिश्यते, तय. ?अच्छुरा- ।

(ठ) यदौपकल्पनिकस्य सतः कृतो विषये सौवरी स्थितिर्दुर्विनिगमना भवति, तदाऽसौ निःस्वरं निर्दिश्यते, तय. √अट् > अट्णार- > आट्णार- ।

(ड) निघातमात्रवन्ति सर्वनामानि निःस्वरं निर्दिश्यन्ते, तय. अस्मद्- > न., *ई-, *सी-, एन-, सम-, त्व- ।

(ढ) निहताऽनिहतोभय-प्रयोगवन्ति सर्वनामान्युभयथा पृथग् निर्दिश्यन्ते, तय. इदम्- > अस्मात्, अस्मात्- ।

(ण) अलुक्-समासे पूर्वपदायमानानि चाऽवान्तरप्रातिपदिकीक्रियमाणानि च सन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अग्र- > अग्रे ।

(त) द्वैस्वर्येण श्रूयमाणाः समासास्तथैव निर्दिश्यन्ते, तय. बृहस्पति-, वनस्पति-, अग्नी-वरुण- ।

(थ) यथा प्रातिस्विकप्रातिपदिकस्वरवन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अंहस्- > -हसः (=अंहसः) ।

(द) हल्पूर्वोदात्तयण्भाव-प्रयोजितः[2] सुब्-उदात्तो न निर्दिश्यते, तय. ऊति- > -त्या (=ऊत्या) ।

(ध) यदा सुपि परत उदात्तयोर् इवर्णोवर्णयोः स्थानेऽन्यतः अय् इति वा इय् इति वाऽन्यतश्च अव् इति वा उव् इति वा भवतः, तदा सुब्-रूपं निःस्वरं निर्दिश्यते, तय. अग्नि- > -ग्नयः (=अग्नयः), धी- > धियः (=धियः), अंशु- > -शवः (=अंशवः), अग्रू- > -ग्रुवः (=अग्रुवः) ।

(न) उदात्तयण्भाव-प्रयोजितः सुप्-स्वरितो यथावद् निर्दिश्यते, तय. १अरुणी- > -ण्यः, अश्वतरी- > -र्यः ।

(प) यदा प्रातिपदिकनिघात-प्रयोजकः सुप्-स्वरः प्रवर्तते, तदाऽसौ यथावद् निर्दिश्यते, तय. अघायत्- > -यते, १अप्- > अपः, २अप्- > अद्भिः ।

(फ) उदात्तनिवृत्तिप्रयुक्तः सुप्-स्वरो यथावद् निर्दिश्यते[3], तय. असन्- > -स्नः, अस्थन्- > स्थ्नः ।

(ब) आद्युदात्त-निघातोभयविधमामन्त्रितं पदं स्वीयसंकेतविशेषभूत-वर्तुलकीयाया अधोरेखाया भावाऽभावाभ्यां यथायोगं विविच्य निर्दिश्यते, तय. १अक्ष- > -०क्ष, २अक्ष- > -०क्षाः, आदित्य- > -०त्य ।

(भ) निःस्वरं निर्दिश्यमानानि प्रातिपदिकान्यनुबध्नन्ति सुब्-रूपाणि कैमुतिकेनैव निःस्वरं निर्दिश्यन्ते, तय. अ-कृतपूर्व- > -र्वम्, अस्मद्- > नौ, नः ।

---

[1] अप्यस्वरवद्ग्रन्थीयोऽनेकाच् कृद् वस्तुतो यथानिर्दिष्टस्वरो भिन्नस्वरो वेत्यत्राऽयं निर्देशोऽनैकान्तिको भवति।

[2] वैतु. पृ. ६६१ᵃ (तु. उपरिष्टात् फ च) ।

[3] तु. पृ. ६६१ᵃ यदन्वधस्ताद् (द) इत्यत्र प्रत्तमुदाहरणमप्यस्यैव नियमस्य विषयो भवति ।

(म) साम्रेडितानां सुब्-रूपाणां नियताऽऽम्रेडितांशनिघातानां सतां निर्देश उक्तपूर्वसुब्रूपीयनिर्देश-सामान्यमेव बिभर्त्ति, तय. अंशु॒- > -शुः-शुः (=अंशु॒ः-अंशुः) ।

(य) अव्यय-मात्रं यथास्वरश्रुति निर्दिश्यते, तय. अ॒नु, अभि॒, ए॒तवै॒ ।

(र) सस्वरनिःस्वरोभयविधश्रुतिकमव्ययं यथायथं पार्थक्येन निर्दिश्यते, तय. कु॒म्, कम्, यु॒था, यथा ।

(ल) निहतमात्रस्वरूपमव्ययं तथैव निर्दिश्यते, तय. इव (तु. भू. ४, ४, च, ४), उ, घ ।

(व) सस्वरनिःस्वरोभयविधश्रुतिकं समासाङ्गंभावुकमव्ययं यथायथं विविच्य निर्दिश्यते, तय. अति-√पू > अ॒तिपवते, अतिपु॒वते, अप√गु(> गू)ह् > अ॒प-गूळ्ह-, अप-गू॒हमान- ।

६. स्थल-प्रकरणम्

१. प्रतिनिङन्तसुबन्ताऽव्ययनिर्देशाऽनुपदं यथाश्रुति समग्राणि स्थलानि निर्दिश्यन्ते । तत्र तत्तद्-ग्रन्थोद्देशतस्तावदयं निर्देशक्रमो भवति—

(क) ऋग्वेदे—१. ऋ., २. खि. ।
(ख) यजुर्वेदे—१. मा., २. का.,
३. तै., ४. मै.,
५. काठ., ६. क. ।
(ग) सामवेदे—१. कौ., २. जै. ।
(घ) अथर्ववेदे—१. शौ., २. पै. ।

२. प्रत्युपस्थिते स्थलनिर्देशे प्रथमं तावद् यथाऽपेक्षं ग्रन्थनाम्नः संक्षेपो दीयते । तदनु नान्तरीयतया ग्रन्थीयप्रधानाऽवान्तरविभागप्रदर्शिकाः संख्या दीयन्ते । आसां च मध्ये या प्रथमा भवति सा प्रधानविभागीया भवति, अवान्तरविभागीयास्त्वितरा यास्ततश्चाऽन्योन्यं च प्रार्धविरामेण व्यवच्छिद्यन्ते । संख्यानामन्ते च विरामो दीयते, तय. अकन्तः पै १, ४३, २.

३. यदा स्थलविशेषनिर्देशमनु स्थलान्तरीयो निर्देशः क्रियते, तदा ययोः कयोरपि द्वयोः स्थलाङ्कनमात्र-योर्मध्येऽर्धविरामो दीयते, तय. अं॒हस्- > -हः ऋ १, ४२, १; २, २३, ४; अंशु॒- > -शून् शौ ५,२०,१०; पै··· .

४. ग्रन्थविशेषीयाऽनेकस्थलानामङ्कन उपस्थिते सति प्रथमायामेव तदीयमात्रायां सर्वास्तत्तद्विभागीयाः संख्या दीयन्ते । उत्तरासु तु तदीयमात्रासु समानाः सतीः प्रधान-मध्यमविभागीयाः संख्या नावर्त्य याश्चरमविभागीयाः सत्यो विभिन्नाः संख्याः स्युस्ता एव निर्दिश्यन्ते, तय. अक्ष्णया॒ तै ५, २, ७, ५^{१}; १०, ४; ५; ३, ५, ३^{१}; < ५, २, ७, ५^{२}; ५, २, १०, ४; ५, २, १०,५; ५, ३, ५, ३^{२};

५. अनेकेषां परंपरितानां स्थलानां निर्देश उपस्थिते सति प्रथमचरमयोः सतोः स्थलयोरेव निर्देशः क्रियते, तन्मध्ये विच्छेदकश्च दीयते, तय. अग्नि॒- > -ग्निम् काठ १६, ८-११; १९, ३^{१}-५^{२}.

६. यदि क्वचिद् मध्यमानां संख्यानामपि विषय उक्तपूर्वप्रकारकं पारंपर्यं निर्देश्यं भवति, तर्हि तासां मध्याद् अप्येवं प्रथमचरमयोः सत्योरेव निर्देशः क्रियते, तन्मध्ये च विच्छेदको दीयते, तय. अं॒हस्- > -हसः शौ ४, २३-२९, १-७.

७. यथा रूपविशेषीयाणां स्थलनिर्देशानामन्योऽन्यमर्धविरामेण व्यवच्छेदो भवति, तथैव विभिन्नरूपीयाणां स्थलसंख्याङ्कव्यूहानामन्योऽन्यमर्धविरामेण व्यवच्छेदः क्रियते, चरमरूपीयचरमस्थलीयसंख्याङ्कादूर्ध्वं च विरामो दीयते, तय. **अंशु-** > -शवः···; -शवे···; -शोः···; ३, १२, ४.

८. रूपविशेषाणां सस्थलानां सतां प्रथमं परंपरितो निर्देशो भवति, तदनु च तत्साधारणस्थलीयाः संख्या दीयन्ते, तय. **अति**^{४}(चर), (अति) **चर** पै ३, ३३, ६; **अत्याशित-** > **-तस्य, -तेन** मै ३, ६, २.

९. यदा रूपविशेषस्य स्थलविशेषीया विशेषसंख्याकाऽऽवृत्तिः सूचनीया भवति, तदा तदङ्कः स्थलाङ्कशीर्षण्यतया निर्दिश्यते, तय. **अंहूरण-** > **-णम्** काठ १०, ९^{२}; **अग्नि-** > **-ग्ने** काठ १८,३^{३}; ४^{८}; १६^{१४}.

१०. तत्तद्ग्रन्थीयतयाऽन्योन्यं प्रायेण भूयोविशिष्टानि सन्ति तत्तत्प्रधान-मध्यम-चरमविभागीयानि प्राक्प्रसिद्धानि मण्डलाऽध्यायप्रभृतीनि नामान्युक्तपूर्वप्रकारेणेह संख्याङ्कनमात्रेण निर्वाहसंभवादन्यथासिद्धानीति कृत्वा नोपयुज्यन्ते[1] । अयं तावत्तदीयः स्वरूपतश्च संख्यातश्च परिचयः संग्रहेणोच्यते—

(क) **ऋग्वेदेऽष्टकाऽध्याय-वर्ग-मन्त्रात्मकश्च मण्डलाऽनुवाक-सूक्त-मन्त्रात्मकश्च** चतुष्टयौ सन्तौ द्वौ विभागप्रकारौ भवतः । एतयोर्द्वितीय एव प्रसिद्धतरत्वादिहोपयुज्यते, प्रतिमण्डलं सूक्तानां परंपरितात् संख्यानादनुवाकीयनिर्देशस्याऽन्यथासिद्धत्वात् प्रतिस्थलं संख्यात्रितयस्यैवाङ्कनं च क्रियते ।

(ख) **ऋग्वेद-खिलानि** सूक्त-मन्त्र-प्रविभक्ताऽध्यायपञ्चकात्मकानि भवन्ति । एत एव त्रयो विभागाश्चाऽत्र संख्याप्यन्ते । संहिताऽरण्यं च परिशिष्टं चोभे अपि द्विधा प्रविभक्ते सती यथाक्रमं षष्ठ-सप्तमाऽध्यायतयाऽङ्क्येते । द्वितीय-तृतीय-चतुर्थेष्वध्यायेषु सन्ति कतिचित् सूक्तानि यानि पृथङ् मन्त्रप्रविभक्त-खण्डद्वयात्मकानि भवन्ति । तदीयस्थलाङ्कन उपस्थिते सति सूक्ताङ्कीयशीर्षण्यभूतेन २ इत्यङ्केन द्वितीयखण्डीयताया विवेकेन परामर्शो भवति, तय. **√अस्** (भुवि) > **असि** खि ४, ७^{२}, १^{१} । एवं पञ्चमाध्यायीयसप्तमसूक्तस्थ-खण्डपञ्चकस्य विविक्तः परामर्शः सूक्त-मन्त्राङ्कमध्यीयतया धृतेन सताऽङ्कविशेषेण क्रियते[2], तय. **अदिति-** > **-तेः** खि ५, ७, १, २.

(ग) **माध्यन्दिन-यजुर्वेदो** मन्त्रप्रविभक्तचत्वारिंशदध्यायात्मकः सन् संख्याद्वयेन परामृष्टविभागद्वितयो भवति ।

(घ) **काण्व-यजुर्वेदस्य** दशकाऽध्यायाऽनुवाक-मन्त्रात्मकश्चतुर्व्यूढो विभागश्चत्वारिंशतोऽप्यध्यायानां माध्यन्दिन-यजुर्वेदवत् परंपरितसंख्यापनेन त्रिव्यूढः सन् संख्यात्रयेण परामृष्टो भवति[3] ।

(ङ) **तैत्तिरीय-यजुर्वेदीयो** विभागः काण्ड-प्रपाठकाऽनुवाक-खण्डात्मकतया चतुर्व्यूढः सन् चतुर्धा संख्याप्याङ्क्यते[4] ।

(च) **मैत्रायणीय-यजुर्वेदः** काण्ड-प्रपाठक-खण्ड-प्रविभक्ताऽध्यायचतुष्टयात्मकः सन् संख्यात्रयेण परामृष्टत्रिव्यूढविभागो भवति ।

---

[1] तत्तद्ग्रन्थीय-तत्तद्विभागीय-पुष्पिकीयाणां निर्देशानां स्थलाङ्कन उपस्थिते सति यथायोगं केवलाद् ग्रन्थनाम्नो वा विभागविशेष-सहकृतग्रन्थनाम्नो वोपरि **पुष्प.** इति संक्षेपो दीयते, तय. तु. **इठिमिका-, ओरिमिका-** ।

[2] एतद्ग्रन्थीय-प्रकृतखण्डादग्रतस्तावदस्य सूक्तमन्त्राङ्क-मध्यीयाङ्कस्य सूक्ताङ्कीय-शीर्षण्यतयैव स्थितिः संपादयिष्यमाणा द्रष्टव्याः ।

[3] एतद्ग्रन्थीयसामग्रीसंकलनात् पश्चात् प्रकाशं नीयमाने सात. प्रत्यध्यायं मन्त्राणां परंपरितपाठेनाऽनुवाकीयो विभागोऽप्यन्यथासिद्ध इव क्रियते ।

[4] **मैसू.** त्रुटितपाठत्वात् तदीयः खण्डपरंपरितेन त्रिव्यूढोऽपि सन् विभाग इह नाऽनुस्रियते ।

(छ) काठक-चरक-यजुर्वेदः खण्डप्रविभक्त-स्थानकात्मकतया व्यूढः सन् संख्याद्वयेन परामृष्टो भवति । आश्वमेधिकपरिशिष्टीयास्त्रयोदश प्रधानविभागा अपि स्थानकीकृत्य च चत्वारिंशता स्थानकैः परंपरयित्वा च परामृश्यन्ते । एवं तावत् संकलितानि सन्ति स्थानकानि त्रिपञ्चाशत्संख्याकानि संपद्यन्ते[1] ।

(ज) कपिष्ठल-कठ-यजुर्वेदेऽष्टकाऽध्याय-खण्डात्मकतया त्रिव्यूढो विभागोऽध्यायपरंपरितेना[2]ऽन्यथासिद्धीभूताऽष्टकविवेकः सन् संख्याद्वयेनैवेह परामृष्टो भवति[3] । चत्वारिंशोऽध्यायोऽखण्डप्रविभक्तः सन्नेकखण्डात्मकतया सर्वत्र १ इत्येतेन खण्डाङ्केन सहैव निर्दिश्यते ।

(झ) कौथुमसामवेदे प्रथमं तावद् द्वौ विभागौ भवतः । पूर्वार्चिकं चोत्तरार्चिकं च । आरण्य-काण्डं वाऽऽरण्य-संहिता वेति च महानाम्न्यार्चिकमिति च पूर्वार्चिकाऽनुगता परिशिष्टद्वयी भवति । पूर्वोत्तरार्चिकयोः प्रपाठकाऽर्ध-दशति-मन्त्रात्मकश्चतुर्व्यूढो विभागो भवति । पूर्वार्चिकीया षट्-प्रपाठकी प्रतिप्रपाठकयुगलं काण्डव्यवहारेण त्रिकाण्ड्यपि भवति । प्रपाठकानां परंपरितेनाऽन्यथासिद्धस्त्वयं काण्ड-विभागो भवति । यत्तूत्तरार्चिके दशतेः स्थाने सूक्तं व्यवह्रियते तत्तदवान्तरविभागविशेषीयसंज्ञामात्रीयविशेषत्वान्न विशिष्यते । अस्ति तावदुभयमुख्यविभागसाधारणोऽध्याय-खण्ड-मन्त्रात्मकत्रिव्यूढोऽपरोऽपि विभाग-प्रकारः । अस्मिंश्च प्रकार आरण्य-काण्डस्यापि षष्ठाऽध्यायात्मकतया व्यवहारो भवति । अपि चोत्तरार्चिके क्वचित् खण्ड-मन्त्रयोर्मध्यगामितया सूक्तविभागोऽप्युपलभ्यते । इह तावदुक्तपूर्वयोः प्रकारयोः कतरेणचनापि विभागे सति परामर्शिका नितान्तं दुष्करा भवतीति च BC. इत्यत आंशिकं संकेतं गृहीत्वा च पूर्वोत्तरार्चिके यथाक्रमम् १ इति २ इति च संख्याप्य परामृश्येते च, तदुभयीया मन्त्राश्च माध्यमिकविभागाऽन्यथासिद्ध्यर्थं पृथक्-परंपराभ्यां संकल्यन्ते च । अनया दिशोभयार्चिकीयस्थलाङ्कनं द्वाभ्यां द्वाभ्यां संख्याभ्यां साध्यते । एवमारण्य-काण्डम् ३ इत्येवं महानाम्न्यार्चिकं च ४ इत्येवं परामृश्येते । आरण्य-काण्डे दशति-खण्डाऽन्यतरनामको मध्यमो मन्त्रगणात्मको विभागो भवतीति कृत्वा तदीयं स्थलाङ्कनं संख्यात्रिकेण संपाद्यते । मध्यमस्य कस्यचिद् विभागस्याभावाद् महानाम्न्यार्चिकीयं स्थलाङ्कनं तावद् द्वाभ्या संख्याभ्यामेव क्रियते[4] ।

(ञ) जैमिनीय-सामवेदे पूर्वार्चिकमिति प्रथमः, आरण्यं च महानाम्न्यश्चेत्युभयात्मको द्वितीयः, ऊहगानमिति तृतीयः, उह्यगानमिति चतुर्थः, इत्येवं चत्वारो मुख्या-विभागाः सन्तः प्रत्येकं खण्ड-मन्त्रात्मकतया द्विधा प्रविभक्ता भवन्ति । एतदीयं स्थलाङ्कनं च त्रिभिः संख्याभिरभिनिर्वर्त्यते । पूर्वार्चिकीयः खण्डगणात्मकपर्वरूपोऽवान्तरविभागश्चैवं तद्गतद्वितीयपर्वगतोऽपर्वप्रकारकोऽपरोऽवान्तरविभागश्च मुख्यविभागान्तरत्रिकवत् खण्डपरंपरितेनाऽन्यथासिद्धाविव क्रियेते[5] ।

---

[1] मुख्यानां चत्वारिंशत्-स्थानकानां मूलत इठिमिका (< *प्रिथिमिका = *प्रथमिका), मध्यमिका, ओरिमिका (< *अवरिनिका = अवरमिका), याज्यानुवाक्याश्चेत्येवं ग्रन्थचतुष्कतोऽपि विभाग आसीदित्यत्र तत्तद्ग्रन्थसंकेतवत्यः स्थानकीयाः पुष्पिका द्रष्टव्याः ।

[2] भावे क्तान्तं पदं द्रष्टव्यम् ।

[3] काण्ड-प्रपाठक-खण्डात्मकोऽपि विभागोऽस्यां शाखायां कदाचिदादरं लेभ इत्यत्रैतदीयमूलकोशीयं साक्ष्यं भवति ।

[4] इहत्यस्य च मुद्रितसंस्करणमात्रीयस्य च स्थलाङ्कनप्रकारसर्वस्वसंवादनार्थं तु. आचि. १ ।

[5] र. पुरातनविभागीयः प्रकारश्चेहाऽनुस्रियमाणः प्रकारश्चोभावपि प्रदर्शितचरौ भवतः ।

(ट) **शौनकीयाऽथर्ववेदे** द्वौ विभागप्रकारौ प्रवर्तेते । काण्ड-सूक्त-मन्त्रात्मकस्त्रिव्यूढश्च प्रकारः काण्ड-प्रपाठकाऽनुवाक-मन्त्रात्मकश्चतुर्व्यूढश्च प्रकारः । एतयोर्मध्ये प्रथम एव तावदिहानुवर्त्यमानः सन् संख्यात्रिकेण द्योत्यते[1] ।

(ठ) **पैप्पलादाऽथर्ववेदे** च द्वौ विभागप्रकारौ प्रवर्तेते । काण्ड-सूक्त-मन्त्रात्मकस्त्रिव्यूढश्च काण्डाऽनुवाक-[2]खण्ड-मन्त्रात्मकश्चतुर्व्यूढश्च । एतयोर्मध्ये तावत् प्रथम एवेहानुवर्त्यमानः सन् संख्यात्रयेणाऽङ्क्यते । यत्र क्वचिच्च (तु. ३,३७) सूक्तानि मन्त्रतोऽविभक्तानि भवन्ति, तत्र तान्येकमन्त्रात्मकानीति कृत्वा १ इत्येतन्मन्त्रस्थानीयाऽङ्कप्रदानेन संख्यात्रयेणैवाऽङ्क्यन्ते । एवमविविक्तमन्त्रविभागस्थलीयाङ्कन उपस्थिते सति विच्छेदकव्यवहितयोः सतोर्द्वयोर्मुद्रितसंस्करणीययोरङ्कयोर्मध्याद् द्वितीयो विच्छेदकदक्षिणपार्श्वीयोऽङ्क एवेह प्रदर्श्यते (तु. ९,१२,६-७) ।

७. संकेत-प्रकरणम्

इह तावत् निर्देशस्य समूह्यर्थं वैशद्यार्थं वा ये केचन संकेताः प्रायुक्षत, त इमे भवन्ति—

१. ✓ इति **धातुकः**[1] प्रातिस्विकचिह्नतया धातुमात्रेण पुरस्क्रियते, तय. ✓अंह् (गतौ) ।

२. ✓- इति स-विच्छेदको धातुकः प्रकरणत आक्षेप्याऽऽख्यातांशानामुपसर्गाणामुपरिष्टात् प्रयुज्यते, तय. **अति** ✓- ।

३. - इति **विच्छेदकः** प्रातिपदिकमात्रान्ते प्रत्तः संस्तदीयसुब्योगीयतामुपदर्शयति । शब्दमात्रीयाक्षरविशेषस्याऽधस्ताद् दीयमानश्चायं धर्मान्तरमिव बिभ्राणः संस्तत्रोदात्तस्य व्यवस्थितिं सूचयति ।

४. - **इत्यर्धविच्छेदकः** प्रातिपदिकादुपरि नान्तरीयतया निर्दिश्यमानात् संक्षिप्तात् सतो रूपविशेषात् पुरस्तात् प्रत्तः संस्तदीयार्धांशस्य पूरयितव्यतामुपक्षिपति, तय. **अग्नि-** > **-ग्निः**, वैतु. **-ग्निम्** । अयं समासेऽवग्रहत्वेनाऽपि प्रयुज्यते, तय. **अग्रे-ग-** ।

५. । **इत्यूर्ध्वदण्डो** वर्णमूर्ध्नि दीयमानः सन् शब्दविशेषीयैकस्वरस्य सतः स्वरितस्य व्यवस्थितिं प्रदिशति, तय. **अ-कुध्र्यञ्च्-** ।

६. = इति **संतोलः** स्वतः प्राग्वर्तमानस्य सतः स्वत उत्तरवर्त्तिना सता तुल्यत्वं सूचयति, तय. 'तया गत्या' (= तेन प्रकारेण), पृ. १३०^{a} ।

७ + इति **योजकः** प्रकृतिप्रत्ययीयं वा समासावयवीयं वा योगं संकेतयति, तय. ✓**जन्+डः** (पृ. ४०^{b}), **अ+श्वथ-** (पृ. ५८८^{e}) ।

८. → **इत्यभिपुङ्खः** स्वतः प्राग्वर्तिनः सतः स्वोत्तरवर्त्यात्मकतया परिणामं संकेतयति, तय, **अच्छे-(र→)रा-** ।

९. > **इत्यभिकोणः** = →, तय. **अभि>भी** ।

१०. ← इति **प्रतिपुङ्खः** स्वत उत्तरवर्तिनः सतः स्वप्राग्वर्त्यात्मकतया परिणामं संकेतयति, तय. **अधो(<धस्)-अक्ष-** पृ १६१ ।

---

[1] WR. शंपा. इत्येतयोः क्वाचित्कस्थलाङ्कनभेदवतोः सतोः संवादनार्थं तु. आचि. २ ।

[2] मूलकोषे **खण्ड-**>***कण्ड-**>**काण्ड** इति काश्मीरवाचनिकप्रवृत्तिसुलभविकारमध्योऽपपाठो द्रष्टव्यः ।

[1] धातुं संकेतयतीत्यभिप्रायपरस्तद्धितो भवति । एवमुपर्यपि तत्तत्संकेतसंज्ञात्वेन प्रयुज्यमानाः शब्दविशेषा यथावद् बोद्धव्याः ।

११. < इति **प्रतिकोणः** = ←, तय. ३अपु॒स्- (<२अ॒प्-)।

१२. < > इति **कोणयुगं** स्वतः पूर्वोत्तरवर्तिनोरन्योन्यप्रकृतिविकृत्यन्यतरभावं संकेतयति, तय. **अनुडु॒ह्** < > ध्रँ*- (पृ. १९५^{a})।

१३. ऽ इति **वक्रकं** संहिताविषय उत्तरवर्तिनोऽकारस्य पूर्ववर्तिनि सांहितिक आकार एकार ओकारे वाऽन्तर्भावं संकेतयति, तय. वाऽन्यस्य (पृ. १५^{i}); स्वरेऽविशेषः (पृ ५^{b}); भूरिविमृश्योऽयम् (पृ. १५^{i})।

१४. ऽऽ इति **द्विवक्रक**मुत्तरवर्तिन आकारस्य पूर्ववर्तिनि सांहितिक आकारेऽन्तर्भावं संकेतयति, तय. पञ्चम्यर्थस्याऽऽकाङ्क्षितत्वात् (पृ. ६^{b})।

१५ , इति **प्रार्ध-विरामो** यत्र तत्र शाब्दिके वा स्थलीये वा निर्देशे यथापेक्षं लघिष्ठव्यवच्छेदकत्वेन प्रयुज्यते, तय. ✓अस् (भुवि) अ॒स्ति ; अँ*नस्(> ड्, ळ्) ✓वह् (प्रापणे); अ॒ध, अ॒धा; अ॒न्त,न्ता-; अनु, > नू, या॒ज्-।

१६. ; **इत्यर्ध-विराम** एकैकस्याः स्थलाङ्कनमात्राया व्यवच्छेदकतया प्रयुज्यते, तय. अ॒ंश- > -शः ऋ २, १, ४; २७, १.

१७ ··· इति **विराम** एकैकस्य पदसंग्राहकनिर्देशखण्डस्य च समासाभिमुखे संक्षेपान्तरे वा स्थलाङ्के वा परतोऽसत्येकैकस्य संक्षेपस्य चाऽवसाने व्यवच्छेदकतया प्रयुज्यते, तय. अनु ✓दिश्,······१०५., अ॒ंश-···१७.। पा. (वैतु. पाभे.) इति च, अ॒ंश- > -शः ऋ २, १, ४ (वैतु. ऋ.) इति च।

१८. ' ' इति शीर्षण्यं **प्रार्धविराम-प्रतियुगं** स्वमध्यगतं प्रायेणेतिकारेणाऽनुगतं पाठं संकेतयति, तय. '**अक्षान् देवसाधनभूतान् कामयते**' (पृ. १३^{a})।

१९. ० इति **वर्तुलकं** शीर्षण्यतया प्रयोगतः पूर्वोत्तरस्थित्यनुक्रमेणाऽधस्तनीं चोपरितनीं च पूरयितव्यतां संकेतयति तय, **अंशु॒- °शु॒- अन्°** (=**अनंशु॒-**), इदमेव च **वर्तुलकं** यदाऽर्धविच्छेदकस्य च संक्षिप्तस्य सतः सुब्रूपस्य च मध्ये दीयते, तदा तस्य रूपस्याऽऽमन्त्रितभावः सूच्यते, तय. **अंशु॒- > -०शो, अग्नि॒- > -०ग्ने**।

२०. * इति **तारका** यस्योपरि धृता भवति, तस्यौपकल्पनिकत्वं संकेतयति । तत्र ये विशेषा भवन्ति. त इमे सन्ति—

(क) वामपार्श्वतः शीर्षण्या सतीयं शब्दविशेषस्य तदर्थविशेषस्य वोक्तपूर्वं स्वरूपमाचष्टे, तय. ✓*अप् (पृ. ३०७^{e})।

(ख) सस्वरस्याऽक्षरविशेषस्योपरि धृता सतीयं तस्य स्वरस्योक्तपूर्वं स्वरूपमाचष्टे, तय. **अप्सर-द्रुँ*-**, **अ॒*-संयाज्य-**।

(ग) आवसानिक-विच्छेदकस्योपरि धृता सतीयं तत्प्रतियोगिनः सुब्योगीयतायाः उक्तपूर्वं स्वरूपमाचष्टे, तय. **अवस्-*** (पृ. ५५३^{b})।

(घ) अवग्रहस्योपरि धृता सतीयं तस्योक्तपूर्वं स्वरूपमाचष्टे, तय. **अन्तु॒रि-क्ष*-**।

२१. ? इति **प्रश्नकः** शब्द[1]-रूप[2]-ग्रन्थनामसंक्षेपाऽन्यतमीयाद् निर्देशात् पुरस्ताच्च स्थलाङ्कनिर्देशमात्राया

---

[1] धातूनां च व्ययाऽव्ययोभयविधानां प्रातिपदिकानां चैषा सामान्यसंज्ञा द्रष्टव्या।

[2] तिङन्तं वा सुबन्तं वा तत्तत् पदमिह यथास्वप्रकृतिभूतशब्दापेक्षया तत्तद् रूपमित्युच्यते।

उपरिष्टाच्चोपचर्यमाणो यथास्थितस्य तत्तन्निर्देशस्य विषये सामान्यतो वा तत्तद्विशेषतो वा दुरूहता-सांशयिकताऽध्यवसेयकल्पतादिप्रकारकमर्थं संकेतयति । येष्वेतद्विषयभूतेषु तावदस्योपचारो भवति, तानीमानि संगृह्येरन्—

(क) पाठ-स्वरूपे, तय. **अक्षी- > -क्ष्यौ** पै ६, ६, १? ।

(ख) वर्ण-स्वरूपे, तय. **? अंहारि-** ।

(ग) तात्पर्य-स्वरूपे, तय. **? अकन्त-** ।

(घ) अवग्रह-स्थितौ, तय. ?अप्-सर्- ।

(ङ) उपकल्पना-स्वरूपे, तय. ? ✓ ***अराय्** ।

एवं टिप्पणेषु चायं व्यु. मूपा. इत्यादितस् तत्तद्विषयीयात् संक्षेपादुपरि ध्रियमाणस्तत्र तत्र निर्णयाभावं सूचयति ।

२२. ϕ इति संकेतः कृतः पुरस्तादुपचर्यमाणस्तस्य व्यवहितोपसृष्टत्वं भवतीति च स्थलाङ्कीयमात्राविशेषादुपरि ध्रियमाणश्च तत्रैव स्थले व्यवहितोपसृष्टत्वं भवतीति च संकेतयति, तय. ϕ **अप-शोशुचत्-, अप-घ्नत्- > -घ्नन्** ऋ ८, ४३, २६ϕ.

२३. ‡ इति संकेतः शब्द-रूप-ग्रन्थनामसंक्षेपान्यतमीयाद् निर्देशात् पुरस्तादुपचर्यमाणस्तदधिकृतायाः पाठस्थितेर् नित्यं टिप्पणितस्थलस्य सतो बाह्वृचादिग्रन्थान्तरीयश्रुतिविशेषस्याऽपेक्षया भिन्नाऽऽत्मकतां संकेतयति, तय. **अ-जर- > ‡ -रस्य** । स्थलविशेषीयपाठस्थितेरेवंप्रकारतायां सूचयितव्यायां सत्यां तु संकेतोऽयं तत्तत्स्थलाङ्काऽवसानतः क्रियते, तय. **अग्नि-मत्- > -मान्** काठ २३, ११‡ ।

२४. † इति संकेतः शब्द-तद्रूपाऽन्यतरीयनिर्देशविशेषात् पुरस्तादुपचर्यमाणस्तद्गतः श्रुतिसामान्यस्य बाह्वृचमूलकतां सूचयति, तय. **†अज्म-, अज्मन्- > †-ज्म** । यदा तु निर्देशविशेषस्य श्रुतिविशेषीयतयैवैवंप्रकारकता सूचयितव्या भवति, तदा तच्छ्रुतिविशेषीयव्याप्तिमात्रानुपाततोऽयं संकेतः स्थलाङ्कीयमात्राविशेषात् पुरस्ताद्वोपरिष्टाद्वोपचर्यते, तय. **अच्युत-च्युत्- > -च्युत्** शौ २०, ३४, ९† । यदा चाऽपि निर्देशविशेषस्य श्रुतिविशेषीयाऽऽवृत्तिबहुत्वविषयत्वे सति क्वाचित्कतयैवैवंप्रकारता सूचयितव्या भवति, तदा शीर्षण्यावृत्तिसूचकसंख्यावतः स्थलाङ्कविशेषादनन्तरं यावदावृत्त्येवंप्रकारकता सूचयितव्या भवति, तावदावृत्तिसूचकशीर्षण्यसंख्यायुतोऽयं संकेत उपचर्यते, तय. **अस्मद्- > नः** मै ४, १२, १२^{१}; †^{१} ।

२५. ¶ इति संकेतः शब्द-तद्रूपान्यतरीयनिर्देशविशेषात् पुरस्तादुपचर्यमाणस्तस्य कृष्णयजुर्वेदविशेषीयब्राह्मणभागीयतां सूचयति । यदा च निर्देशविशेषस्य श्रुतिविशेषीयतयैवैवंप्रकारकता सूचयितव्या भवति, तदाऽयं संकेतस्तच्छ्रुतिव्याप्तिमात्रानुपाततः पुरस्ताद्वोपरिष्टाद्वा प्रयुज्यते, तय. **¶अपि ✓सृज्, अव ✓पद् > ¶अवपद्यन्ते, अरण्य- > -ण्यम्** ¶मै १, ९, ७··· । यदा तु निर्देशविशेषस्य स्थलविशेषीयाऽऽवृत्तिबहुत्वे

सति क्वाचित्कतयैवैवंप्रकारकता सूचयितव्या भवति, तदाऽऽवृत्तिसंख्याशिरस्कात् सतः स्थलविशेषीयादङ्कादनन्तरमेवंप्रकारकतापर्यायसंख्याशिरस्कतयाऽयं संकेतो ध्रियते, तय. अ॒धि मै ४,४,५[२], ¶।

२६. $ इति संकेतः † इत्यस्य च ¶ इत्यस्य चोक्तपूर्वप्रकारेण प्रवर्तमाने विषयोत्सर्गे रूपस्थलविशेषाऽन्यतराऽपेक्षयाऽपवादभावं सूचयति, तय. †अ॒-तन्द्र- > -$[१]न्द्रम्, ¶अनायत॒न्- > -नः $शौ···, अपराह्ण॒- > -¶ह्णे··· पै १०,६,७$.

२७. पृथक्कारेण वैशद्यमुद्दिश्येह प्रयुज्यमानानां त्रयाणां **कोष्ठकानां** तावदयं विषयविभागो भवति—

[b] स१ द्र. (वैतु. सा तृ१ इति ; GW. प्रभृ. च१ इति ⌊कथं बत रक्षाया अभावमप्युद्दिश्य देवतायाः सुहवत्वं काम्येतेति त्वत्राऽर्वाञ्चः प्रष्टव्याः स्युः⌋)। सा. व्यु.? (तु. सस्थ. टि. ऊती)।

[c] पाभे. अनु तै ५,२,९,५ द्र.।

[d] पाभे. अनु तै ५,२,५,४ द्र.।

[e] उदकस्य समीपे इति कृत्वा समयाऽर्थे अस. (पा २, १, १५ ⌊तु. सपा. तै ६,४, १,५ शुष्कस्य वार्द्रस्य च संधौ इति⌋)। अन्तोदात्तः।

[f] सपा. काठ ८, १० क ७, ६ अन्वागच्छत् इति पाभे.। [g] पाभे. अनु तै २,१,४,५ द्र.।

[h] पाभे. अनु तै २,१,५,१ द्र.।

[i] पाभे. अनुद्रवेत् मै १,८,७ क ४,५ द्र.।

[j] C ⌊WZKM २६,१२६⌋ °नुद्रु° इति शोधितः पाठ इति। पाभे. अनुद्रुत्य तै ५,४,५,५ प्रभृ. द्र.।

[k] गस क्यबन्ते कृत्-स्वरः प्रकृत्या (पा ६,२,१३९)।

[l] विप [(⌊ऊध्नोवर्जिता-⌋ द्यावापृथिवीरूपा-वा अरणीरूपा-वा) मातृ-]। बस. अन्तोदात्तः (पा ६,२,१७२ ⌊तु. वें. सा. Gri.⌋)। पाप्र. अनङादेशाभावः उसं.। उप. ऊधस्- (तु. अध्यूधस्- ⌊काब्रा ४,८,३,११⌋)। सकारान्तमस्त्रीपरमेतद् भवति (तु. पावा ५,४,१३१) एतदभ्युपायेऽपि यत् सा. लोकशब्दयोजनेन द्यावापृथिव्योरस्त्रीत्वं सिषाधयिषति, तन्मन्दम्। पूर्वार्धे तयोर्मातृत्वेनोपचारस्य तेन स्वयमभ्युपतत्वात्।

[m] सपा. °नम् <> °नस्य इति पाभे.।

[n] विप. (अग्नि-)। बस. पूप. प्रकृतिस्वरम्। यद्वा तस. नञ्-स्वरः। उप. ऊन-वर्चस्- इति बस. द्र.।

[o] सपा. मै ४,६,१ अभ्यधावन् इति पाभे.।

[p] =आदित्य-, पर्जन्य-, वायु-। तस. उप. <अनु √वप् इति या ⌊२,२२⌋ प्रभृ. (तु. SEY १५७) इति च; जलप्रधान-निम्नदेश-, जलाशय-। बस. इति च। पाप्र. अनु-ऊ(<२अ)प्- ⌊तु. या. प्रभृ.⌋ + अः प्र. (समासान्तः) इत्येवं व्याकृतौ सत्याम् उप. आदि-विकारः (पा ५, ४, ७४; ६, ३, ९८)। प्र. स्वरः। यत्तु सूत्रे ऊद् इत्यस्य स्थाने अद् इत्यनेनापि पठितेन

अनू(प्यं>)प्या[a]- -प्याः काठ २,१[b]; क १, १३[b]; शौ १,६, ४[b]; १९,२,२; पै ८,८, ८.

¶अनू(नु-उ)प√जीव्, अनूपजीवन्ति मै ३, १०,४.

¶अनू(नु-उ)प√धा, अनूपदधाति काठ २१, ४; अनूपदध्यात् तै ५, २, ७, २; क ३१,१९.

अनूपधीयन्ते मै ३,२,९^{३}.

?अनूपनमति[c] मै ४,२,९.

¶अनू(नु-उ)प√स्था>तिष्ठ, अनूपतिष्ठन्ते[d] मै ३, २, ३; ९,२; काठ ६, २; २९, ८; क ४,१; अनूपतिष्ठन्ते[d] मै ३,२,७; ७,७; ४,७,९.

?अनूपास्ते[e] पै १६,२१, १०.

¶अनूपे(नु-उप√इ), अनूपयन्ति[f] तै १,७,५,४.

अनू-राध- अनु√राध् द्र.

अनू-रोह- अनु√रुह् द्र.

अनू(नु-ऊ)र्ध्व->अनूर्ध्व-भास्[g]- -भासः ऋ ५,७७,४.

¶अनू(नु-ऊ)र्ध्वंभावुक[h]- -कम् तै २,६,५,३.

†अनू(नु-ऊ)र्मि[i,j]- -र्मिम् ऋ ८,२४, २२; शौ २०,६६,१.

अनू-वृज्- अनु√वृज् द्र.

अनू-वृत्- अनु√वृत् द्र.

¶अनू(नु-ऊ)षरिह्[k,j]- -रिहः मै १,६,३.

†अनृ(नु-ऋ)क्षर,रा[l]- -रः ऋ १, ४१, ४; २, २७, ६; -रा

सता पूर्वसवर्णदीर्घत्वेनाऽभीष्टरूपसिद्धिप्रस्तावे प्रत्युपस्थाप्यमानेऽवग्रहदोषः पाम. अचोदि, तद् यावदुपलब्धि पपा. अवग्रहस्यैवानुपलम्भाद् उप. ह्रस्वदीर्घान्यतरादित्वस्य विनिर्णेतुं दुःशकत्वात् तद्विषयस्योट्टङ्कनस्य नितरामनवसरत्वाद् भग्नभित्तिकत्वं द्र. । पामउ. च दीर्घोच्चारणस्याऽत्यावश्यकत्वाभावस्याऽवग्रहाभावे हेतुत्वमिव प्रदर्श्यमानमपि नादरणीयम् । यथाकामह्रस्वदीर्घान्यतरोच्चारणसद्भावस्याभीष्यमाणस्य सतो नितान्ताऽवग्रहाभावं प्रति कारणतानुपपत्तेरिति यावत् । वस्तुतस्त्वत्र वैयाकरणे प्रकरणे पूर्वसवर्णदीर्घात्मिकैव मौलिकी शाब्दी प्रवृत्तिः । तन्मूलश्चाप्यवग्रहाभावः । पूर्वोत्तरयोरुभयोर्वर्णयोः स्थान एकस्य समानस्य सत आदेशस्य विभागानर्हत्वात् । एवं च अनूप-, अभीपु॑-, द्वीप-, नीपु॑-, प्रतीपु॑- इत्येतान्येव प्राति. मौलिकानि सन्तीतरेषां सजातीयनिष्पत्तीनां वृत्तिसामान्योपजनितप्रवृत्तीनां सताम् अन्तरीप-, समीप- प्रमृ. आदर्शस्थानीयानि द्र. । अनूप- इत्यस्माच् च देशात्मकवृत्तिविशेषवतः सतो विवेककरणीव अन्वीप- इत्यस्य साम्यप्रवृत्तितो द्वितीयवर्गानुपातिनी प्रवृत्तिः द्र. । इह च सर्वत्र उप. विषये २अप्- इति स्याद् √आप् इति वेत्यस्य विनिर्णयः २अप्- इत्येतत्-प्रसङ्गेन यद्र. । अन्ततः, द्व्यन्तर् इत्यादिविषयोपनिबन्धः द्व्यनवर्णनिपातेभ्योऽपः पूर्वसवर्णदीर्घः, समन्तभ्र्यामीत्, अनोरदेशे इत्याकारकः स्याद् इति विमृशां विमर्शाय कल्पताम् (तु. पा ६,३,९७;९८) ।

[a]) विप. (⌊जलाढ्यदेशे भवा-⌋ २अप्-) । तात्रभविको यत् प्र. (पा ४,४,११०) । तित्स्वरः ।

[b]) =सपा. माश्रौ ६,१,५,२२ । तैआ ६,४,१ अनूक्याः इति पाभे. ।

[c]) पाठः? । स्वरोऽलक्षणो योगश्च विपरीतार्थकरः । अ-सू (सु-उ)पनमति इत्याकारकः शोधः विचारकोटौ द्र. ।

[d]) वैतु. सपा. तै ५,७,९,२ अनु टि. । यद्नु तत्रासौ नि. कप्र. इष्टो भवति गनिश्च नेष्ट इति ।

[e]) पाभे. अनुवस्ते शौ ११, ६, १० द्र. । (अ)नूपस्ते इति पै. मूको. ज्ञापयति यथा मूलतस्तत्रापि शौ. अभिन्नैव सती श्रुतिः प्रामादिकम् (अनूवस्ते- >°*नूपस्ते>) °नूप° इत्याकारं वर्णविकारमुपगतेति । एस्थि. मुपा. चिन्त्यकोटिमनुप्रविष्टः सन्न् शोधार्हः स्यान्न तु वास्तविकस्य कस्यचित् पाभे. सूचक इति ।

[f]) वैतु. सपा. तै १,७,५,३ अनु टि. यत्रासौ नि. कप्र. ।

[g]) विप. > नाप. (⌊अनुच्छ्रिततेजस्क-⌋ शत्रु- ⌊तु. वें.⌋) । पदविभागस्य सस्व. च कृते तु. टि. अजात-शत्रु- । यत्तु सा. उर्ध्व-भास्- इत्यस्य उप. अग्निपरत्वमपि विकल्पयति, तच्चिन्त्यम् । नञ्पूर्वत्वे बस. अन्तोदात्तत्वप्रसङ्गात् (पा ६,२,१७२) ।

[h]) तु. टि. अ-नग्नंभावुक- ।

[i]) विप. (इन्द्र-) । उप. विप. =हिंस्य- इति सा., हिंसक- इति वें., =चल- इति GW. ORN., =अवरुद्ध इति NW. । [j]) तस. नञ्-स्वरः ।

[k]) विप. (पशु-) । उप. ऊष- + √रि (=लि)ह् + क्विप् प्र. ।

[l]) विप. (पन्था-, पृथिवी-) । बस. अन्तोदात्तः । उप. =कण्टक- । √ऋष् + क्सरन् प्र. (पाउ ३, ७५) । निरस्वरः ।

ऋ १, २२, १५; मा ३५, २१; ३६, १३; का ३५,४, २०; ३६, १, १३; मै ४, १२, २; काठ ३८, १३; शौ १८, २,१९; –राः ऋ १०, ८५,२३; शौ १४,१ ३४; पै १८ ४, ३.

अनृ(नृ-ऋ)च्[a,b]– -नृचः ऋ १०, १०५,८.

¶अनृ(नृ-ऋ)च[c]– -चम् मै ३. ३, ५; काठ २१,५; क ३१, १०. [°च- एक°].

अनृ(नृ-ऋ)च्छ(त्>)न्ती– -न्तीः पै १,३६,१-३.

अनृ(नृ-ऋ)जु[a]– -जोः ऋ ४, ३, १३.

अनृ(नृ-ऋ)ण[d]– -णः मा १९, ११; का २१, १, १०; तै ३, ३, ८, २; ४¶; ६, ३, १०, ५¶; मै ३, ७, ८¶; ४, १४, १७[e]; ¶काठ १३,२;२६, २; क ४०, ५¶; शौ ६, ११७, १; २; पै १६, ४९, १०; १९,३९, १२; –णम् पै १६,५०,१; ८; -णाः मै १, १०, २०^{२}¶; काठ ३६, १४^{२}¶; शौ ६, ११७, ३^{४}; पै १६, ५०, २^{४}[f]; -णेन काठ १३, ३¶.

१अनृ(नृ-ऋ)त, ता[g,a]– -तम् ऋ १, २३, [२२ (२३); १०, ९, ८ (९)]; १०५, ५; १३९, २; १५२, ३; ७, २८, ४; ८, ६२, १२; १०, १०, ४; १२४, ५; †मा ६, १७; †का ६, ५, ५; ¶तै २, ४,१, २; ५, ५, १;६; ¶मै १,९, ३; १०, ११^{१}; २, १, ४^{२}; ४, २^{४}; ४, ७, ५; १४, १७^{४} \$; ¶काठ ६, ७^{२}; ८, ७; ९,११; १०,७; १२, ५; ११^{४}; १४, ५^{१}, २३, १^{२}; ६; २७, ४[h]; ७^{१}; ८; ३४, ११; ३६, ५^{१}; ३७,१^{२}; ¶क ४, ६^{२}; ७, ४; ३५, ७^{२}; ४२, ४[h]; शौ १, १०,३; २, १५, ५; ४, ९, ७;१६, ६[i]; ६, ६१,२; ३; ७, ९४, ३†; ९, १५, २३†; १०, २, १४; ५, २२; १२, ३, ५२; १८, १, ४†; १९, ४४, ८; पै १, ९,३; ३३,३;२, २६, १; ५, ३२, १; ३६, ४;५; ८; ६, ५, १२; ८, ३, १३; ९, २२, ४;१२;१६; २३; १५, ३, ८; १६, ६०, ८; ६९, १२†; १३०, १; १७, ४१, २; १९, १४, ८; २१, ४; २०, १५, ४; -तस्य ऋ ५, १२, ४; ७, ६०, ५; ६५, ३; ८६, ६; १०, ६७, ४; १००, ७; मै ३, ७, ३¶; शौ २०, ९१, ४†; -ता ऋ २, २४,६;७; ७, ६१, ५; ८४, ४; पै १९, २१, ७; -ताः पै २, ५५, ३; ४; -तात् मा १, ५; का १, ३,१; ¶मै १, १०, १२^{२}; २, ४, २; ¶काठ १२, ११; ३६, ६^{२}; पै ७, ८, ८^{२}; -†तानि ऋ १, १५२, १; २, ३५, ६; मै ४, १४, १०; -ते मा १९, ७७; का २१, ५, ४; मै ३, ११, ६; काठ ११, ३; ३८, १; -तेन ऋ १०, ८७, ११; ¶मै १, ९, ३;११, ५; २,४, २; ¶काठ ९, ११; १२, ११; १४, ५; शौ ६, ७१, ३; ७, ७३, २; ८,३, ११†; पै २, २८,२;५,३२, ६; १६, ७, १†; १९, २७, २; -†तेभिः ऋ ७, १०४,८; शौ ८,४,८; पै १६, ९, ८. [°त- सत्य°].

†अनृत-देव[j]– -वः ऋ ७, १०४, १४; शौ ८, ४, १४; पै १६, १०,४.

अनृत-द्विष्[k]– -द्विषः ऋ ७, ६६, १३.

¶अनृत-पशु[l]– -शू मै १,१०,१२;

---

[a] तस. नञ्-स्वरः।

[b] समासान्ताभावः उसं. (वैतु. नाउ.)।

[c] बस. समासान्तः अः प्र. (पा ५,४,७४ [वैतु. नापू.])। तत्स्वरेणान्तोदात्तः।

[d] बस. अन्तोदात्तः।

[e] अनृणः इति पाठः? यनि. शोधः (तु. तै ३, ३,८,२)।

[f] एकतरत्र पाठः? अनृणेः इति शोधः (तु. सस्थ. टि. ?अदीप)।

[g] विप. (वचस्- प्रभृ.), भाप. (असत्य-)।

[h] सपा. तै ६,४,८,१ क्रूरम् इति पाभे.।

[i] अनृतं वदन्तम्>सपा. आश्रौ १,३,२४ शांश्रौ १,६,३ आपश्रौ २४,१२,७ पाकम् इति पाभे.।

[j] विप. (असद्-)। बस. पूप. प्रकृतिस्वरम् (पा ६, २, १)।

[k] उस. क्विबन्ते कृत्-स्वरः प्रकृत्या (पा ३,२,६१;६, २,१३९)।

[l] तस. मध्यमपदलोपः सास्व. च (तु. अनृतेष्टका- माश ६,२,१,३८)।

काठ ३६,६[2].

अनृत-वाच्[a]- -वाक् काठ ४,१६, शौ ४,१६,७; पै ५, ३२,८.

अनृत-वादिन्[h]- -नम् पै ९,१९,२.

¶अनृतवादिनी- -नी मै ४, ५,२.

२ अनृ(न्-ऋ)त[b]- -ताः ऋ ४,५,५.

अनृ(न्-ऋ)तुपा[c'd]- -पाः ऋ ३, ५३,८.

? अनृतुभिः क्रम्यम्[e] मै ३,६,७.

¶*अनृ(न्-ऋ)त्विज्[d]- -त्विजे काठ २८,५[1]; क ४४,५[1].

अ-नृरण[f]- -रणम् पै १९, ५०, १०; ११;१२.

?अनेकः पै २०,३९,१.

?अनेकवत्- -वन्तम् काठ २१,१३[g]

¶अने(न्-ए)कादशि(न्>)नी- -नीम्[h] काठ २२,७; क ३५ १.

?अनेकाम्[i] पै ६,२,६‡.

अने(न्-ए)जत्[d]- -जत् मा ४०,४; का ४०,१,४.

?अने(न्-ए)जित[j]- -तः पै ९, ६, १२.

†अ-नेद्य[k'd]- -०द्य ऋ ⌊८, ३७,१-६⌋; -द्यः ऋ १, ⌊८७, ४ (२, २३,११)⌋;५, ६१. १३; मै ४, ११,३; काठ ९, १८; -द्याः ऋ ६,१९,४.

?अ-नेद्यः[l'd] ऋ १,१६५,१२.

अने(न्-ए)नस्[m]- -नः[n] ऋ ६, ६६, ७; -नसम् तै १, ८, ५, ३; -नाः ऋ १, १२९, ५; ७, २८,४; ८६, ४; मै ३, १०, १¶.

अने(न्-ए)वम्-उत्सृष्ट[o]- -ष्टौ काठ १३,३.

?अने(न्-ए)वा[p'd] शौ १६, ७,४.

†अने(न्-ए)हस्[q]- -हः ऋ १, १८५, ३; ६, ५०, ३; ८,१८,

---

[a]) उस. ताच्छीलिके क्विबन्ते कृत्-स्वरः प्रकृत्या उप. दीर्घश्च (पावा ३, २, १७८; पा ६, २, १३९)। यद्वा अन्-ऋत-वाच्- इति नञि पूप. बस. अन्तोदात्तः (पा ६,२,१७२)। अस्मिन् कल्पे उप. तस. मध्यमपदलोपः (तु. नापू. टि.)।

[b]) विप.। बस. अन्तोदात्तः । वाक्यान्वये द्वि१ सत् क्रिवि.।

[c]) विप. (मघवन्-)। [d]) तस. नञ्-स्वरः।

[e]) पाठः? अनृतु, निष्क्रम्यम् (दीक्षितेन दीक्षित-विमितात् न) इति शोधः। [f]) तस.।

[g]) पाठः ⌊तु. BC.⌋? अनीकवन्तम् इति शोधः (तु. खि ४,१४,१ आश्रौ २,१८,३ च)।

[h]) अनेकादशिनीं कुर्यात्>सपा. तै ५, ५, ७, १ एकादशिनीं न मिनुयात् इति पाभे. (तु. सपा. मै ३, ४,८)।

[i]) °मिदेकाम् (>०*मदे°> °मने°) इत्याकारो विकारः मूको. प्रत्येतव्यः (तु. पाभे.)। अन्यथाऽनभीष्टार्थ-प्रतीतिकरत्वे मर्षितेऽप्यवरतो रूपं द्वित्ववद्-बहुत्ववद्वा स्यान्न त्वेकत्ववदिति दिक्। एस्थि. शोधः सावसरः द्र.। सपा. ऋ १०,५,६ एकामिद् इति, शौ ५, १,६ इदेकाम् इति च पाभे.।

[j]) पाठः (तु मूको., र. °जातः इति)? अने (न्-ए) जत्- (विप. ⌊क्रिमि-⌋)>-जतः इति शोधः (तु. BKA, Renou ⌊ Vāk ५,७६⌋)।

[k]) विप. (इन्द्र-, जरितृ-)। उप.<√नेद् (कुत्सायाम्)।

[l]) विप. (श्रवस्-)। उप. नेद्यस्- = निन्दनीय- इति (तु. वें. सा.; वैतु. सा. ⌊पक्षे⌋, HLR. < नेदीयस्- इति; ORN. ⌊मरुतां गण-⌋ इति; GW. °द्याः ⌊मरुतः⌋ इति शोधः MVH. °द्यम् इति शोधश्च)। GG. अ-नेदी->⌊द्वि ३⌋ °द्यः ⌊इषः⌋ इति।

[m]) विप. (अस्मद्-, इन्द्र-, वरुण-)। बस. अन्तोदात्तः।

[n]) विप. (मरुतां याम-)। वा. इदं रूपम् प्र१<अने(न्-ए)न- इति, उप. च एन- इति एनस्- इत्येतत्-सजन्मेतीवाभिप्रैति GRV. (तु. NW.; यत्तु तत्र सा. अप्येवमभिप्रैतीति समर्केति, तदसत्। यनि. द्वि१ क्रिवि. चेत्येवमेव तस्याभिप्रेतत्वात्। यदपि PW. GW. MW. चेह उप. एन- (=एत-=हरिण-) इत्यनुपदं श्रूयमाणस्य अनश्व- इत्यस्य संस्कारसाम्यादास्थिषत तदपि चिन्त्यम्। अनश्व- प्रभृ. पदानामन्वयान्तरस्य प्राकरणिकतरत्वात् (तु. सा.)।

[o]) तस.>तस.।

[p]) पपा. अनेव इति ह्रस्वान्तं रूपं भवति। तच्चिन्त्यम्। एवम् इत्येतत्-पर्यायभूतस्य दीर्घान्तस्य तृ१ सतः क्रिवि. संगततरत्वप्रतीतेः (तु. सस्थ. एव, वा)।

[q]) विप. (⌊अप्रतिम-, अप्रतिहत-, अहिंसित-⌋ इडा-, द्यावापृथिवी-, पथिन्- प्रभृ.); भाप. (निरापत्ति-, पाप-राहित्य- ⌊ऋ ६, ५०, ३; ८, ३१, १२; ६७,१२⌋)। बस. अन्तोदात्तः उप. <√हन् >एह इति पाउ ⌊४, २१८⌋, <√ईह् (इच्छायाम्) इति PW. GW. प्रभृ.।

२१; ३१, १२; ६७, १२; -ह॒सः ऋ ३, ५१, ३;⌊५, ६५, ५; ८, ४७, १-१८⌋; ८, ⌊(५, ६७,४);१८,५⌋; ४५,११; १०, ६१, २२; मै ४, १२, ३; -ह॒सम् ऋ १, ४०,⌊४; ३, ९, १ (५, ३४,७;८, १०३,५; ९, ६६, ७)⌋;६;⌊६, ५१, १६; ८, ६९, १६⌋; ८, २२, २; ४९, ४?[a]; ५०, ४; १०, ६३, १०; खि ३, १,४;२, ४; मा ४, २९; २१, ६; का ४, ९,६; २३, १, ६; तै १, २,९, १; ५, ११,५; मै १, २, ५;४, १०, १; काठ २, ३; ६; क १, १९; कौ १, ६२; जै १,६ ,८; शौ ७, ७,१; २०, ९२, १३; पै २०, १, ९; -ह॒सा ऋ १, १२९,९;६, ७५, १०; मा २९,४७; तै ४,६,६,४; काठ ४६,१; पै ४,२४,७; १५, १०,१०.

?अनेहा॒ ऋ १०, ६१, १२[b]; शौ ६, ८४,३[c].

?अनोहितास् पै १७ १२,५.

अ॒न्त, न्ता[d]- -न्तः ऋ १, ५४, १; १६४, ३५[e]; ६, २९, ५; १०, १११,८; मा १७,२; २३, ६२†[e]; का १८, १, ३; २५, १०,१०†[e]; ¶तै ४, ४, ११,४; ७, २, ७, २; ८,५; ३, १, ४; ¶मै १, ९, ७; १०, १८^{२}; २, २, ९^{२};८, १४; ३,६,१[f]; ४,३, १; ४, ३^{२}; ६, ६; ¶काठ ११, ४; १२,४; १७, १०; १९, ९; २६, १;३०, ३; ३२, ३; ३६. १२^{२}; ¶क २६, ९; ४०, ४; ४६, ६; शौ ९, १५, १०†[e]; पै १६, ६९, ४†[e]; -न्तम् ऋ १, ३३, १०; ३७, ६[g]; ५२, १४; ⌊१००, १५; १६७, ९⌋; १६४, ३४; १७९, २; ५, १५ ५; ६, ४३, २; ७, २१, ६; ९९, २;८, ४६,११; १०, ५४. ३; ११४, १०; मा २३, ६१†; का २५. १०, ९†; ¶तै २. ४, ११, २^{२}; ३; ७, २, ७, २; ३; ८, ६;४, १५,१†; १८. २^{२}†; ‡५[e]; ८, १^{२}; २; ¶मै १,६, १३; ९,७; १०, १६; १९; २, २, ९^{२}; १३; ४, ४^{२};५; ३, ६. ६; ४,४, ३;५^{२}; ६, १;७, ७; ८, १०^{२}; ¶काठ १०, ८^{२}; ९; ११,४^{२}; १२,४^{२}; २६, १; २७, १; २९, ४; ६^{२}; ३०, २; ३^{२}; ५; ३६, १०; १३^{२}; ४४, ४; ७^{२} †; ‡[e]; ¶क ४०, ४; ४२, १; ४४.१; ४५, ५; ७^{२}; ४६, ५; ६^{२}; जै २, २, ४?‡[h]; शौ ९, १५, १३†; १०, ७, ४२; १२, ३, ३४; १५. ७,१; पै १६, ६९, ३†; १७, ३९, ५; -न्ता ऋ ४, १, ११; -†न्ताः ऋ ७, ६७, २; ८३, ३; १०, ८२,१; मा १७, २५; का १८, ३, १; तै ४, ६, २, ४; मै २, १०, ३; काठ १८, २; क २८, २; $शौ १, १७, ३[i]; १४, २,५१; पै १८, १,१ १०; १९, ४, १३; -न्तात् ऋ

---

[a] अनेहस् ⌊क्रि वि.⌋, त्वम् इति द्विपदः शोध इति मतम् ।

[b] कारवः इत्येतदन्वितं सत् प्र३ द्र. [वैतु. सा. प्र१ (इन्द्रः) इति । उभयथापि पपा. विसर्गान्तत्वाऽभावः समानं दुर्घटः । प्र३ इति पक्षे ?*अने(न्·ए)ह॒- > -हाः इति वा स्यात्, अनेह॒स्- > (मौलिके संपा.) *ऽनेहा॒सः > (उत्तरे संपा.) *अनेहा॒ (=अन्त्याधिकाक्षरच्युतिः) > (उत्तरतरे संपा.) ऽनेहा॒ इति वा (वैतु. GW. L ५५१ *b*, ५५९ *b* अनेह॒सः > *अनेह॒ अः > अनेहा॒ः इति)] ।

[c] नि॒र्ऋति- इत्यस्य विप. इति प्र१ सद् < *अने (ह>) हा॒ < अनेहा॒ः (विसर्गच्युतौ) इति वा < अनेह॒स्- इति वा (तु. NW. टि. अनेन॒ इति)। सपा. पै १९,५,१३ विश्ववारे इति पाभे. ।

[d] नाप. (पर्यवसान-, सीमन्-, पर्यन्तभाग-, संख्याविशेष- ⌊मा १७, २ प्रभृ.⌋), भाप. (समीप-, अन्तिक- ⌊ऋ १, ३०, २१ प्रभृ.⌋)। व्यु.? √अम्(गतौ) + तन् प्र. नित्स्वरश्च (पाउ ३,८६)। या ⌊४, २५⌋ प्रभृ. < √अत् इति । यत्त्वेतत् प्राति. < √अन्त् इति MW. आह । तन्न । तदपेक्षया नाधा. असावित्यस्य मतस्य तत्त्वस्य नेदीयस्त्वप्रतीतेः (तु. GW. NW. WW ⌊१, ६७ उउ.⌋) यतो मूलतः √*अन् (यद्र.) इति प्रकृत्यंशतया त इति च प्रत्ययांशतया निर्धार्यत्वेनोपतिष्ठेयाताम् ।

[e] सपा. °न्तः (माश १३, ५,२,२१ आश्रौ १०,९,३ प्रभृ. च) <> °न्तम् इति पाभे. ।

[f] °न्तु॒ः इति पाठः? स्वरः शोधापेक्षः ।

[g] =वस्त्र-सन्धि-, सीवन- इति ORN. ।

[h] अ॒न्तम् आः इति पाठः? अ॒न्तमाः इति शोधः (तु. ऋ ६,५२,१४ कौ ३,३,९) ।

[i] विप. (⌊अन्तिमा-⌋ नाडी-) इति (तु. पै १९,४,१३; सा.; वैतु. W. अ॒न्त्याः इति पाठः श्रेयान् इति) ।

१, ३०,२१; ३, ६१, ४; १०, ८९, ११ ; तै ७, २, ७, ३¶; ¶काठ ११, ४; ३०, ३ ; क ४६, ६¶ ; कौ १, ७१‡[a]; जै १. ७, ९‡[a]; शौ १८, ३, ६५‡[a]; -न्तान् ऋ १, ९२, ११; ४, ५०, १; ५, ४७, ४; ५९, ७; ६, ६२, १; ७, ४५, २; ६९, ३;८, २५, १८; १०, ८, १[a]; २०,४; ८९,१; १०८, ५; †मै ४, १२, ५; १४, १०; †काठ ९ १९; ११, १३; २५, ६; †क ३९, ३; शौ १४, १, ४५[b]; २०, ८८, १† ; पै १५, ५, ६[b]; १६, १०३, ६; १५०, ६; १८, ५, २[b]; -न्ताय मा ३०, १९; का ३४, ४, १ ; तै ७, २, २०, १ ; काठ ४२, १० ; -न्ते ऋ ४, १६, २ ; १०, ३४, ११; ¶तै १, ७, ६, ४; ६,१, ९,३[c]; ७, १,६, ६; ५, ८, १^{२}; ¶मै १, ९, ७; २, २, ९^{२}; ३, ९, २; ४, २, १; ४, २; ६, २; ¶काठ ७, ११; १०, ८ ; ११, १० ; २४, २[c]; २६, ३; २७,४;३९, ६; ¶क ३७, ३ ; ४२. ४ ; शौ २०, ७७, २† ; पै १९, २५, १; -न्तेन ¶मै २, २, ९^{२}; ४ ४, ३; -†न्तेभ्यः ऋ १, ४९. ३; ८,८८, ५[d], काठ १६, १३‡[e]; क २५ ४‡[e] ; कौ १, ३६७ ; जै १, ३८, ८; -न्तेषु ऋ ७, ७९, २; तै ५, ७, १०, ३¶ ; काठ ३७, १६¶; -†न्तौ ऋ ५, ४७, ३; खि ३, २२, ६; मा १७,६०; का १८. ५, ११; तै ४, ६, ३, ४ ; मै १, १०, १४ ¶ ; २, १०, ५; ३, ६, १¶[f]; ४, ३, १^{२}¶; काठ १८. ३ ; ¶१९, ९ ; ¶२२, १३; ¶२८, १;३६. ८; क २८. ३; ४४.१¶; $शौ ६, ८९,३;१३. २, ६; १३ ; पै २, ३५, ५$; ३, १५, ६$; १६, १०३, ७, १८, २०, १० ; २१, ७.

[°न्त- अति°, अन्°, आ°, आदित्य°, १इडा°, १ईर्म° उप°, तीव्र°, त्रिष्टुभ्°, दूरे°, बहुल°, भस्मन्°, भिन्न°, मण्डल°, यज्ञ°, १ विष्ट°, २ वेद°, वेदि°, १संहिता°, समा°, सूक्त°].

¶अन्त-ग(त>)ता[g]- -ताः तै १,५,९,१.

¶अन्त-तस् (:)[h] तै १, ७ ४, ४; २, २, ७, ५ ; ५, ४, ३, ३; १०, २;७, १०, ३, मै १ १०, ५^{२}; ३, १,१^{२}; ४,२;८,५^{२};४, ३,८;८,३^{२};६^{२}; काठ १८,१९^{२}; २१,११^{२}; २२,१; २३,९; २४, ४;२५,१०;३२ ३; ३४,१^{२};३५, २०^{२};क २९,७^{२}; ३६,६;३७,५; ४०, ३; ४८, १८^{२}; शौ १४, १,६४$; पै १८,६,१२$.

¶अन्त-नामन्[i]- -मानौ तै ७, ४, ८,१^{२}.

१अन्त-म, मा[j]- -¶मम् तै ५, १, १, ३ ; ६, ३, ९, ५; मै १, ५, १३ ; काठ ३५, १६; क ४८, १४ ; -मस्य ऋ ३, ५५, ८; -¶माः तै ६, ४, २, ३^{२}; मै ४,२,७; -¶माम् तै ५, १,१,३; -†मेभिः ऋ १,१६५, ५; मै ४,११, ३; काठ ९,१८.

अन्त-वत्- -वत् शौ १०,८,१२; पै १६,१०१,८.

√अन्ति[k]

अन्तक[l]- -कः शौ ६, ४६,

---

[a] सपा. °न्तात् (तैआ ६, ३, १ च) <> न्तान् इति पाभे. ।

[b] सपा. पागृ १,४,१३ तन्तून् इति पाभे. ।

[c] अपामन्ते> सपा. मै ३,७,४ अप्सु इति पाभे. ।

[d] सपा. कौ १,३१२ जै १,३२,१०; ४,६,१ सद्भ्यः इति पाभे. ।

[e] सपा. ऋ १०,९७,१७ ओषधयः इति पाभे. ।

[f] अन्तौ इति मुपा. अन्तोदात्तश्चिन्त्यः ।

[g] सस. पूप. प्रकृतिस्वरम् (पा ६, २, २) ।

[h] तसिः प्र. (पावा ५,४,४४) । तत्स्वरः ।

[i] विप. (ऋतु-) । बस. पूप. प्रकृतिस्वरम् ।

[j] पपा. अवग्रहाभावः (तु. चरम-, परम-, मध्यम- प्रभृ.) । मः प्र. उसं. (पावा ४, ३, ८) । तत्स्वरः । भा. तु अन्तिम->अन्तम- इति च्छान्दसः (प्राकृतिकः) वर्णविकारो वा स्यात् प्र. (डिमचः) आदिलोपो वा स्यादिति विकल्प्य अन्तिक-+तमप् प्र. इत्येवं प्राति. तादिलोपमुपाश्रित्य विकल्पान्तरं ब्रुवाणोऽपार्थगौरवश्रद्धः स्याद् अन्ति- इत्यस्य प्राति.(यद्र.) मः प्र. च यनि. पृथक् सुकल्पत्वात् । अन्तर- इत्यनेन सन्यायमिति BL. ।

[k] तत्करोतीत्यर्थे णिजन्तः नाधा. ।

[l] विप., नाप. (मृत्यु-, यम-), व्यप. (राजन्- ⌊ऋ १, ११२,६⌋; मार्त्यव- ⌊शौ ८,१३,७⌋) । ण्वुल् प्र. लित्स्वरश्च (पा ६, १, १९३) । वैप २ १अन्तक-, २अन्त-कृ- द्र. ।

२; ८, १३, ७; १६, ५, २; ४-७; ९; १९, ९, ७; पै १६, १३५, ३; -कम् ऋ १, ११२, ६; -काय मा ३०, ७; १८[a]; ३९,१३; का ३४, १,७;३,५[a]; ३९,९,३; शौ ८,१,१; पै १६, १,१.

अन्तक-द्रुह्[b]- -ध्रुक् ऋ १०, १३२,४.

१**अ॒न्त्य, न्त्या**[c]- -न्त्यः तैँ[d] १, ७, ९, १; ४, ७, ११, २; मै १, ११, ३; काठ १८, १२; क २९, १; -न्त्या काठ १०, ८; -न्त्याय काठ १४, १; -¶न्त्ये तै २, २,७, ५; काठ १०,९^{१०}.

१**आ॒न्त्य**[f]- -न्त्याय[g] मा ९, २०[h]; १८,२८; २२,३२^{२}; का १०, ४, १[h]; १९; ९, १; २४, १९,१.

आन्त्याय॒न[i]- -नः[j] तै १, ७, ९, १; ४, ७, ११, २; -नाय[j] मा ९, २०; १८, २८; का १०,४, १; १९,९, १; २४,१९,१.

२**आन्त्यु॒**[k]- -न्त्यः[d] मै १, ११, ३; काठ १८, १२; क २९, १; -न्त्याय काठ १४,१[g].

१**अन्तम॒**- अ॒न्त- द्र.

†२ **अ॒न्त (न्-तँ*) म, मा**[l]- -मः ऋ ३, १०, ८; ५, २४, १;६, ⌊४५, ३०; ८, ५, १८⌋; ४६, १०; ८, १३, ३; ४५, १८; ६४,९; १०, १००, ६; मा ३, २५; १५, ४८; २५, ४७$; का ३, ३, १७; १६, ५, ३०; २७, १५, २$; तै १, ५, ६, ३; ३,१,१०, ३$; ४, ४, ४, ८; मै १, ५, ३; १०; २, १३, ८; काठ ७, १; ८^{२}; क ५, १; कौ १,४४८; २,९८; ४५७; जै १, ४७, २; ३, ९, १२; ३४, १५; शौ २०, ८३, २; -मम् ऋ ८,३३, १५; -मस्य ऋ १, २७, ५; कौ २, ८४९; जै ४, १२,१; -मा ऋ ७,२२, ४; कौ १, ११४८; -माः ऋ ६, ५२, १४; कौ ३. ३, ९; -मानाम् ऋ १, ४,३; कौ २, ४३९; जै ३,३३,१३; शौ २०, ५७,३;६८,३.

अन्तःको॒श- प्रभृ. अन्त॒र् द्र.

अन्त॒ (न्-तँ॒) र् (>:, श्)[m] ऋ १, २३, १९; ⌊२०; १०, ९, ६⌋;

---

[a]) सपा. तैब्रा ३,४,१६,१ नि॒र्ऋत्यै इति पाभे. ।

[b]) विप. (⌊हिंसक-द्रोग्धृ-⌋ वरुण-) । उस. कर्तरि क्विबन्ते कृत्-स्वरः प्रकृत्या (पा ६,२,१३९)।

[c]) विप., नाप. (संवत्सर- इति भा., मार्गशीर्ष-मास- इति सा. ⌊तैँ १, ७,९,१ प्रभृ.⌋) । तात्रभविकेऽर्थे यदन्ते आद्युदात्तत्वम् (पा ६,१,२१३) ।

[d]) सपा. अ॒न्त्यः <> आन्त्यु॒ः इति पाभे. ।

[e]) सपा. मै २,२,९ य॒ज्ञि॒ये इति पाभे. ।

[f]) = ⌊ संवत्सराभिमानिन्- ⌋ प्रजापति- ⌊ =भौवन ⌋ । अपत्येऽर्थे यञ् प्र. उसं. (पा ४, १,१०५) । ञित्स्वरः । समानार्थीयो भिन्नशाखीयोऽन्तोदात्तः एउ. द्र. ।

[g]) सपा. आ॒न्त्याय (माश ५,२,१,२ काश ६,२,२,१ च) <> आन्त्यु॒ाय इति पाभे. ।

[h]) अत्र पपा. उ. म. च अ॒न्त्याय इत्येवमुशन्तः शुक्लयजुःसंप्रदायानुरोधाद् भग्नभित्तिका एव (तु. सा. ⌊का.⌋ BC. च) ।

[i]) नाप. [मास-(तै १,७, ९,१ ⌊तु. भा. वैतु. पक्षे च <अ॒न्त्य- इति ⌋)] । यञन्ताद् गोत्रापत्येऽर्थे फक् > आयनः प्र. कित्-स्वरश्च (पा ४,१,१०१; ६,१,१६५) । यत्तु म. (मा १८, २८) अन्त्य-अयन- इति समुदितशब्दद्वयात् तात्रभविकेऽर्थे प्र. इत्याह तत् पपा. विरोधाच्चिन्त्यम् ।

[j]) सपा. परस्परं पाभे. ।

[k]) =१आ॒न्त्य- । अपत्येऽर्थे अण् प्र. उसं. (पा ४, १, ११२) । तत्स्वरः ।

[l]) व्यु.? पपा. नावग्रहः (वैतु. शं॒-तम-) । अत्र ३*अ॒न् इत्यस्य स्थाने अन्तिकँ॒- इति पूप. भवति तादिलोपश्चेति प्राञ्चः (पावा ६, ४, १४९) । अ॒न्त- इति पूप. भवतीत्यर्वाञ्चः (तु. PW. प्रभृ.) । तमप् प्र. इति तु सर्वसंमतम् ।

[m]) ३*अ॒न् + (√तॄ>) *त॒र्- इत्येवं गस. विजन्ते कृत्-स्वरः प्रकृत्या [पा ६,२,१३९ ⌊तु. WW १,१२६⌋; वैतु. √अम्+(न) अर् (अन्) प्र. (पाउ ५,६०) । नित्स्वरश्च] । व्यु. कृते तु. टि. अ॒नीक-, अ॒न्तम-, अ॒न्तर- । वाच्यस्याऽधिकरणताऽनुरञ्जितत्वस्वाभाव्यात् क्रियया तदत्यन्तसंयोग-प्रद्योतनार्थं मूलतः द्वि. प्रयोगस्य सावसरत्वे सति (पा २, ३, ५) वस्तुतः द्वि१ एव सतो रूपस्य सामान्येनैतत् क्रिवि. इति अव्य. इति ग. इति कप्र इति चोत्तरोत्तरं बुद्धयः समजनिषत (तु. पाम १, ४, ६५) । एस्थि. अन्त॒रा एतदीयं प्राचीनं तृ१ एव सद् अव्य. इत्य् एतद्वद् दिक्कालाधिकरणताऽनुरञ्जितवाच्य-प्रधान-शब्दान्तरवत् प्रसिद्धिमगात् (तु. *पु॒र्- > पु॒रा,

२४, ७ ; ५४, १०; ६२, ९[a]; ६७, ५ ; ७०, २ ; ९५, १०[b]; ९६, ५[c]; १०५, १; ११६, २४; १३०, ३; १३२, ३[d]; १३५, ९[e]; १५७, ५; [१५९, ४ ; **१०**, १७७,१]; १६१, ४; १६३, ४ ; १६४, ९ ; १७[f]; [३१ ; **१०**, १७७, ३]; ३२[g]; ३३ ; १६८, ५; १७३,३[b]; १८०, ३; १८२, ६ ; **२**, १२, ३ ; २७, ३[d]; ८ ; ३५, ७ ; [४०, २; ६, ७२, ४]; **३**, १, ३ ; १४; ६, ४[h]; ३८, ३[i]; ४४, ३[j]; ५४, ९ ; ५५, २ ; ५ ; [९[j]; **१०**, ४, २]; १२ ; १५; ५८, १; **४**, १, ७[k]; [१३; **५**, ३१, ३]; २, २[l]; ३[l]; ७, ८; १३, ४ ; १६, १७[m] ; १८, ४ ; २७, ४[m]; [(**१**, १२४, १०); ५१, ३]; ५८, ६ ; ११[२]; **५**, ५९, २ ; ६२, ५ ; ६ ; **६**, ४, ४; ९, ५ ; ११, २; २७, ७[j]; ४३, ३; ४४, २४ ; ५८, ३ ; ६६, ४; ७२, ४[२]; **७**, २, ३; ११, ३; १२, १; १८, २४; ७१, ५[n]; ८६, २[o]; ८७, २; ५; १०४, ३; **८**, २, ४; २९, २; ३; ३९, १[p]; ४८, २; ६८, १८; ७२, ३[q]; १००, ९;

दुक्षिण->दक्षिणा; *पश्च->पश्चा, उत्तर->उत्तरा, मध्य->मध्या) । एवम् द्विउ. टि. अप्यस्यैव स१ इति द्र. (वैतु. GW. *अन्तरि>अन्तर् इत्यन्त्यलोपत इव परिणामं संभावयन् सन् वस्तुतो जातक्रमात्रं जनकीयमान इत्युपेक्ष्यः) ।

[a]) **आमासु** इति सप्तम्यर्थवचनः कप्र. (तु. स्क. सा.; वैतु. वें. GW. **अन्तः**···**दधिषे** इति) ।

[b]) सप्तम्यर्थोपबृंहणः कप्र. (वैतु. सा. GW. प्रमृ. **अन्तश्√चर्** इति) ।

[c]) **द्यावाक्षामा** इत्येतदभिसंबद्धम् अव्य. (वैतु. GW. SI. **अन्तर्विभाति** इत्येवमसलक्षणतां सौवरीमवगणय्योपसर्गीयमाणौ) ।

[d]) अनुपदश्राविनाद्दर्शनक्रियां प्रत्य् अधिकरणत्वस्य विवक्षकः द्र. (तु. वें.; वैतु. सा. प्रथमे स्थले **द्विताऽन्तर्** इत्येवं संबन्धुकः, PW. GW. च **अन्तःपश्यन्ति** इत्येवं योजुकौ । इह कर्मणोन्तर्दर्शनं नेष्टमिष्टं च कस्यचिदन्यस्याऽन्तस्तत्कर्मीभूतवस्तुदर्शनमिति विवेकः यनि. विनिगमकः ।

[e]) वैतु. GW. **अन्तः पतयन्ति** इति योजुकः ?

[f]) सपा. शौ **९**,१४,१०; **१३**, १,४१ पै **१६**. ६७,७; **१८**,१९,१ **अस्मन्** इति पाभे. ।

[g]) सप्तमीवचनः कप्र. (**वैतु.** GW. **अन्तः**···**परि**वीतः इति) । [h]) **द्यावा** इति द्वि. युक्तः कप्र. (तु. टि. ऋ **१०**,९६,११ आ) ।

[i]) अन्तर्धापनार्थस्य प्रसङ्गाऽभावाद् **अन्तर्**···धुः इत्येवं योजुकः GW. चिन्त्यः ।

[j]) सप्तम्यर्थोपबृंहणः कप्र. (तु. वें. सा.; **वैतु.** PW. प्रमृ. **अन्तश्√चर्** इति) ।

[k]) सप्तमीवचनः कप्र (वैतु. GW. अन्तः परिवीतः इत्येतदीयाऽयुक्तत्वं स्वरतोऽपि सुवेदमिव) ।

[l]) द्वि. युक्तः कप्र. (तु. वें. सा. ; वैतु. GW. [प्रथमे स्थले] **अन्तर्**···**ईयसे** इति, अन्यत्र **अन्तरीयसे** इति [तु. सस्थ. टि. आ···**ईयसे**] च योगः इति) ।

[m]) सप्तम्यर्थोपबृंहणः कप्र. (तु वें. सा. PW.; वैतु. वें. GW. **अन्तः√पत्** [गतो] इति युजुकौ) ।

[n]) निधानक्रियाधिकरणोपबृंहणार्थम् अव्य. (तु सा. PW.; वैतु. GW. अन्तः···नि···धातम् इति) ।

[o]) **भुवाने** इत्युत्तरेण व्यवहितेन क्रिप गतियोग इति PW. प्रमृ. आहुः । तन्न । अन्तर्भावस्य गस. सतोऽन्तर्भाव्यस्य सत्तायामन्तर्भावुकस्य सत्तायाः पार्थक्येनाऽभिव्यक्त्यभावे सति विलयानर्थान्तरत्वेन प्रसिद्धेरिह च तथाविधस्य स्तोतृ-सत्ताया देवतासत्तायां विलयस्य प्रसङ्गाऽश्रुतेः । यदपि सा. स्तोतृदैवताभिसंबन्धेनाऽऽन्तरिकीं सतीमपि पृथग्भूतां स्थितिं स्पष्टं भाषमाणोऽप्यन्तर्वर्तित्वमात्रे गस. अनुमन्वान इव लक्ष्यते, तदपि तदुपस्तम्भकश्रौतप्रामाण्यानुपलम्भादेवाऽप्रमाणं द्र. ।

[p]) **उभे विदथे** इत्येतदन्वयी कप्र. (वैतु. सा. **विदथे** इत्येतत् स२ इत्येवं भ्रान्तः सन् द्यावापृथिव्याक्षेपशरणः; PW. प्रमृ. च **अन्तश्चरति** इत्येवमनुपात्तस्वरमाख्यातं साधुकाः सन्तो **दूत्यं√चर्** इत्यस्या साध्व्या वाचोयुक्त्याः स्थाने पुनरुक्तदुष्टामिव सतीं **दूत्यम् अन्तश्√चर्** इत्याकारिकां वाचोयुक्तिं प्रवर्तयितुकामाः) ।

[q]) **जने** इत्यधिकरणार्थोपबृंहणः कप्र. (तु. सा. PW. ; **वैतु.** GW. MW. **अन्तरिच्छन्ति** इति मन्वानौ) ।

१०१, ९; १३; १४[a]; ९, १२,
५; ७; १५, ३; ६७, २३[b];
६९, २; ७२, ७; ७३, ८[c];
७८, ३[d], ८२, ४; ८६, ४[e];
८७, ८; ८९, ५; ९६, ७[f];
१०७, १[g]; १०८, ६; **१०**,
५, ५[h]; ८, ७; २७, ९;
१७[i]; ३०, ४; ३९, १३;
४२, ८; ४५, ३; ४[j]; ४६,
६[k]; ४८, १०[२]; ६१, १; ७९,
३; ८०, ३; ८६, १५; १०१,
११[i]; १०६, ११; १२४, ४;
१२५, ७; १६२, ४; १७३,
१; १७७, २; १८३, ३; १८९,
२[i]; खि **४**, ४, ३; ५, ३५;
११, २; ३; ५, १६, ६; मा
३, ७†; **४**, १२; ८, २५;
३०[l]; **९**, ६†; **१०**, ७; **११**,
३१; **१२**, २†[m]; ६†[j]; ११[n];
१५[o]; १६; २०†; २१†; ३३†;
३९; **१३**, ३८†; †**१७**, ७०;
९४; ९९[२]; **१९**, २†[g]; ८७;
९४; **२०**, ९१; **२३**, ५१[२];
५२[२]; ६३; **२९**, १५†; **३१**,
१९; **३२**,४; †**३३**, ८५; ९०;
३४, २; ३; **३७**, १७†; **४०**, ५;
का **२**, ३, ५; **३**, १, ७†; **४**, ५, ४;
९, ४, ३; ५, ३; **१०**, २, ३†;
११, ४, ३; **१२**, ३, ४; **१३**, १,
२†[m]; ७†[j]; १२[n]; १६[o]; १७; †२,
३; ४; ३, ४†; १०; **१४**, ४, १†;
१८, ६, ६†; †**१९**, १, ७; १२[२];
२१, १, २†[g]; ६, ८; १५; **२२**, १,
४; **२५**, ९, ७[२]; ८[२]; १०, ११;
३१, ३, ४†; **३५**, २, ३; ३, ४;
३७, ३, ४†; **४०**, १, ५; तै **१**,
३, †१४, २[j]; ७; ४, ४५, २;
५, ३, १†; ७, ७, २†, ८, १२,
२; २२, ५†; **२**, १, ११, ५†;
४, १३, १¶; ५, २, ३¶;
४, १, ३, २; ९, ३[२][o]; १०, ५;
२, १, २†; ४; ५†; †२, १;
२, ३, ३; ९, ६†; ३, ११, १[p];
६, ५, ९; ७, २†; ७, १२, ३;
१३, २[q]; **५**, ७, ९, १; **६**, १,

---

[a]) =सपा. ऐआ २,१,१ माश २,५, १, ५। शौ **१०**, ८,३;४० विभे.।

[b]) अन्तर् आ>सपा. मा **१९**, ४१ प्रभृ. कापा ९४ : ९ तैब्रा **१**, ४, ८, २ ? अन्तरा ⌊सस्थ. ϕआवितम् टि. द्र.⌋ इति, लाश्रौ ५, ४, १४ अन्तरम् इति पाभे.।

[c]) सप्तम्यर्थोपबृंहणः कप्र. (वैतु. PW. GW. MW. अन्तरादधे इति स्वरतोऽनिष्टमर्थतोऽसंगतं च ब्रुवन्तः)।

[d]) अव्य. क्रिवि. (वैतु. GW. MW. च अन्तर् √आस्>अन्तः···आसीनाः इति)। अप्सरसां सोमाभिमुख्येन क्षरणे तदीयस्य मध्यवर्त्तित्वस्य तन्मुख्यसाधकत्वेन शिश्रावयिषितत्वान् मध्यात्मकस्याऽर्थस्य प्राधान्येनैव श्रुतिरुपयुज्येतेति (तु. सस्थ. टि. अभि)।

[e]) अन्तर् ऋषयः> सपा. कौ २, २३६ अन्तरिक्षात् इति पाभे. ? तुरीयपादे ये इति पदश्रुतेस्तु कौ. पाठः शोध्यः द्र. (तु. ORN.)।

[f]) तु. टि. ऋ **१**,१३२,३ (तु. सा. PW.; वैतु. GW. अन्तः पश्यन् इति विफलद्वैस्वर्यानुमानः)।

[g]) तु. सस्थ. टि. आ।

[h]) सप्तम्यर्थोपबृंहणः कप्र. (वैतु. GW. अन्तर्येमे इति)।

[i]) तु. टि. अन्तर् ऋ **३**, ४४, ३।

[j]) आधेयप्रधानम् अव्य. (तु. माश **६**, ७, ३, २ प्रभृ. PW.; वैतु. GW. अन्तर्-आ √भा इति द्व्युपसृष्टयभिमानः)। इह आ √भा सकर्मकः (तु. ऋ **१**, ४९,४; **२**,४,६; **३**,२५,३;४४,४ प्रभृ. माश. उद्गी. वें.; वैतु. भा. सा. उ. म. च)।

[k]) नापू. टि. दिशा. अव्य. (तु. सा. PW.; वैतु. GW. अन्तः···नि···सीदत् इति)।

[l]) आनञ्ज इत्याख्यातिकं योगं मन्यमानाः PW. प्रभृ. चिन्त्याः (तु. सपा. तै **३**,३,१०,२ यत्र तदेवाऽऽख्यातमनुपसृष्टं क्रियताचित् पाभे. अन्वितं भवति)।

[m]) तु. टि. अन्तर् ऋ **१**, ९६, ५।

[n]) अन्तर्भाविकस्य चाऽन्तर्भाव्यस्य च सत्तयोः पृथक् सत्योरेवाऽन्तर्वर्तित्वमात्रस्य विवक्षितत्वादुत्तरेण अभूः इति क्रिप. गस. न भवति (इह तु. टि. ऋ **७**, ९६, २)।

[o]) सप्तम्यर्थोपबृंहणः कप्र.।

[p]) =सपा. आपमं **२**, २०, ३० शांगृ **३**, १२, ३। अन्तर् अस्याम्>शौ **३**,१०,४;८, ९,११ आस्वितरासु इति पाभे.।

[q]) सपा. मा **१८**, ५५ का **२०**, ३, ५ अप्सु इति पाभे.।

२, १¶; ६, ३,४^{२}; ७, ५, ८, १¶; मै १, ३, ३९; ६, १^{२};†; १२¶; †११, १;६; २, १, ९; १२¶; ४, ३^{५}¶; ६, ८; ७, ३; ८^{५};†^{१}; ९; १०; १७; १२, ३[a]; १३, ५†; १०[b/c]; १३^{१}; ¶३, २,१^{४}; †^{२}; ६,६^{३}; ८, ३; ८^{४}; ११, ७†[d]; ४, ५, ८¶; ९; ६, ५^{१}¶; ८, ५; ९, ६†; १२?[e]; १०, ४†; ११, २†; १२, ५†; १३, ४; १४, ५†; ९; १४†; १६†; काठ २, १४; ४, १३; ५,३; ७, १२; १३†; ८, १७; ११, ६; १२; १३; १३, १४†; १४, ६†; १५, ६; १६, ३; ८^{५};†^{३}; ९; १०†; १६;२१; १८, ४; १५[f/a]; १९, ४; २८, १?[g]; २९,३[a]; ३१, १४; ३५, ३‡[h]; ४; ७; ३६, १५; ३७, ९; १४; १८†[a]; ३८, ३^{२}; ५[a]; †३९, १०[o]; १३; ४०, ३^{१};६†; ७^{१}†; क ३, ११; ६,२; ४†; ९¶; २५, १; २९, ४; ३०, २; ४८,४†; ५; ९; †कौ १, ४१७; ५१२[d]; ५८५; २, २९५; ५५०; ५५२; ६१९; ६५४; ६६३[d]; ७२१; ७२७; ३, ४, १; ५, ५; †जै १, ४०, ९; ५३, २[d]; ५९, ८; २, २,९; ६, ४; ३, २४, ११; ४०, २; ४३, ६; ८; ५०, ६; ५४, ४[d]; ५५, ४; ५९, १३; १९; ४, १६,३; ५; शौ १, २, ४[1]; ४, ४; ६,२†; १३, ३; ३०,३;२,१०, ५; ३१,५; ३२, १; ३, ६, ३; १०, ४; २०, ८‡[j]; २१, १; २^{१}; ७^{२}; २२, ३; ४,८,७; १०, ७[b];११, ३[b]; २६, ५; २८, ५; ३०, ७†; ५, ११, ८; ९; ३०, ११[k]; ६, १, २; ३१, २†; ७३, २; ८०, ३;८७, १[l]; १३२, १–५; ७, ३७, १[m]; ४४,१; ९२, १; ८, १, ११; ४, ३†; ९, ११; ९, ३, ६; २२; १३, ७; ९; १४, ९[b]; १५,१०; ११; १२†; १०, २, ७; ५, १५–२१; ७, १०; ८, १३[b]; २८; १०, २५; २८[n]; ११, २, ११; २४; ६, २०[o]; ७, ३[p]; ९, १; ६; १०, २;६; १२, १, १९; ३७; ६०; २, ३३‡; १३, १, १; २; ४०[o]; २, ३०; ३, १५; २०; १४, १, ३७; १७, १, ८; १३;

---

[a]) पाभे. अन्तर् तै ४, ७, १३, २ द्र. ।

[b]) सप्तम्यर्थोपबृंहणः कप्र. ।

[c]) सपा. अप्स्वन्तर् (मै. पै.) <> आस्वन्तर् (काठ. ⌊वैतु. BC. अप्स्वन्तर् इति⌋) <> शौ ३, १०, ४; ८, ९, ११ आस्वितरासु इति पाभे. ।

[d]) तु. टि. आ ऋ ९,१०७,१ ।

[e]) तु. संटि. यत्र मै. तैआ. च मूको. विकृतं परिच्छिन्नं भवति । इह मो ष्वस्त्यमस्माँस्तमस्यन्तराधाद् [=मा । उ । स्वस्त्यं (स्वस्त्वं वा ⌊तु. संटि. पपा.⌋) । अस्मान् । तमसि । अन्तः । आधात् इति पदानि] इत्येवं मूलतः सतस्त्रैष्टुभस्य पादस्य भूयानयं स्वरूपतिरोधायको विकारः द्र. ।

[f]) समुद्रे ··· अन्तः इति संबन्धः (तु. मा १८, ५५; वैतु. SI. अन्तः ··· देहि इति नितरामुपेक्ष्यः) ।

[g]) पाठ.? तु. क. ४४,१ (तु. संटि. च), मै ४,६,६ यदनु अन्तम् इत्येव प्राकरणिकमाभाति न यनि. ।

[h]) सप्तम्यर्थे कप्र. । सपा. ऋ २, ३५,१३ विभे. ।

[i]) इह द्वि. = ष., तदभिसंबद्धश्च कप्र. (=मध्ये, ⌊तु. सा.⌋) । यत्तु W. MW. अन्तस्तिष्ठति इति योगमाहतुः, तन्न । ऐकपद्ये युथा-योगे तिङ्निघाताभावे गतीयितस्यास्य निघातप्रसङ्गात् (पा ८, १, ३६ ; ७१) । न चात्र पराभिमतस्तिरोधापनार्थः संगच्छेत । मध्यवर्तित्वस्य शक्यमात्रस्याऽर्थस्य प्राकरणिकत्वादुपपत्तेः । सपा. पै २०,३३,६ अन्तरा इति पाभे. ।

[j]) सपा. ऋ ९, ११०, ९ कौ २,८४६ जै ३, ५८, २ मज्मना इति, मा ९,२४ का १०,५,३ तै १, ७, १०,१ काठ १४,१ माश ५; २, २, ६ सम्राट् इति, मा ९,२५ का १०,५,२ तै १,७,१०,१ मै १,११,४ काठ १४,२ माश ५,२,२,७ सर्वतः इति पाभे. ।

[k]) आधिकरणिकवृत्ति अव्य. (वैतु. WI. अन्तर्वदति इति) । [l]) तु. टि. अन्तर् मा १२,११ ।

[m]) हृदोऽधिकरणत्वस्य प्राधान्यश्रुतेस्तत्प्रत्यायकः कप्र. । स्वानभिमतः पराभिप्रायः द्विउ. टि. दिशा द्र. ।

[n]) सप्तम्यर्थोपबृंहणम् अव्य. (वैतु. WI. अन्तर्॰दीद्यति इत्युपसर्गभावमाख्यायुकः) ।

[o]) सप्तम्यर्थोपबृंहणः कप्र. (वैतु. WI. अन्तश् √चर्) ।

[p]) उत्तरेण √कृ इत्यस्य तिङ्वृत्तेन युयोजयिषया गतीभावः पराभिमतः (तु. WI.) नेष्टः । गर्भीकरणे न तु गर्भस्याऽन्तःकरणे श्रुतिस्वारस्याऽनुगमात् । एस्थि. वा. क्रिवि. द्र. ।

१८, ४, ८९; १९,३, २; २७,
१० ; ४८, १; ७२, १; †२०,
३४, १; १२ $; ४८, ५; ८९,
८; ९६, १४; १२६,
१५; १३३, ६ $; पै १,
८७,३; १०४,४[a]; १०९, ४‡[b];
२, १४, १; १५, ५; ३१,
६ ; ७७, ३ ; ३, ३, ४ ; १२,
१^{२}; २^{२}; ७^{२}; १५, ४;१८, ४;
२५, ५;३४, ९;४, २, ४; २५,
७; ३६, ४ ; ३७, ३; ५, १०,
९[c]; १५, ३; २२, ३; ६,७,२;
५; १०, ८; १२, ६ ; २१, १;
७, ३, ११^{२}; ११, ५†; ८, १,
८; ९; †१३, ६; ११^{२}; †१४,
१०; ९, १४, ६ ; २५, २; ९;
१०, ७, १०; ९, १[d]; १३,
४, ४; †७, ३; १२; १५,
२२, ४; १६, २, १ ; ९, ३†;
१९, १^{२}[a]; २२, १०[e]; ३९,
६ ; ४१, ४; ६२, ४[f]; ६६,
९†; ६८, १०†; †६९, १; २;
७४, ७; ९; ७५, २ ; ८२, १;
६ ; ८५, २; ६ ; १०२, २[c];
१०३, ५; १०५, १; १०६, ४;
१०९, ५; ८ ; १२९, १–१०;
१५०, ७; १५१,५; १०;१५३,
२ ; १५४, ४ ; १७, २, १० ;
४, ७; ६, ९; ८, १; १२,
१०; २९, १३–१६ ; ३३, ४;
१८, ४, ६†; १५, १;२; १८,
१०; २३, ७; ३१, ३; ३२,
१४† ; १९, १, २; ३, ५; ६,
५†;८,२; १०, ११; २९, १३;
३५, ३; ३७, ६; ४४, ३;४५,
१२†; ४६, १३ ; २०, ४, २;
२०,९;१०;१२,६.

अन्तः-कोशु[g]– -शम् शौ १, १४, ४; पै १,१५,४.

अन्तः√ख्या[h], अन्तुः···अुख्यत् ऋ ५, ३०, ९; अन्तुः···ख्यः ऋ १,८१,९; शौ २०,५६,६†.

¶**अन्तः-परिधि**[i]– -धि काठ ३५, १८; क ४८,१६.

*__अन्तः-पर्शु__[g]- > अन्तःपर्शव्यु[j]– -व्येन[k] मा ३९, ८ ; का ३९, ६,१.

अन्तः√पा (पाने)

अन्तः-पेय[l]– -यम् ऋ १०, १०७,९.

अन्तः-पात्र[m]– -त्रे शौ ११, ११, १५ ; पै १७,१२,१.

१**अन्तुः-पार्श्व**[n]– -र्श्वेन तै १,४, ३७,१[k].

---

[a]) पाभे. अन्तर् काठ ३९,१० द्र. ।

[b]) अस्मास्वन्तः>सपा. ऋ ६,७४,३ तै १,८, २२, ५ मै ४,११,२ काठ ११, १२ एतान्यस्मे इति, शौ ७,४,३, २ एतान्यस्मत् इति पाभे. ।

[c]) सप्तम्यर्थोपबृंहणः कप्र. ।

[d]) तु. टि. अन्तर् शौ ५,३०,१६ ।

[e]) तु. टि. अन्तर् शौ ११,६,२० ।

[f]) सपा. शौ १०,२, ३२ यक्षम् इति पाभे. ।

[g]) मलो. कस. सास्व. (पा ६,१,२२३) ।

[h]) गतिरिति वें. PW. प्रभृ. (वैतु. सा. यन्मते अव्य. क्रिवि. इवाऽन्वितम्) ।

[i]) अस. सास्व. (पा ६, १, २२३) । पाप्र. अस्माद् अनदन्तात् अस. यनि. सुबर्हता-चिह्नस्याऽनुपयोगः सुब्-लुग्विषयत्वात् । एवं तावदर्धजरतीयत्वमापतेद् अदन्तस्य अस. सुबर्हत्वं स्यान्नाऽपरस्येति । मा भूदेवम् । इह सर्वस्य अस. सुबर्हत्वं समानमास्थाय क्रिवि. अन्वय इति कृत्वा तस्य न. द्वि१ रूपं संपाद्यते । तेन यथायथं सुपोऽम्भावश्च लुक् च (पा २, ४, ८२ उउ.) प्रवर्त्तते । एस्थि. अपि यददन्तस्यैव अस. तृ. पं. सप्त. च रूपसंपत्तिर्भवति नापरस्येति तत् प्राग्वक्तृप्रवृत्त्यधीनं वाचोयुक्तिवैशिष्ट्यं यथोपलम्भं निर्देष्टव्यं न पर्यनुयोज्यम् ।

[j]) =[अन्तःस्थित-] पार्श्वास्थि-विशेष- । तात्रजातिकेऽर्थे यः प्र. उसं. (पा ४,२,९४) । तत्स्वरः ।

[k]) सपा. °र्शव्येन (BC. °पार्श्व्येन इति) <> °पार्श्वेन (तैआ ३,२१,१ च) इति पाभे. ।

[l]) =[सुरायाः] अन्तःस्थित-रस-, अन्तःपान- । गस. यदन्ते कृत्-स्वरः प्रकृत्या (पा ६, १, २१३ ; २, १३९) ।

[m]) अस. सास्व. । इह तृतीया- (पा २, ४, ८४) इति सप्तम्या अम्भावाऽभावविकल्पो भवतीति विशेषः द्र. । (वैतु. सा. द्वे पदे इति मन्वानः स्वरतश्चिन्त्यः) ।

[n]) यथा अन्तर्-धा– प्रभृ. समासेषु अन्तर् इत्यस्य निपातभावोऽभिनिष्पन्नतमो भवति तथेहापि भवतीत्यभिसंधाय अन्तर्गतार्थे तत्-प्रयोग इति कृत्वा मध्यमपदलोपः प्रास. वा स्यात् तदभिनिर्वृत्तपदार्थान्तरार्थप्राधान्ये समानाधिकरणः बस. वा स्यात् । एवं चोभयथा पूप. प्रकृतिस्वरं समानमुपपद्येतेति दिक् ।

२[c]अन्तः-पार्श्व[a]-

अन्तःपार्श्व्य[b]- -र्श्व्यम् मा ३९, ९; का ३९,७,१.

¶अन्तर्-अग्नि*[a]- -ग्निः काठ ८, ४[o]; क ६,९.

¶अन्तर्-अवचारिन्[d]- -णम् तै ५, ४,३,४.

¶अन्तर्-आत्मन्[a]- -त्मन् मै १, ९,३; काठ ९,११.

¶अन्तर्-आत्म*[a,e]- -त्मम् काठ २८,५; क ४४,५.

¶अन्तर्-आधान[f]- -नाभ्याम् तै ६,५,९,२.

अन्तर्-आभर[g]- -रः ऋ ८, ३२, १२.

ϕअन्तर्-आहित[h]- -तः ऋ ९,७०, ५.

¶अन्तर् √इ, अन्तरेति तै २, ६, ९, ८; ३, १, ७, २^{2}; ३^{2}; २, ३, ४; ५, १, १०, ४; २, ८, ४; ७, ८,१; २; ६, १, ८, ५; ४, ६, ३; ६, ३,३; मै १, ८, ७^{2}; ४, ८,४; काठ ९, २^{1}; १४, ९; २०, ४[i]; २३, ९; २५, ९; २९. ३; ३७, ११; क ८,५^{2}; ३१, ६[i]; ३६, ६; ४०, २; ४५, ४; अन्तरेति तै ५, ७, ८, १; ६, १, ५, ५; मै १, ११, ९; अन्तरितः तै ३, ५, ९, १; अन्तर्यन्ति तै ६, ४, ११, २; ७, १, ३,१^{2};२^{1};३; मै १, ७. ४; काठ २७, ९: ३१, १२; क ४७, ११; अन्तर्युन्ति तै ५, ३, १, १; ७, १, ३, १^{1}; २^{2}; ३; मै ३, ७, १; ४, ५, १; अन्तः ···यन्ति मै ४, ६. ४; अन्तरायन् तै २, ६, ८, ३; ६. ५, ६, ३; मै ३, ३, ४; अन्तरियात तै ५, ६, १०, २; ६. १, ४, ५; ५, ४^{2}; मै १, ७, ३^{2}[j]; ४[j]; ३, ७,२;१०; ४,६, १; काठ ९, १^{4}[j]; २^{1}[j]; २२, ४; २३, ९; २६, ३; २७, ५; २८, ८[k]; क ३६. ६; ४२. ५; ४४, ८; अन्तरियात तै ६, १, ५,४; मै १, ७,३^{2}; ४; ३,७,२. अन्तरेष्यामि तै ५, ७,२६, १; मै ३, ७, ८; अन्तरेष्यामि मै ३,७,८.

अन्तर्-अय-, अन्तर्-आय- अन्°.

$अन्तर्-इत,ता- -तम्[l], -ताः का १, ८, ३; तै १, १, ८,१. [°त- अन्°].

अन्तर्-इति[m]- -त्यै मै ३, ७, ८; ८, ८^{2}[n]; १०,१^{1}; ४,३,४. [°ति- अन्°].

अन्तर् √ई[o], †अन्तरीयंत ऋ १, ३५, ⌊९; १६०, १⌋;३, ३,

---

a) मलो. कस. सास्व. (पा ६,१,२२३)।

b) =अन्तः-पर्शव्य- टि. द्र.।

c) विसर्गरहिते मुपा. शोधोऽपेक्षितः।

d) गस. कृत्-स्वरः प्रकृत्या। उप. अव √चर् + ताच्छीलिकः णिनिः प्र.।

e) समासान्ते टचि टेर्लोपः अमादेशश्च (पा ५,४,१०८; ६,४,१४४; २,४,८३)।

f) विप. (⌊अन्तःखलीन-⌋ अश्व-)। बस. उप. नाप.।

g) विप. (इन्द्र-)। प्रथमम् उप.गस. <आ √भृ इत्यस्मात् कर्तरि अजन्ते थाथादि-स्वरः। ततः यनि. पूप. तस. सास्व. च (तु. सं-भर-; वैतु. पपा. अन्तर-आभर- इति यदनु क्रिवि. पूप. मा भूत् कर्म च पूप. स्यादित्यत्र तु. सजातीयान्तराणि वृष-भर-, वाजं-भर-, सुतं-भर-, सहस्र-भर-, पुष्टिं-भर-, हरिं-भर- प्रभृ.)। यत्तु वें. सा. एतदनुवादिनौ सन्तावपि उप. आच्छादनार्थे √भृ इतीवाऽऽहतुः, तन्न। अर्थासङ्गतेश्च, ऋ २,९,१ प्रभृ. अन्यत्र तदीयाऽन्यथोक्तेश्च; अन्तरा-भर-⌋ इति PW. GW. ORN. प्रभृ. ⌊यत्राऽर्थभेदे सति यनि. अपेक्षयाऽऽडम्बरायितमिव प्रतीयेत⌋।

h) कर्मणि क्ते अनन्तरगति-स्वरः (पा ६, २, ४९)। गतिद्वययोगः द्र. (वैतु. वें. सा. अन्तर्···हितः इति आ···हर्षते इति च; GW. आ···हितः इति, अन्तर् अव्य. इति च)।

i) पाभे. अनन्तरित्यै तै ५,२,५,३ द्र.।

j) सपा. क ८,४^{4};५^{2} ?अन्तर्यात् इति पाभे.।

k) सपा. मै ४,७,४ अपिहन्यात् इति पाभे.।

l) पाभे. पुरापूतम् टि. द्र.।

m) भावे क्तिनि पूप. प्रकृतिस्वरम् (पा ६,२,५०)।

n) सपा. काठ. २५,९ अपहत्यै इति पाभे.।

o) पाप्र. √ई(गतौ) इति दिवा. आत्म. पृथङ् निरदेशि। √इ इति वा स्यात्, तस्यैव श्यनि सार्वधातुके सत्यपि दीर्घः उसं. (पा ७, ४, २५ ⌊तु. WSR.⌋)। √इ इत्यस्य यङ्-वृत्तमिति GW. MW. च, तच्चिन्त्यम्। आद्युदात्तत्वानुपपत्तेः (तु. ऋ १, ३०, १८; १४४,२ ⌊यदपीह कर्मणीति, तदपि तत एव हेतोर्दुर्वचम्⌋;

६; ४,८,४; ९, ८६, ४२; मा ३४, २५ ; का ३३, १, १९ ; काठ १२, १५; अन्तः···ईयते ऋ ३,३,२; अन्तः···ईयसे ऋ २,६,७.

अन्तर्-उँष्य- दशन्°.

अन्तर् √गा, †अन्तः···जिगाति ऋ ७,४,१[a]; मै ४,१४,३; काठ ७,१६.

अन्तः···गात्[b] ऋ ३, ३१,२१; ¶अन्तरगाम् मे ४,७,६; काठ ८,१३;२९,७; क ८,१;४५,८.

¶अन्तर्-गो(ष्ठ>)ष्ठा[c]- -ष्ठासु मै ४,२,११.

अन्तर्-दाव[d]- -वे शौ ६,३२,१; पै १९,११,६.

अन्तर्-देश[e]- -शाः काठ ३३, ४ ¶; शौ ८, ८, २२; १०, ६, १९; पै १६, ३१, २; ४४, १; -शात् शौ १५, ५, १; २; ४-१३; -शान् शौ १५, ६, २४; १४, २३; -शेभ्यः शौ ४, ४०, ८; ५, १०, ७; १५,५,१४; १५; पै १७,२२,१. [°श- स°].

अन्तर् √धा, >दधा, ¶अन्तर्धत्ते ते ३, २, ९, १[1]; २; ५, १, १०, ३: ४, ४, ४; ६, ४, ६, १; २; मै १, ४, ६; ३, २, १; ३, ६; ६, ३; ४, ४,४; ५, ६; काठ १९, ११; २१,७;२६, १०; २७,‡२; ३२, ५; क ३१, १[1]; ४१, ८ ; ४२, २ ; ४७, ८; ¶ अन्तः···धत्ते तै ५, ४, ४, ४[2] ; काठ २१, ७[1]‡[1]; ¶अन्तः (धत्ते) तै ५, ४,४,४; काठ २१, ७; ¶अन्तर्दधाति तै २, ६, ५, ३; ३, ५, ५, २; ६, ५, ६, ४ ; मै १, ४, १३; ३, ६, २; ९, ३; १०, १; ४, ६, ९ ; काठ २६, १; २८, ६; क ४०, ४; ४४, ६; ¶अन्तर्दधाति ते ५, ५, ७, १ ; मै ३, ८,६; ४, ४, ४; काठ २८, ६; अन्तः···दधाति पै १८, २५, ७‡[g]; ¶अन्तर्धत्तः काठ २७, ७; ¶अन्तर्दधति मै ३, ६, १; अन्तर्दधे शौ ८, ५, ६; १७, १, २९; पै १६, २७, ६; १८, ३२, १२ ; अन्तः[2]····दधे मै १, २, १; ३, ६, ३; काठ २, १; क १, १३; अन्तर्दधामि मा ७, ५ ; का ७, २, २ ; मै १, ३, ५; काठ ४, १; क ३, १ ; अन्तः···दधामि मा ७, ५; का ७, २, २; मै १, ३, ५ ; काठ ४ , १ ; क ३ , १ ; अन्तः[2]···दधामि ते १, ४, ३, १; ६, ४, ६,२; †अन्तः····दधताम्[h] ऋ १०,१८, ४; मा ३५, १५ ; का ३५, ४, १६ ; अन्तर्धेहि शौ ११, १२, ४ ; अन्तः·····धत्तम पै १, १०९, ४‡[i]; ¶अन्तर्दधाम काठ ७, १०; क ५, ९ ; ¶अन्तरधत्त ते ६, ४, ६, १: काठ २३, १; क ३५, ७; ⌊अन्तः···अदधात ऋ ६, ४४, २३ ; अन्तः·····अदधात् ऋ १०, ५४, ६⌋। ¶ अन्तरदधत मै ४, ५, ६ ; काठ २०, ५[j]; २६, १० ; क ४१, ८; ¶अन्तरदधुः काठ

१९७, ७; २, ६, ७; प्रभृ.)। यनि. उपसृष्टत्वे सा. त्व् अव्यभिचरिताऽनभिमतिर्विमृश्या भवति। देशमात्रतो मध्यभवत्वेन √इ(ई) इत्यस्यार्थो न विशेष्येत दूतक्रियाप्रकारकत्वेन चासौ विशेष्येतेतिदर्शनात् तस्य चार्थविशेषस्योपसर्गधर्मिणैव अन्तर् इत्यनेन सुद्योतितत्वाद् यनि. तूपपन्नं द्र.।

[a]) तु. वें. GW ; वैतु. सा. गत्यभावः।

[b]) कृष्णान् इत्येतेन पदेनास्याऽऽख्यातस्य शुद्धस्य सतः सकर्मकता द्र. (तु. वें. PW. प्रभृ.; वैतु. सा. णिजर्थमन्तर्भावुकश्चाऽन्तर् इत्येतत् पृथग् अव्य. इतीवाभिधायुकश्च ⌊तदभिमतेऽस्मदनभिमते चाऽन्तर्धानाऽर्थे तथा अव्य. सतोऽस्य सामर्थ्याभावादित्यभिसन्धिः⌋)। [c]) विप. (गो-)। बस. पूप. प्रकृतिस्वरम् (पावा २,२,२४; पा ६,२,१)।

[d]) पारे मध्ये (पा २, १, १८) इत्यत्र पूप. ङसं. अस. सास्व. (पा ६, १, २२३)। इह तृतीया· (पा २, ४, ८४) इति सप्तम्या अम्भावाऽभावविकल्पो भवति।

[e]) मलो. कस. सास्व. (पा ६,१, २२३)।

[f]) पूर्वेण कुर्वीत इत्याख्यानेन संबन्धमिच्छुः प्राकरणिकम् यनि. योगं तिरस्कुर्वन् SI. उपेक्ष्यः।

[g]) सपा. ऋ ५.२,१ विभे.।

[h]) तु. उद्गी. वें. सा. GW. प्रभृ.। =सपा. माश १३, ८, ४, १२ आगृ ४,६,१०। शौ १२, २, २३ पै १७, ३२, ३ तैब्रा ३, ७, ११, ३ तैआ ६, १०, २ आपश्रौ ९,१२,४;१४,२२,३ आपमं २,२२,२४ तिरो···दधताम् इति पाभे.।

[i]) सपा. ऋ ६,७४,३ विभे.। [j]) सपा. तै ६,२, १,६ मै ३,२,६ क ३१,७ अपाघ्नत इति पाभे.।

२८, ६; क ४४, ६; ¶अन्तर्दधीत तै ६,४,९,४; ¶अन्तर्दध्यात् तै ५, ५, ७, १[a]; काठ ८, १०; २६,१; क ७, ६; ४०,४.

¶अन्तर्धीयते मै ३,९,४; काठ ३४,५; ¶अन्तर्धीयेत काठ ३५, १६; क ४८,१४.

अन्तर्-दुधान[b]– -नाः शौ ५, २८,८; पै २,५९,६.

अन्तर्-धा[c]– -धाः पै १, १०२,३.

अन्तर्-धि[d]– -धिः मै ४, ९, ४; शौ १२, २, ४४; पै १७, ३४,५.

अन्तर्-हित, ता[e]– -¶तः तै ६, १, १, १; मै ३, ६, १; ६^{२}; काठ २२, १३; २३, ३^{१}; पै १३, १२, ३; ४^{२}; ६; -तम् ¶काठ ८, ५; ३५. १६; ¶क ७, १; ४८, १४; शौ १९, ४२, १; पै १३, १२, १; ३; ८; १३; -ताः ¶मै १, ८, ३; १०, १७^{२}; ¶काठ ३६, १२^{१}; शौ ११,११,१६; पै १३, १२,१;५^{२};७^{१};८;९^{१};१२^{१}; १३; -ते पै ८, ९, ५?[f]. [°त- अन्° संवत्सर°].

¶अन्तर्-हिति[g]– -त्यै तै ५,२, ४, ४; ६,६,३,५; काठ १०,५; २०,५[h]; २३, १; क ३१, ७[h]; ३५, ७. [°ति- अन्°].

¶अन्तर्-मांस[i]– -से काठ २३,३.

अन्तर् √यम्, >यच्छ् (यमने), अन्तर्यच्छ ऋ १०,१०२, ३; मा ७, ४; का ७, २, १; तै १, ४, ३,१;२,२, १२,४; मै १, ३,५; काठ ४, १; २७, २; क ३, १; ४२,२.

अन्तर्-याम[j]– -मः मा १३, ५५; १८, १९; का १४, ७, ४; १९, ७, १; तै ४, ३, २, १; ७, ७, १; ¶६, ४, ६, १; ३; मै २, ७, १९;११, ५;¶४, ५, ५;६; ७,१; काठ १६, १९; १८, ११; ¶२७, २^{२}; ३; २८, ७¶; क २५, ९; २८, ११; ¶४२, २^{२}; ३; ¶४४, ७; -¶मम् मै २,७, १२$; ४,५, ६^{२}; काठ २७, १; क ४२, १; -मस्य तै ३, १, ६, २; ६, ४, ६, १¶; -मात् मा १३, ५५; का १४, ७, ४; तै ४, ३, २,१; मै २, ७, १९; काठ १६, १९; क २५, ९; -मे मा ७, ५; का ७, २, २; तै १, ४,३, १; ६, ४, ६, ३; मै १, ३, ५; काठ ४, १; क ३, १; -¶मेण तै ६,४,६,१; क ४१,८;-मेन मै ४,५,६; काठ २६,१०. [°म-२उपांशु°].

¶अन्तर्याम-त्व– -त्वम् तै ६,४,६,१.

¶अन्तर्याम-पात्र[k]– -त्रम् मै ४,८, ८; काठ २७,२^{२}; २८, १०^{२}; क ४२, २^{२}; ४५, १^{१}; -त्रेण तै ६, ५, ७, १^{१}; मै ४, ७, १; काठ २८, ७^{२}; क ४४,७^{२}.

?¶अन्तर्यात्[l] क ८,४^{४};५^{१}.

¶अन्तर्-लोम[m]– -मम् मै ३,६,६; काठ २३,३.

अन्तर्-वत्– -वन्तः मै ४,२,१३¶; -वान् मै ४,२,१¶; शौ ९, ४, ३; पै १६,२४,३.

---

a) सपा. मै ३,४,८ अवगृह्णीयात् इति पाभे. ।

b) गस. शानजन्ते कृत्-स्वरः प्रकृत्या ।

c) गस. कृत्-स्वरः प्रकृत्या (पा ६, २, १३९) । पूप. उपसर्गवद्भावे उप. स्त्रियां भावे अङ् प्र. (पावा १, ४, ६५ ; पा ३, ३, १०६) । प्र. स्वरः । टापि स्वरेऽविशेषः ।

d) उप. किः प्र. (पा ३,३,९२) । शेषं नापू. टि. द्र. ।

e) अन्तर् (पा १, ४, ६५) इति गतित्वे गस. कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६,२,४९) ।

f) पाठः? तु. सपा. शौ १९,४२,१ °हितम् इति पाभे. ।

g) तु. टि. अन्तरिति- ।

h) सपा. मै ३,२,६ अपहत्यै इति पाभे. ।

i) विप. (कृष्णाजिन-) बस. पूप. प्रकृतिस्वरम् (पा६,२,१) ।

j) =ग्रह-विशेष- ⌊तात्स्थ्यात्⌋ सोमरस- ⌊काठ २७, १⌋; अवलम्ब-साधन- (कृष्युपकरण-विशेष- ⌊मै २,७, १२; C. आपश्रौ १६, १८, ४⌋) । गस. उप. करणाधिकरणयोः घञ् प्र. । थाथादि-स्वरः (पा ६,२,१४४) ।

k) कस. सास्व. (पा ६,१,२२३) ।

l) मूलतः अन्तरियात् इत्यस्य रूपस्य सतः (तु. पाभे. संटि. च) अन्तर्यायात् इत्यस्य वा रूपस्य सतो लिपिविकारमात्रमेतद् इति कृत्वा मुपा. शोधाऽवकाशः । सपा. मै १,७,४ अन्तरियात् इति पाभे. ।

m) बस. पूप. प्रकृतिस्वरम् । उप. समासान्तस्य अपः प्र. (पा ५,४,११७) पित्त्वान्निघाते स्वराऽभेदः । अकारान्तं वेह उप. (तु. टि. अज-लोम-) तेन च समासान्ताऽनपेक्षा स्यात् ।

अन्तर्वर्ती[a]- -¶ती काठ ७, १२[b];८,१०; क ७,६; -†तीः ऋ ३,५५,५; १०, ९१,६; कौ २, ११७४ ; पै १४, १, १७; -तीम् काठ ११,२¶.

अन्तर्वर्त्नी[a]- -र्त्नी मै ४, २, ९.

अन्तर् √वा > ?*अन्तर्-वा- > ?अन्तर्वा-वत्[c]- -वत् ऋ १,४०,७;६,८,३.

अन्तर् √विद् (ज्ञाने) > अन्तर्-विद्वस्[d]- -द्वान् ऋ १, ७२, ७.

¶ अन्तर् √वृत् > अन्तर्-वर्त[e]- -र्तः काठ २५,१०; क ४०, ३; -र्तान् तै ६,२,१०,७.

¶अन्तर्-वेदि[f]- -दि तै १, ७, ५, ३; २, ४, ९, २ ; ५, ११, २; ६, ६, ४, १ ; ७, ५, ९, ४; मै २, २, १ ; ३, ८ , ९ ; ९ , ४[२][g]; ४, १, ९; काठ २८, ६[१]; ३१, ७; ३४, ५; क ४४, ६[१]; ४७,७.

अन्तर्-हस्त[f]- -स्तम् शौ ७, ५२, २[h].

अन्तर्हस्त्य[i]- -स्त्यम् पै १९, ९,९[h].

अन्तश् √चक्ष्[j], अन्तः···चष्टे ऋ १, १९०, ७.

अन्तश् √चर् , अन्तः···चरति ऋ ३, ५५,८.

अन्तश् √छद् > छादि, अन्तश्छादयसि शौ ९, ३, १४; पै १६,

---

[a]) स्त्रियां ङीपि (पामवा ४, १, ३२) छन्दसि वैकल्पिको नुग्-आगमः (तु. नाउ.) ।

[b]) =सपा. माश्रौ १,५,२,३ प्रमृ. । तैब्रा १, २,१,१३ आपश्रौ ५,८,६ प्रमृ. अन्तर्वर्त्नी इति पाभे. ।

[c]) व्यु.? अन्तर्-वावत्- इति पपा. । तेन तत्र गस. उप. प्रकृतिस्वरः अभिप्रेतः स्यादिति कृत्वा उप. <(√वावद् <√वद्) इति वा (तु. सा. ऋ १,४०,७),<(√वावा <√वा) इति वा (तु. स्क. ऋ १,४०,७ सा. ऋ ६,८, ३) यङ्लुग्-वृत्तं सद् आद्युदात्तं (पा ६, १, १८९) स्यात् । वस्तुतस्तु अन्तर्वा-वत्- इत्येवं विभक्तुमर्हं सत् पपा. उक्तप्रकारेण विभक्तं स्यादिति सुवचम् (तु. पपा. यातु-मावत्- इति) । अस्मिंश्च यनि. विभागे अन्तर्वा- इति गत्युत्तर-कृत्-स्वरः प्रकृत्या द्वितीये स्थले √वावाद् इत्यस्यार्थासंगतेस्ततो निष्पत्तिर्नाऽऽद्रियेत । एवं √वावा इत्यतोऽपि निष्पन्नस्य सतो ह्रस्वोपधत्वं नोपपद्येतेति कृत्वा मृग्य एव सति मार्गान्तरे विजन्ते कृति प्रकृतिस्वरे सति पिन्निहतेन स्वराऽविशेषकेण मतुपा युक्तत्वं द्र. (तु. सा. ऋ १, ४०, ७)। प्रथमस्थलीयं रूपं क्रिवि. द्वितीयस्थलीयं च रूपं तमः इत्येतत्-समानाधिकरणमिति कृत्वैतत् संगमनीयम् । एतत् प्राति. =अन्तर्-वत्- (यद्र.) इत्येवं कृत्वा यद् उप. प्रकृत्यंशमन्यथासिद्धयित्वेव क्वचिद् व्याख्यानं कर्तुमिष्टं भवति (तु. ORN.), एवं च यदन्यत्र क्वचिद् (तु. GW. MW. NW.) उप. प्रकृतिप्रत्ययोभयोपेक्षापुरस्सरमिवैतद् अन्तर्- इत्यतो निष्पन्नं सदपि ततोऽभेदेनेव ग्राहयितुमिष्टं भवति, तदरुचिरं भवति । प्रकृतिप्रत्ययोभयसार्थकत्वे सत्येव प्रथमे स्थलेऽन्तःप्रश्वसितगतिमद् यथा स्यात् तथेति कृत्वाऽन्तर्विशालत्वपर्यवसानकस्य स्वारसिकस्यार्थस्य च (तु. PG २, २१४) द्वितीये स्थले तथैवान्तर्भिन्नत्वपरिणाम्यर्थस्य च (तु. गपू.) लाभदर्शनात् (तु. पंजा. वाअंदा- <*वावन्त इति) अप्रतिबद्धः, विशालः, असंहत इत्याद्यर्थ इति दिङ्मात्रमिह समकेति । विस्तरस्तु वैश. द्र. ।

[d]) गस. कृत्-स्वरः प्रकृत्या (तु. वें.)। यत्तु सा. पूप. 'द्यावापृथिव्योर्मध्ये' इत्येवं व्याचक्षाणः समासं विभजतीव, तच्चिन्त्यम् । उप. आख्यातांशस्य कर्माभिसंबन्धशैथिल्यप्रसङ्गाद् द्वि. अनुपयोगात् ।

[e]) गस. उप. कर्त्तरि अच् प्र. (पा ३, १, १३४) । अन्तरालच्छिद्रपूरकपदार्थवृत्तित्वं द्र. (तु. सा. ; वैतु. भा. अन्तर्वर्त्तनप्रयोजककर्तृ-वृत्तित्वं पश्यण् णिजन्तात् प्र. इच्छुः, MW. च अन्तर्वर्तनभाववृत्तित्वं पश्यन् घञा प्र. निष्पादुकः । वस्तुतस्त्व् अन्तरालवर्तिपदार्थोपयोगफलमात्रत्वमस्य पराभिमतस्य भावस्य द्र. [तु. K.]) । सर्वथाऽपि थाथादि-स्वरः (पा ६, २, १४४) यथायोगं चरितार्थयितव्य इति (तु. समानार्थं सप्रक्रियं च पंजा. पचर [<*अपि-चर-]) ।

[f]) अस. सास्व. (पा ६,१,२२३) । वा. क्रिवि. द्र. ।

[g]) सकृत् सपा. काठ २६,६ वेद्याम् इति पाभे. ।

[h]) सपा. °हस्तम् <> °हस्त्यम् इति पाभे. ।

[i]) स्वार्थे यत् प्र. ।

[j]) कर्मान्तश्चक्षणमभिप्रेतं स्यादिति कृत्वा गतिभावः (तु. GW.; वैतु. वें. सा. PW. प्रमृ. च चष्ट-स्थित्यभिप्रायतः अव्य. इति) ।

४०,१.

¶अन्तः-शर्[a,b]– -राः तै ५, २,६, २; ६,१,६,५.

अन्तः √श्लिष्

अन्तः-श्लेष[c]– -षः मा **१३**, २५; **१४**, ६; १५; १६; २७; **१५**, ५७; का **१४**, २, ११; **१५**, **१**, ५;४, ३^{२}; ८,५; **१६**, ७,१; तै **४**, ४, ११, १; मै २, ८,१२^{१}; **३**,२,३; काठ **१७**,१०^{२}; क **२६**,९^{१}.

¶अन्तः-श्लेषण[d]– -णम् तै ५, ४,२,१; मै **४**,६,५; –णाय काठ **२७**,१०.

अन्तष्-कोश*– -शः पै **२०**, २९,४.

¶अन्तः-सदस[e]– -सात्[f] तै ७, ३, १,३.

अन्तः √स्था, > तिष्ठ, अन्तस्तिष्ठाति[g] शौ **६**, ५३, २[h]; अन्तस्तिष्ठासि पै **१९**, ८, २[h]; अन्तस्तिष्ठतु[i] शौ **१**,२,४.

‡अन्तस्थुः शौ **१३**, १, ५९[j]; †अन्तःस्थुः[j] ऋ **१०**, ५७, १; पै **१७**,२५,२.

अ(न्-तॅ)न्तर, रा[k]– -रः ऋ **१**, ३१, १३; ४४, १२; **२**, ४१,

---

[a]) मलो. कस. सास्व. (पा ६, १, २२३) ।

[b]) यत्तु भा. < अन्तः √शॄ इच्छति, तन्न । प्रधानखण्डपातनार्थं शरणक्रियायां प्रवृत्तायां मध्येऽनायासेनैव पततां शकलानामभिप्रेतत्वात्तादृग्भिश्च तैः शरैर् अन्तर् इत्यस्य साक्षात्संबन्धाभावे सति तेषां पतनक्रियायास्तद् विप. स्यादित्येवं सुवचत्वात् । एस्थि. तस. सति मध्यमपदलोप एव न त्विह गस. कश्चिदप्यवसरः स्यादिति । यदपि BW. प्रभृ. इह २शर्– (यद्र.) इति उप. भवतीत्याहुस्तत्र तेषां प्रकरणाऽनवबोधजनितो भ्रम एव बीजम् ।

[c]) गस. भावे घञन्ते थाथादि-स्वरः । यत्तु उ. तस. इति कृत्वा उप. < कर्तरि √श्लिष् इत्याह, यच्च म. एतदनुविवदिषन्नपि उप. कर्मणि प्र. इति सा. भाष्यांशमनुब्रुवाणः (तु. सा. तै ४, ४, ११, १) व्यामिश्रणमिव करोति, तन्मन्दम् । इह सास्व. इति कृत्वा स्वरोपपत्तौ संभवन्त्यामपि नाउ. समानप्रक्रियत्वेन व्याख्यानार्हे प्राति. तदसंगतेर्दर्शनात् (तु. नाउ.) । अर्वाञ्चोऽपीह तस. च गस. च विवेकमकुर्वाणाः समानं चोद्याः स्युः ।

[d]) गस. ल्युडन्ते कृत्-स्वरः प्रकृत्या (पा ६, १, १९३; २, १३९) । यत्तु भा. बस. इतीव कृत्वा व्याचष्टे, तन्नाऽऽद्रियेत । पूप. प्रकृतिस्वरस्य दुर्वारत्वप्रसङ्गात् (तु. नापू.) ।

[e]) अस. समासान्तः टच् प्र. डसं. (पा ५,४,१०७) । चित्स्वरः ।

[f]) नाव्ययीभावात् (पा २, ४, ८३) इति सुब्लुगभावः पं. अमादेशाऽभावश्च । विविच्यमानस्य शब्दस्याऽपक्रमणक्रियामपेक्ष्याऽपादानकारकसामान्ये पं. द्र. (तु. पाम.; वैतु. भा. यन्मते ल्यब्लोपे कर्मणि पं. भवति) ।

[g]) नः (अस्माकम्) अन्तर् इति संबन्धमास्थायाऽसंबद्धे इवाऽऽपद्यमाने दुरितानि विश्वा इति पदे 'विनाशयन्' इत्यस्या आक्षिप्तायाः क्रियायाः कर्मीभावयन् सा. चिन्त्यः । परिग्रहणार्थान्तरभूते तिरोधापनार्थे अन्तर् इत्यस्य गतिभावस्य (पा १, ४, ६५) प्रागनुमतत्वात् ।

[h]) सपा. परस्परं पाभे.; शौ १२, २, २८ अतिक्रामन्तः इति, पै १३,९,१२ अपतिष्ठान् इति च पाभे. ।

[i]) रोगस्य चाऽऽस्रावस्य चोभयस्याऽधःकारकत्वेन मुञ्जस्य तन्मध्यवर्त्तिनी स्थितिराशंसिता भवतीति यत् सा. आचष्टे, तन्न । मध्यवर्त्तिनो मध्यवर्त्तयितव्ययोः परस्पर-संपर्कबाधकत्वेनैवोपयोग-परिसमाप्तिदर्शनात्तदुभयाधः-कारकत्वेनोपयोगासंभवात् । न चेह मुञ्जस्योक्तचरी रोगसामान्यविशेषमध्याऽवस्थितिराशंसिता भवत्य् अपि तु तदुभयञ्चान्यतः स्तोतॄंश्चान्यतोऽपेक्ष्य मध्येऽवस्थानमभीष्टं भवति येन मुञ्जप्रभावात् स्तोतॄनपेक्ष्य रोगस्य चाऽऽस्रावस्य च तिरोधापनं संसिध्येत् । एस्थि. 'अस्माकं स्तोतॄणां दृशो रोगं चाऽऽस्रावं चाऽन्तःस्थाय तिरोधापय' इति तात्पर्यं द्र. । ततः अन्तर् इत्यस्य गतिभावश्चेति दिक् (तु. W.) ।

[j]) अत्र नः इति द्वि३ न तु ष३ (वैतु. सा.) । तु. टि. अन्तस्तिष्ठाति ।

[k]) ३*अन्+आतिशायनिकः तरप् (=३*अन् ⌊गत⌋ तर- इत्येवं मध्यमपदलोप इव द्र.) । प्र. च पिन्निहतत्वं द्र. (व्यु. तु. *अव-तर–, उत्-तर–, *प्र-तर–, *वि-तर–) । यत्तु GW. अन्त- + (तरप् >)र इत्येवं व्यु. आह, तच्चिन्त्यम् । तत्र तत्र श्रुतौ तेनोपदिदर्शयिषितस्यान्तगतत्वपरिणत-समीपवर्तित्वस्वरूपस्याऽर्थस्याऽपेक्षयाऽन्तरङ्गभावाऽनुरञ्जितस्याऽर्थस्य प्राकरणिकतरत्वेन प्रतीतेरिति यावत् । बा. विप. द्र. ।

८; ६, ६३, २ (८, १८, १४)]; ६, ५,४; ८, १८, १९; १०, ५३, १; मा १९, १६; २०, ८२ †; का २१, २, ५; २२, ८, ३†; काठ ३५, १४†; क ४८, १३†; पै २,५८, २?[a]; ३; ६, २२, २१; २२; -रम् ऋ १, १०, ९; ६, ७५, १९; ७,१०१, ५;१०, ८२, ७; खि ३, १५, १२; ४, ५, ३७ †; ४०[i]†; मा १७, ३१ †; १९, ८२; २५,२[b]; का १८,३, ७†; २१, ६, ३; २७, २, १[b]; तै ४, ६,२, २†;५,१, १०, ३¶; मै २, १०, ३†; ३, ११, ९; १५, २[b]; ४, ८,८¶; काठ १८, १†; २०, १५†; ३८, ३; क २८, २† ; कौ २, १२२२^{२} †; शौ १, १९, ४†; २. ३०, ४^{२}; ७, १०५, १ ; पै १, २०, ४†; ५८, २; ७०, २; २, १७, ४^{२}; ७३, ५;५, १३,६[c]; ९,७, १२; १९, २९, ११ ; २०, ३५, ४; -रस्य ऋ [६, १५, ३; १०, ११५, ५ (६, १६, ३३)]; -रा ऋ १०, ९१, १३; मै ४, ३,५¶?[d]; -राः खि २, ६, ६[e];-†रान् ऋ ३,१८,२; काठ ३५, १४; क ४८, १३; -राम् ऋ १, १०४, ६; तै ५, ७, १४, १; काठ ५३, ४; -¶रे तै ७, २, ९, २; ३; मै ४, ८, ८; काठ २७, ५; ३४, ८^{२}, क ४२, ५; -रेण ऋ १०, ३३, १; खि ५, ७, ४, ८; तै ५, ७, १२, १; काठ ६, ७; ५३, २; पै १, ६५,२; -रैः ऋ ६, ६२, १०; -रौ काठ ३४,८^{२}. [°र- अन्°, अव°]

¶अन्तर-कोश[f]- -शे तै ३,४,१,४; काठ १३,१०.

¶अन्तर-त(र>)रा[g]- -रा तै ६, २,२,७.

¶अन्तर-तस्(:)[h] तै ६, १, १, ३; २, ११, २^{२}; ३; ३, ६,४; ४, ९, ३; ५; ७, २, १०, ४; मै ४, १, १२^{२}; ५, ४^{२}; काठ २५, ९; १० ; २६, १^{२}; ८ ; २७, १^{२१}; ३४, ११; क ४०, २; ३ ; ४^{२}; ४१, ६; ४२, १^{२१}.

¶अन्तरात्[j] काठ २२, १३; २३,३.

अन्तरा[k] ऋ ३, ४०, ९ ; ९, ८६, १३ ; १०, [८६, १६ ; १७]; ८८, १५; १३९, २; १६२, ४; मा १३ , २५ ; १४, ६ ; १५; १६; २७;१५, ५७;१७, ५९†; १९, ४१ ‡^{1}; ४७† ; २९, ६; का १४, २, ११; १५, १, ५; ४, ३^{२}; ८,५; १६, ७,१; १८, ५,१०†; २१,३, १२‡^{1}; १८†; ३१, १, ६; तै ¶१, ६, ७,; १;७, १,१; ¶२, ५, ११, १^{१}; ६, २,२;६,४; ३, ५, ४,२; ४, ४, ११, २;६, ३, ४†; ५, १, ११, २¶; ७, २, ३; ¶६, १, १, ५;२, ,६,२^{२}; ३^{१};७,१; ३; ८, ४[m]; ३, १०, ३; ५, १,४; ५; ¶मै १, ४, ८; १०; १२[n]; ५, ११; ६, ७; ८, ६; ७[o]; ९; ९,८;१०,१७; २, १, ११; २, ५; ३, ६^{३};८†;५,९;८, १२^{२}\$; १०, ५\$; ३, २, ७; ३, ४; ७, १०; ८, ४^{३}; ५^{२}; ८^{२}; १०; ९,४; १०,४;६; ११, १०\$‡^{1}; १६,२\$; ४, ५,६; ६,३^{२}; ५^{४}; ८, ३; १२, ३† ; काठ ७, ७;

---

[a] अन्तरा (अव्य.) इति शोधः (तु. मूको.) ।

[b] सपा. तै ५, ७, १२,१ काठ ५३, २ ब्राह्मम् इति पाभे. ।

[c] पाठः? सपा. पै १४,३,१० अन्तरिक्षम् इति पाभे. ।

[d] अन्तरा इति शोधः (तु. प्रकरणम्) ।

p) सपा. तै ५, २,१,७ उत्तरेद्युः, पूर्वेद्युः इति, काठ १९,१२ क ३१,२ अपरेद्युः, पूर्वेद्युः इति च पाभे. ।

q) कन् प्र. षत्वं च (पा ५, २, ८१; ८, ३, ५९) । यद्वा ?अन्वेजुकम् इति पाठः स्यात् (तु. मूको. अन्वेदुकम् इति) ।

?अन्यो(न्य-उ)दर्*[a]->अन्योदर्य[b]- -र्यः ऋ ७,४,८.

?अन्योऽन्य-श्रैष्ठ्य[c]- -ष्ठ्याय क ३८,२.

?अन्यन्नद्[d] पै ५,३१,६.

अ-न्यस्त[e]- -स्ते?[f] मै ४,५,१.

?अन्यात् पै १७,४०,९[g].

?अन्येन[h] पै १०,४,८.

?अन्येषु पै १६,२३,३.

अ-न्यो(नि-ओ)कस्[i]- -काः शौ १२,२,४; पै १७,३०,४.

अन्वं(नु√अं)श्, अन्वानशे शौ ४, २५ ,२; †अनु…आनशे ऋ १,८४,६[j]; कौ २, ३००; जै ३, २४, १६; पै ४, ३४, २; अनु…आनशुः ऋ १, ५२, १४[k].

अन्वक्त- अन्व(नु√अ)ञ्ज् द्र.

अन्व(नु√अ)ज्, अन्वज[l] तै ७, ४, १९,१; काठ ४४,८.

अन्व(नु√अ)च्, ञ्च् >अन्वच्, ञ्च्[m]- -नूचः[n] ऋ ३, ३०, ६; -†नूचः[o] काठ १५,७; शौ ३,१, ४; पै ३, ६, ४; -न्वक्

---

[a]) कस. सास्व. (पा ६,१,२२३)।

[b]) तत्रशयितीयः यत् प्र. ओकारश्चोदात्तः उसं. (पा ४, ४, १०८)। यद्वा, उदुर-> उदर्य- इति तत्रभवीये यति प्र. निष्पन्नं भावप्रधानं सद् उप. स्यात् (पा ४, ३, ५५; [तु. पा ५, १, १२४]) । एवं तावद् बस. पूप. प्रकृतिस्वरं स्यात्। 'अन्यद् भिन्नम् उदर्यम् उदराभिसंबन्धः प्रभवो यस्य' इत्येवं च व्याख्यानं सुवचम्। एस्थि समान- (पा ४, ४, १०८) इत्यनुशासनमन्यथासिद्धायताम् । समानोदर्य- इत्यस्यापि समाननिष्पत्तेः संभवादिति । यत्तु अ° इत्याद्युदात्तम् PW. आह, तन्नितान्तमप्रमाणमित्युपेक्ष्यम् ।

[c]) पाठः? शाखान्तरीयविसंवादात् (तु. मै ३,७,१० अन्योन्युस्य श्रैष्ठ्ये इति; तै ६,२,२,१ अन्योन्युस्मै श्रैष्ठ्याय इति)। अत इहापि अन्योऽन्यम् इत्येवं सतोऽनुस्वार-च्युतिः संभाव्येत। एस्थि. च स्वराङ्कितानि निगमान्तराण्यनु अन्युः। अन्युम् इति पदद्वयीव निर्दिश्येत (वैतु. RI. यनि. इति)। सपा. काठ २४, ९ अन्योऽन्यस्य श्रैष्ठ्याय इति पाभे.।

[d]) अत्यू अन्यं (ययौ क्रममित्) इत्येवं मुपा. सुशोधः द्र.।

[e]) तस. नञ्-स्वरः।

[f]) अत्र मुपा. -स्तोऽस्य इत्येवं मूलतः सतः -स्तेऽस्य इति यनि. प्रमादमूलं विकारमात्रं संजायमानमनुपदं मूलतः यज्ञः इत्येवं श्रूयमाणस्य सतः यज्ञे इत्येवं विकारान्तरनिमित्तमभूदिति संभाव्येत । अन्यथा हि मुपा. अपां परिहरणान्निष्पादयितुमिष्यमाणो विश्वदेवात्मिकाभ्योऽद्भ्यः संप्रत्तपूर्वस्य यज्ञस्याऽन्यासलक्षणो लाभ एवास्पष्टप्रत्ययः संजायेतेति (तु. उपरि श्रूयमाणं नप्-पुरस्कृतमेवाऽप्-परिहरणस्य रक्षोऽनन्वायलक्षणमपरं फक्कम्) । एस्थि. इह च सस्थ. यज्ञ-> -ज्ञे इत्यत्र च यथावत् शोधः द्र.।

[g]) वयोवद् अन्यात् > सपा. शौ १२, ३,४९ वयोवय आयुदेव इति पाभे.।

[h]) *मन्द्य->-न्द्येन इति शोधः (तु. १मः मन्त्रः [यत्र मद्येन इति पाठः]) । सस्थ. ?इरया>इरायाः इति शोधः।

[i]) तस. नञ्स्वरः। उप. बस. यद्व.।

[j]) सा. सादृश्ये कप्र. इति कृत्वा √अस् (भुवि) इतीममाक्षिप्य तृतीयचरणान्तेन प्रथमं वाक्यमाह, तुरीयचरणस्थे वाक्यान्तरे च केवलं त्वा इति पदमनुवर्तयति न तु त्वा। अनु इति पदद्वयम् । तच्चिन्त्यम्। तथाहि, सादृश्यार्थः खलु अनोर् अस. गतित्वेनाऽऽख्यातयोगे च प्रसिद्धो भवति न तु तथा तस्य लक्षणाद्यर्थवतः कप्र. सतः । अतोऽध्याहारमुखेनाऽपि गतित्व एव पर्यवसानाद् वरमेव ततः आनशे इतस्योभयोरपि वाक्ययोरन्वयस्तेन चानोर्गतित्वेन योगः (तु. ऋ २, १६, ३ यत्रत्या सकक्षा श्रुतिरिममेवाभिसन्धिं निःसन्देहतामापादयति) । एवमपि PW. अनोर् गतित्वमदर्शुकश्चिन्त्यः।

[k]) अनेवंदर्शी GW. अन्यथाऽर्थवादी भवति गतित्वभिन्नगतेरभावात् अनोर् इति यावत्।

[l]) सपा. मा २३, २१ का २५, ६, १ सम्…चारय इति पाभे.।

[m]) गस. क्विन्नन्ते कृत्-स्वरः प्रकृत्या (पा ३,२, ५९; ६, २,१३९)। विन. क्वचित् वा. क्रिवि. अपि द्र.।

[n]) भस्याऽकारस्य लोपे दीर्घत्वं विभक्तिस्वरश्च (पा ६, ४,१३८;३,१३८;१,१७० [वैतु. नाउ. रूपम्])।

[o]) पूप. अन्तोदात्तः (पा ६, १, २२२ [वैतु. नापू. रूपम्])।

ते १, १, २, १[a]; -¶न्वङ् मै २, ४, ३[२]; काठ २३, १[b]; २५, १०; क ३५, ७[b]; -¶न्वञ्चः ते २, २, २, ५; ७, ४, २, ३; -न्वञ्चम् ते १, ८, १२, ३; मै २, ६, ९; ४. ४, ३; काठ २३, १¶[c]; क ३५, ७¶[c]; शौ ६.१३४, ३; पै ५,३३,६; -न्वञ्चौ ते २,६, ६,४¶.

१†अनूची[d]- -ची ऋ १, ११३,२; कौ २,११००.

२अनूची[e]- -ची ते ५, ५, ७,२¶; शौ १०, १०, १०; पै १६,१०७,१०.

अन्वग्-गत्[f]- -गतः काठ ३९, १[g].

अन्वग्-भाव[h]- अन्°

१¶अनूचीन[i]- -नम् ते ६,३,९, २; मै ३, ८,९.

२†अनूचीन[j]- -ना ऋ ४, ५४,२; मा ३३, ५४; का ३२, ४,११.

¶अनूचीना(न-अ)हु[k]- -हम् ते ७,१,५,४.

२अनूच्य[l]- -च्ये शौ १५, ३,५.

अन्व(नु√अ)ञ्ज्>अन्वक्त-घृत°.

?अन्वतः[m] पै ९,४,१०;१२.

¶अन्व(नु-अ)ति√मुच्, अन्वतिमुच्यते मै ४, ७,७[n].

¶अन्व(नु-अ)ति√(सि>)षिञ्च्, अन्वतिषिञ्चति मै १, ८, ९; ४,८,९.

¶अन्व(नु-अ)त्या(ति-आ)√वृत् >वर्ति, अन्वत्यावर्तय मै १, ८,९.

¶अन्व(नु-अ)प√क्रम्>क्राम्, अन्वपक्रामति मै ३, ९, ३[o]; अन्वपक्रामन्ति मै ४, २, ८; अन्वपाक्रामत् मै २, ३, ७[p]; अन्वपाक्रामन्, अन्वपक्रामेयुः मै ४,२,१२.

¶अन्व(नु-अ)भ्य(भि-अ)व√चर्, अन्वभ्यवचरति मे १, १०, २०.

अन्वभ्यव-चारम्[q] मै १,१०,२०[r].

¶अन्व(नु-अ)भ्या(भि-आ)√रुह् >रोहि, अन्वभ्यारोहयत् मे १, १०,१३[s].

अन्वय- अन्वि(नु√इ) द्र.

अन्व(नु√अ)र्ज् अन्वृ(नु√ऋ)ज् द्र.

अन्वर्तितृ- अन्वृ(नु√ऋ)त् द्र.

अन्व(नु√अ)व्, अनु···अवतु काठ ३७, ९; पै ४, ३, ६; अनु··· अवतु, अनु[२] (अवतु) पै ४, ३, ५[t]; अनु···अवताम्[u], अनु (अवताम्)[u] काठ ३७, ९;

---

a) पाभे. अध्ः मै ४,१,२ द्र.।

b) सपा. मै ३,६,३ अवाङ् इति पाभे.।

c) सपा. मै ३,६,३ अवाञ्चम् इति पाभे.।

d) स्त्रियां ङीप् प्र. उदात्तनिवृत्तिस्वरेणान्तोदात्तः (पावा ४,१,६; पा ६,१,१६१)। सौवरः प्रवृत्तिभेदः (तु. नाउ.)।

e) उदात्तनिवृत्तिस्वरं बाधित्वा पूप. अन्तोदात्तः (पा ६,१,१२२) सौवरः प्रवृत्तिभेदः शाखाभेदेन व्यवस्थापनीयः (तु. नापू.)।

f) विप.। उस. उप. <√गम्।

g) अन्वगतः इति पाठः? यनि. शोधः। सपा. आपश्रौ १६,३२,५ प्रभृ. अध्वगतः इति पाभे.।

h) उस. भावे घञन्ते थाथादि-स्वरः।

i) स्वार्थे ख>ईनः प्र. (पा ५,४,८)। तत्स्वरः।

j) विप. (जीवित-)। शाखाभेदेन स्वार्थे खच् प्र. उसं.। चित्स्वरः।

k) कस. समासान्तः टच् प्र. (पा ५, ४, ९१)। चित्-स्वरः। उप. < अहन्- द्र.। वा. क्रिवि. भवति।

l) तत्रभवीयः यत् प्र. (पा ४, ४, ११०) तित्स्वरश्च (तु. टि. अपीच्य-)।

m) पाठः? अनु। अतः इति पदद्वयं वा स्यात्, (अनु√इ>) अन्वितम् इत्येवं मूलतः सतो विकारो वा स्यात्।

n) सपा. काठ ३०,७ अभ्यतिमुच्यते इति पाभे.।

o) पाभे. अनुपरापतति द्र.।

p) पाभे. अनु ते २,३,७,१ द्र.।

q) गस. णमुलन्ते कृत्-स्वरः प्रकृत्या (पा ६,१,१९३; २,१३९)।

r) अन्वभ्यवचारं प्रजाः शमायते >सपा. काठ ३६ १५ अभ्यवचरति इति पाभे.।

s) पाभे. अनभ्यारोहाय द्र.।

t) पाभे. अनु···मदतु काठ ३७,९ द्र.।

u) =सपा. ऐआ ५, १, १। तैब्रा २, ७, ८, २ ?अनु···अवतम्, ?अनु (अवतम्) इति पाभे. (यत्र यनि. शोधः द्र.)।

पं ४, ३, ६; अनु·····अवन्तु काठ ३७, ९; पै ४, ३, ५; अनु···आवताम् ऋ १०,११३, १[a]; अनु^{२}···आवन् ऋ ८,७,२४; अनु···आवः ऋ ३,५०,२. अनु···आवीत् काठ ३७, ९^{१}; पै ४,३,५;६.

¶अन्व(नु-अ)व✓कृ, अन्ववाकरोत् मै १,८,४.

¶अन्व(नु-अ)व✓गम् >जिगांस, अन्ववाजिगांसन् तै ३, २, २,३.

¶अन्व(नु-अ)व✓चर्, अन्ववचरति काठ ३६, १४; अनु···अवचरन्ति तै ६,४,९,५.

अन्वव-चार- अन्°.

¶अन्व(नु-अ)व✓जि, अनु···अन्ववजयेयुः मै ३,९,५;१०,६.

अन्वव-जय- अन्°.

¶अन्व(नु-अ)व✓नी, अन्ववनयति[b] काठ २४, १०; क ३८,३; अन्ववनयेत् मै १,१०, २०;३,३,४;४,८,३; काठ ३६, १४^{२०}.

¶अन्व(नु-अ)व✓सृज्, अन्ववसृजति तै ६, ५,८,५; अन्ववसृजति मै १, ६, ६; अन्ववसृजतात् खि ५, ७, ३; मै ४, १३,४; काठ १६, २१; अन्ववासृजन्, अन्ववासृजन् मै १, ६, ६; अन्ववसृजेत् तै ६, ५, ६,५;७,१;८,५; मै ४ ६,७.

अन्व(नु-अ)व ✓सो > सा

अन्वव-साय[d] मै १, ८, ८, ९; ३, ४,५^{२}; काठ ६,६;२२,२^{२}; क ४,५.

अन्वव-सायिनी- पश्चात्°.

¶अन्व(नु-अ)व✓स्था >तिष्ठ, अन्ववातिष्ठत् मै ३,९,४.

¶अन्व(नु-अ)व✓स्रु >स्रावि, अन्ववस्रावयति तै ५, ६, ३,२; ६,२,१०,५; क ४०,३[e].

अन्व(नु-अ)वार्(व✓ऋ)>च्छ्, अन्ववार्च्छति मै ३,९,६[f].

¶अन्व(नु-अ)वा(व✓अ)स् (क्षेपणे), अन्ववास्यति तै ६,६,७,४; काठ २९,४; क ४५ ५; अन्ववास्यति मै ४,८,६.

¶अन्ववे(नु-अव✓इ), अन्ववैति तै ६, ६, ३, १; मै ३. ८, १[b]; अन्ववैति मै ४, ८, ५; अन्ववैत् ऋ १०, १२९, ४[g]; मै ४, ८,५; अन्ववैताम् तै २, ४, ४,१; २; अन्ववायन् तै ३, २, २,३; ५, ३, ३, १; मै १, ९, ८; ३, ६, १०; ८, १; ४, ९, ११‡[h]; काठ १३, ५; २०, ६; १३;२४, १०; क ३१, ८; १५; ३८, ३; अन्ववायन् तै ६, ३, १,२.

अन्ववा(व-अ)यँ- अन्°.

अन्ववा(व-आ)यिन्[i]- -यिनः खि ३,१६,५$.

अन्ववे(व-इ)त्य काठ २२,७; २५, ८^{२}; क ३५,१;४०,१^{२}.

अन्ववै(व-ए)तुम् काठ २४,१०; क ३८,३.

†अन्व(नु✓अ)श् (व्याप्तौ), अन्वश्नोति ऋ २, १६, ३; अन्वश्नुवन्ति ऋ ७, ९९, १; मै ४, १४,५.

अनु····अष्ट ऋ ८, ७०, ५; तै २, ४,१४,३; काठ १२,१५; कौ १,२७८;२,२१२; जै १,२९, ८;३, १९,७; शौ २०,८१, १; ९२,२०†.

अन्व(नु✓अ)स् (भुवि), अनुष्ठन[j] मै २, १३, १; काठ ३९, २; शौ ३, १३, २; पै ३, ४, २; अनुस्थन तै ५, ६, १, ३; †अनु···असत् ऋ १, ५७, २;

---

[a] तु. GW. ऋ ८, ७६, ११ इति संवादिनी श्रुतिश्च (वैतु. सा. प्रमृ. शुष्मम् इति कर्मपदम् अनुना कप्र. अनुगमयन्तः ✓अव् इत्यस्य कर्मान्तर-मध्याहारुकाश्च)।

[b] सपा. अन्ववनयति<>अन्ववैति इति पाभे.।

[c] सकृत् सपा. मै १, १०, २० अपिदध्यात् इति पाभे.।

[d] गस. ल्यबन्ते कृत्-स्वरः प्रकृत्या।

[e] सपा. माश्रौ २, २, ३, २१ अवस्रावयति इति पाभे.।

[f] सपा. काठ २६, ८ क ४१, ६ गमयति इति पाभे.।

[g] =सपा. तैआ ४,११,७। मै ४, ९, ११ इन्द्रस्य वै इति विभे.।

[h] सपा. ऋ १०, १२९,४ तैआ ४, ११,७ व्यायन् इति पाभे.।

[i] गस. णिन्यन्ते कृत्-स्वरः प्रकृत्या (पा ६,२,१३९)। -वा- इति मुपा. स्वरो भ्रष्टः।

[j] नतिः उसं. (पा ८, ३, ८७)। शाखाभेदेन व्यवस्था स्यात्। पाप्र. चेह शाखाविशेषमात्रानुसारिणीति तु तत्त्वदृक् (तु. नाउ. रूपम्)।

शौ २०, १५, २; अनु····· आसन् ऋ १०,२७,१७; अनुष्यात् ऋ १, १६७, १०[a]; १८२,८; ३,३९,८[b]; अनुष्यात काठ ३५,१४‡[c]; कौ १, ८२[d]; जै १, ९, २; अनुष्याम ऋ १, १८५,४.

¶अन्व(नु√अ)स् (क्षेपणे), अन्वस्यति, अन्वस्यति तै ७,२,४,२.

अन्व(नु-अ)ह°- -हम् खि २,६[२]; १६; ¶तै २,४,१०,१; ५,५,६,२; मै २,४,८; काठ ११,१०¶.

¶अन्वा(नु-आ) √कृ, अन्वाकुर्वन् काठ २४,७; क ३७,८.

¶अन्वा(नु-आ)√क्रम् , अन्वाक्रमत तै ६,५,६,३.

¶अन्वा(नु-आ)√कशा > अन्वाकशायम्[f] मै १,९, ८[g].

अन्वा(नु-आ)√क्षि(निवासे), अनु···आक्षियति शौ १०, ५, ४५[h]; पै १६, १३२,७[h].

ɸअन्वा-क्षित- -तम् पै १, ६३, १[h,i].

अन्वा(नु-आ) √गम् , > च्छ्.

¶अन्वागच्छत काठ ८, १०[j]; १०, २[२k]; ११,३; क ७, ६[j]; ¶अन्वागच्छन् काठ ८, ७[j]; क ७,४[j].

¶अन्वाग्मन् तै ७, ३, ५, १; अनु···आगन् पै १६,७१,८.

अन्वा-गन्तृ[l]- -न्ता मा १८, ५९; का २०,४,२; तै ५, ७, ७, १; काठ ४०,१३; शौ ६, १२३, १;२.

अन्वा(नु-आ) √गा, अन्वागात पै १९, ५२, ३; अनु···आ(आ-अ)गुः तै ४,३, ११, १[m]; मै २,१३, १०; काठ ३९, १०; शौ ८,९,१३; पै १६, १९,३.

¶अन्वा(नु-आ)√चक्ष्, अन्वाचष्टे मै १,१०,१८; ४,४,७; काठ ३६,१३.

अन्वा(नु-आ)√तन् , अन्वाततान मा ८, ६१; शौ १८, २, ३२; पै ११,५,३; अन्वातांसीत मा १५,५३; का १६, ६,७; तै ४, ७, १३, ५; काठ १८, १८; क २९, ६; अन्वातांसुः मै २, १२,४.

अन्वा(नु-आ)√तप् , अन्वातपन्ति पै ५,३१,७?[n].

¶अन्वा(नु-आ)त्म°- -त्मम् काठ २३, १; क ३५,७.

?अन्वादृशाकर्म[p] पै १९,२,५.

---

a) गतित्वमूला नतिः (पा ८,३,८७)। कप्र. इतीव सा. अभिप्रयंस्ता नतिं प्रति पर्यनुयोक्तव्यः।

b) गतित्वमपश्यन् GW. मन्त्रस्थां नतिं प्रति चोद्यो भवति (तु. नापू. टि.)।

c) सपा. ऋ ६,५, ४ वनुष्यात इति पाभे।

d) वैतु. सर्वत्र संपा. पपा. च अनु, ष्यात इति द्वे पदे। पादपूर्तिकरः अनुः इत्यभिप्रायो विव. गतिमूलां नतिं प्रति चोद्यः। e) अस.। शेषम् अनूचीनाहु- टि. द्र.।

f) गस. णमुलन्ते लित्स्वरः प्रकृत्या (पा ६. १, १९३; २, १३९)। -क्षा- इत्यप्येकस्मिन् मूको. पाठः (तु. टि. अनु√कशा)।

g) सपा. काठ ९,१५ प्रचरिष्यन् इति पाभे.।

h) सपा. पै १,६३, १ ɸअन्वाक्षितम् इति पाभे.। छन्दस्तः °आक्षेति (तु. पै ५,३८,५) इति पाठः स्यात्।

i) यनि. < °आक्षीत (तु. पै १६, १३२, ७ मूको.) °आक्षीति (तु. पै ५, ३८, ५ मूको.) < °आक्षेति इति मौलिको विपरिणामः संभाव्यते।

j) पाभे. अनूदैत् मै १,६,१२ द्र.।

k) पाभे. अनु तै २,३,३,१ द्र.।

l) गस. तृजन्ते कृत्-स्वरः प्रकृत्या (पा ६, १, १६३; २, १३९)। अस्य व्याख्यानं द्विवर्णकं भवति। यनि. कृदन्तमिति प्रथमं वर्णकं (तु. उ. WI. च)। लुटि प्रपु१ इत्यपरं (तु. भा. सा. म. PW. प्रभृ.)। इह न लुट् (पा ८, १, २९) इति तिङो निघाताऽभावे सति गतिद्वयस्यानुदात्तत्वं द्र. (पा ८, १, ७०; ७१; [तु. भा.]) । ननु किमिति नेह भूयोमन्नमन्वमानीति। उच्यते। लुड्-वृत्तमपि मूलतः √अस् (भुवि) इत्येतल्-लड्वृत्ताऽनुप्रयुक्तात् तृजन्त-कृतोऽनर्थान्तरमित्यभिसन्धेरल्पीयोऽभिमतपक्ष्यत्वमेवोरीकृतमिति दिक्।

m) अत्र आगुः इत्येकं पदम्। यनि. अपरं पदमिति विवेकः द्र. (तु.टि. अनु तै ४,३,११,१[२])।

n) पाठः? (°पत्-> -ती->) -तीः (द्वि३) इति शोधो भवेत्। अन्यथा हि वाक्याऽसंभवत्वप्रसङ्गः स्यात्। नाउ. पदं च मूलतः इमम् इति सदेव ईरिमम् इति मध्य इकारोपजनवत्तया मूको. व्यकारीति संभाव्येत (तु. सस्थ. टि. ईर्म-)।

o) अस. समासान्तः टच् प्र. (पा ५, ४, १०८)। चित्-स्वरः। वा. क्रिवि.। उप. < आत्मन्-।

p) पाठः? अनु, ईदृशा (ईदृशानि), ?अकर्म (< √कृ) यद्वा अकर्, मे इति शोधः द्र.।

¶**अन्वा(नु-आ)√धा** > अन्वाधाय काठ ३५, १७^{2}; क ४८, १५^{2}.

¶**अन्वा(नु-आ)√धाव्**, अन्वाधावन्ति काठ १३,४.

अन्वा(नु-आ)√(ध्यै>)धी > दीधी, अनु…आदीधीथाम्[a] शौ २,१२,५; अनु…आदीध्याथाम् पै २,५,५?[b].

*अन्वा(नु-आ)न्त्र[c]- > ?अन्वान्त्र्य[d]- -न्त्र्यम्[e] शौ २, ३१,४; पै २, १५,४.

¶**अन्वा (नु-आ) √प्यै**, अन्वाप्यायते[f], अन्वाप्यायत[g] मै २, २, ७.

¶**अन्वा(नु-आ)√प्री**, अन्वाप्रीणाति क ४१,७[h].

अन्वा(नु-आ)√भज्, ¶अन्वाभजति तै ६,१.९,६;४, ६, ३; ५,१, ३; ¶अनु…आभज तै ६,४,६,२; ¶अन्वाभजत् तै ६, ४,६, ३; अनु(आभजन्)[i] ऋ ३, ४७,३.

अन्वा(नु-आ)√भू, अन्वाभवत्[j] काठ ३५,१५; ४३,४; क ४८, १३.

¶अन्वाभविष्यन्ति तै ६, ३,४, ७;१०,२;५,३,१.

अन्वाँ-भूति[k]- -तिः काठ ३५, १५.

¶**अन्वा(नु-आ)√यत्** > अन्वा-यत्त- -त्तः, -त्तम् तै १. ६, ११, १; मै १,४,११.

अन्वा(नु-आ)√रक्ष्, अन्वारक्षत् पै १६.६३,३[l].

अन्वा(नु-आ)√रभ्, > रम्भि, ¶अन्वारभते तै ३, १, १, ४; ६, २, १, ५; ३, ८, २; ९, ४; मै ३, ६, ६^{1}; ८,९; ९, १; ७; ४, ६, ८; काठ १०, ५; ११, ४^{2}; १३,७; २४,८; ३०, ३; क ३८,१; ४६,६; ¶अन्वारभेते तै ६,३,९,४; मै ३,९,७; ¶अन्वारभन्ते मै ४, ६, ३^{2}; अनु…आरभे तै ३, २, १,१^{2}; ७,५,१९,१^{2}; २; काठ ३५, २; ६; ९; ३८, १२; ४५, १५^{2}; क ४८,३; ७; १०; शौ ६,४८, १-३; पै १९, ४४, ४-६; अन्वारभामहे मा१९,२६‡[m]; ३५, १३; का १०,५,५‡[m]; ३५, ४, १२; तै १,७, १०,३‡[m]; मै १, ११,४‡[m]; काठ १४,२‡[m]; २१, १४; कौ १,९१‡[m]; जै १, १०, १‡[m]; अनु…आरभामहे[n] शौ ५, ८,९; पै७,१८,८; ?अन्वारप्स्व[o] पै ४,१८,६; अन्वारभेताम् पै

---

[a] ‘अपकामस्य कर्त्ता माऽभिभूद् माम् इत्यस्य कृते द्यावापृथिव्यौ मम विस्मरणमकुर्वाणे ममाऽन्वालम्भनं नाम पृष्ठपोषणं वितन्वीयाताम्’ इत्यस्य मन्त्रस्वारस्यस्याऽतिरोहितत्वेऽपि यत् सा. W. च मा अनु इत्यन्वयमिच्छतस्तन्निःसारं द्र. । तदभिमतस्य √दीधी इत्यस्य च √दीदी इत्यस्य पर्यायभावस्याऽप्रामाणिकत्वादिति दिक् (तु. सस्थ. अनु…आरभध्वम् इति) ।

[b] पाठः? दीध्यताम् इति मूको. हि पर. लिङि मपुर रूपम् दीधी-यातम् > दीध्यातम् इति संकेतयेत् ।

[c] प्रास. पूप. प्रकृतिस्वरम् (पा ६,२,२) । उप. यद्र. ।

[d] तत्रभवीये यति प्र. तित्स्वरः (पा ४, ३, ५५; ६, १, १८५) । सा. यत्त्वसौ आन्त्र- इत्यतः यत् प्र. इत्याह, तन्न । तथा सति अनुना प्रास. पूप. प्रकृतिस्वरं हि स्यात् । अर्थतोऽस्य प्रास. असंगतेश्च । सा. समये स्वरितस्वरः मूको. बभूवेत्यस्य तत्-प्रमाणतः सुवचत्वाच्च नापू. इह मूलभूतस्य प्राति. सद्भावः सूहः द्र. । एस्थि. संप्रत्याद्युदात्ततया यत्स्य प्राति, मूको. उपलम्भो भवति तत्र समाधानं मृग्यम् ।

[e] सपा. मंत्रा २,७, २ आन्त्रानुचारिणम् इति पाभे. ।

[f] पाभे. अनु तै २,३,५, ३ द्र. ।

[g] पाभे. अनु काठ ११,३ द्र. ।

[h] पाभे. अनुप्रीणाति मै ३,९,८ द्र. ।

[i] सामर्थ्याच्छ्रुतचरी क्रिया पुरुषवचनपरिणामपूर्वकमध्याहृता द्र. (तु. सा. अनु-मात्रमुपसर्जुकः ; वैतु. PW. प्रभृ. स्वानु इति योगतः अनुः कप्र. इत्यभिप्रायुकाः) ।

[j] पाभे. अन्वभवत् तै ७,३,१४,१ द्र. ।

[k] गस. क्तिनि तादौ- (पा ६,२,५०) इत्यनु स्वरशोधे सति °भूँति- इति मुपा. स्वरश्चिन्त्यः ।

[l] सपा. शौ १०,३,३ अयं मणिः इति पाभे. ।

[m] =सपा. माश ५, २, २,८ आपश्रौ ३४,१२, ७ । ऋ ८, ११, ६; १०, १४१, ३ आश्रौ २, १८, ३ या १४,३२ गीर्भिर्हवामहे इति पाभे. ।

[n] वैतु. WI. अनुः कप्र. इति ।

[o] पाठः? अन्वारम्भि इत्यस्य वा अन्वारब्धः इत्यस्य वा मूलतः सतो विकारः स्यादिति विमर्श-सापेक्षो विषयः ।

१७,४०,८?[a] ; अन्वारभेथाम् शौ ६,१२२,३[b]; १२,३,२०¶[c]; ४७?[a]; पै १६ ५१,७[b]; अन्वारभध्वम् शौ १२, २, ४७;४८; पै १७,३४,८; ३५,५; अनु… आरभध्वम् काठ ३५, २; ६;९; क ४८,३;७; १०; शौ २, १२, ५[d]; पै २, ५, ५; १५, ९, ६; ¶अन्वारभन्त काठ ७, ६; क ५,५; ¶अन्वारभेत तै ३,१,५, १; ६,३,८,१; २.

¶अन्वारम्भयति तै २,६,२,५; मै २,१,२; ४,१,१२.

¶अन्वा-रब्ध- -ब्धम् तै ६, ३, ८,२. [°ब्ध- अन्°].

¶अन्वा-रभ्य तै २,२,५,५; ३,११, ४; ५, ३, ९,२; ६,१, ११,१; ७,३,१, १; काठ २४, ८; क ३८,१. [°भ्य अन्°].

¶अन्वा-रभ्य[e]- -भ्यः, -भ्या३ः तै ६,३,८,१.

¶अन्वा-रम्भ[f]- -म्भः तै ६,१,११, ५; २, १, २;९,२; मै १,४,८; ११, ८; ३, ७,९; ८,७; ४ १, १२;४,५; ८, २; काठ १४, ८; २४, ४; ८; २५, ८; ३१, ९; ३२, ४; क ३७, ५: ३८, १; ४०,१; ४७, ९; -म्भाय मै ३. ७,९;८,७.

¶अन्वा-रम्भयित्वा[g] काठ ११,१०; १२,२; २४,८; क ३८,१.

¶अन्वा (नु-आ) √रुह् ,> रोहि, अन्वारोहति तै ५,४,१०,२;६, ८, १; मै १, ८, ६; ३, ५, ५; अनु… आरोहति तै ३,२,१,१; २; अन्वारोहन्ति तै ७,२,१,२; ४; ६, २ ; ४, ३, २; ७, २; मै ३, ९, ४; $अन्वारोहामि मै २, ७, १६[२]; काठ ३९, ३'; शौ ६, १२२, ४; पै २, ६०, १; अन्वारोहत् मै ४, ३, ४; अन्वारोहेत् तै ५, ६,८,१.

अन्वारोक्ष्यन्ति मै ३,९,४[h];१०, २, ४,७,५[h]; $अन्वारुहन् खि १,११,४[i].

अन्वारोहयति मै ३, १०, ४; अन्वारोहयेत् तै ३, ४, १०,४; अन्वारोहयेयुः मै ३,९,४.

अन्वा-रोह[j]- -हः तै ५, ६, ८, १; मै ३, ८, १; -हाः तै ३, २, १, २; -हान् तै ३, २, १, १; मै ३,५,५.

अन्वा-रोहयितव्य[k]- -व्यम् मै ३, १०,४.

†अन्वा(नु-आ) √लभ्, अन्वालेभिरे ऋ १०, १३०,७; मा ३४,४९; का ३३,२,१२.

†अन्वा(नु-आ) √वह्, अनु… आवहत्[l] ऋ १०, २९,२; शौ २०,७६,२.

अन्वा(नु-आ) √वृत्, ¶अन्वावर्तते काठ ३२,५; अन्वावर्तै[m] तै १,६, ६, २; ७, ६, ३; काठ ५, ५; ३२, ५; शौ १०, ५, ३७; पै १०,१०,३; १६,१३२,२; १८, २९,२.

अनु… आववर्त ऋ ५, ६२, २; मै ४,१४,१०.

¶अन्वावरीवर्ति[n] मै ३,२,९.

अन्वा(नु-आ) √शी, अन्वाशये शौ १०,७,९; पै १७, ८५,३१.

¶अन्वा(नु √आ)स्, अन्वास्ते तै ५,३,७,३; मै १,४,८; काठ २१, २; क ३१,१७; अन्वास्ते मै ३, ३,१; अन्वासीत[o] मै १, ४, ८.

---

[a] पाठः? उभयत्र °भेत (पुत्रः) इति वा. इति कृत्वा तत्परः शोधः ?

[b] सपा. शौ १२,३,७ तैआ २, ६,२ काकू १३३ : १ विभे. ।

[c] पाभे. अनुसंरभेथाम् पै १७,३७,१० द्र. ।

[d] तु. PW.; वैतु. सा. WI. च अनुः कप्र. इति (तु. सस्थ. टि. अन्वा √दीधो > °थाम्) ।

[e] गस. यदन्ते (पा ३, १, ९८) कृत्-स्वरः प्रकृत्या। -भ्या३ इति प्लुति द्र. (पा ८,२,९७) ।

[f] गस. भावे घञि थाथादि-स्वरः (पा ६, २, १४४) ।

[g] छन्दसि ल्यब्-अभावः पाक्षिकः ।

[h] पाभे. अनुप्रजानीयात् द्र. ।

[i] मुपा. सन्नपि स्वरो भ्रेषात्मकत्वादुपेक्षितः द्र. ।

[j] गस. करणे घञ् प्र. थाथादि-स्वरश्च । बहु. सोमयागे मन्त्रविशेष- ।

[k] गस. तव्यदन्ते तित्स्वरः प्रकृत्या (पा ६, १, १८५; २, १३९) इत्येव मौलिकः स्वरः स्यात् । यत्तु मूको. मुपा. च गत्यंशेऽपि स्वरो भवति तदनुपदं श्रूयमाणेन अन्वारोहयति इत्यनेन दृग्दोषतः कारितः स्यादिति शोधो यथावत् सावसरः द्र. ।

[l] तु. वें. PW. प्रभृ. च; वैतु. सा. यः अनुम् निपातमात्रमनुचरपरतया व्याचक्षाणोऽसमर्थमिव बभाषे ।

[m] पाभे. टि. च अनु मा २,२६ द्र. ।

[n] पाभे. अनु तै ५,३,१,३ द्र. ।

[o] सपा. काठ ३२,४ आसीत इति पाभे. ।

अन्वा(नु-आ)✓सद्, अन्वासदेम पै १९,४१,९.

अन्वा(नु-आ)✓सृप्, आ···अनुसर्पत मै ४,२,५[a].

अन्वा(नु-आ)✓स्था>तिष्ठ, अन्वा, तिष्ठथ[b] काठ ३,९; अन्वातिष्ठत[b] मै १,३,१; क २,१६.

¶**अन्वा(नु✓आ)हृ**[c], अन्वाह तै २,३, ६, २; ७, ४; ५, ७,१; २^{१}; ३^{१}; ४; ८, २; ४; ५; ११, १^{२}; २; ५, १, ८, ५^{१}; ६; २,२,३; ४,७,२; ६,१,५, ३; ३, ५, ३; ४;७,१^{२}; ४, ३, २; मै १,१०, १५;१८^{५};११,७; २, ४, ४; ५; ३,२,५;३,७; ४,६^{३}; ८, ७; ९, ५^{३}[a]; ४, ५, ३^{४}[e]; काठ १४,७; २०,५^{४}; २६, ८^{३}; २९,६;३६, ९; १२^{१}; १३; १४; क ३१, ७^{४}; ४१, ६^{३}; ४५, ७; $पै १, १०, १[f]; अन्वाह तै १, ५, ८, ३; २,४,११,१[g]; ५, ८, १; २; ५; ११,१; ५, २, १, २; ४,६, ४; ६,१,५,३; मै १, १०, १८; १९; २,४,४[g]; ३,१०, २^{२}; ४, ५, ३^{१}; अन्वाहुः मै ४, ५, ३; अन्वाहुः मै ३,२,५.

¶**अन्वा(नु-आ)✓हृ**, अन्वाहरति तै १,७, ३, २; अन्वाहरति मै १, ४, ६; अन्वाहरन्त तै १, ७,३, ३[h]; अन्वाहरेयुः मै १, ५, १३; अन्वाहरेयुः मै १,५,१३.

अन्वा-हर्तवै[i] मै १,५,१३.

अन्वा-हार्य[j]- -र्यः तै १, ७, ३,२^{२}; ३^{२}; -र्यम् तै १, ७, ३,१; २^{२}; ३; मै १, ४,६; काठ ८, १३; क ८,१; -र्यस्य तै १, ७,३,२; -र्येण तै १, ७, ३,१; काठ ८, १३; क ८,१.

अन्वाहार्य-त्व- -त्वम् तै १, ७, ३,२.

अन्वाहार्य-पचन[k]- -नः तै १, ६,७,१; काठ ३२,७.

अन्वि(नु✓इ), अन्वेति ऋ १,११३, ८; ⌊१२४, ३ (१०, ६६,१३)⌋; ५,८०,४;७,६३,५; ⌊१०, २७, १३ (१४२, ५)⌋; ¶तै ५, १, २,३; ५,१,२; ६, ४,५; ६, ३, ९,५; ५,१,४; ¶मै ३, १, ३; १०; ४, ४, ५^{२}; १४, १४; ¶काठ १४, ७; १९, २; ८^{२}; २२,९; ¶क २९, ८; ३५, ३; शौ १०, २, १९; पै १२, ६, १३‡[l]; अन्वेति मै ४, ६, ५¶; कौ १, ६४‡[m]; जै १,७,२‡[m]; ¶अन्वेती३[n] तै ७, १, ७, ४; ¶अनुयन्ति तै ६,५, १,४; मै ४, ६, ५; काठ २७, १०; †अनु ··यन्ति ऋ १, १६३, १२; ४, १३, २; ८, ४०, ८; १०, १३६, २; मा २९, २३; का ३१, ३, १२; तै ४,६,७,५; काठ ४६,३; अनु···यन्ति ऋ १०, ८५, ३१[o]; अन्वेषि तै ४, २,५,४[p]; शौ १२, २,४९; १७, १, १६; पै १७, ३४, ९; १८, ३१,८; अन्वेषि ऋ १०, ⌊(२७, १३) १४२, ५⌋; अन्वेमि ऋ १०, ⌊(१,१२४,३; ५,८०,४); १३, ३[q]⌋; ६६, १३; मा १, ७; ११[r]; ७, २; ३८, ५; का १, ३, ३;८[r]; ७,१,२; २, २; ३८, १,५; मै ४,१,५^{२}; शौ ११,११,

---

[a]) एमामनुसर्पत> सपा. कौ २,१००५ जै ४,१७,१० ताविमा उपसर्पतः इति पाभे.।

[b]) पाभे. अनु तै ३,५,६,३ द्र.।

[c]) यथा दीर्घादिरयं धातुरिष्येत न तु पराभिमतदिशा ह्रस्वादिरित्यस्य कृते तु. टि. ✓आहृ।

[d]) पाभे. अनुब्रूयात् काठ २६,८ द्र.।

[e]) सकृत् सपा. तै ६, ४, ३, २ उपाकरोति इति पाभे.। [f]) पाभे. अध्याह शौ १,१६,२ द्र.।

[g]) पाभे. अनुब्रूयात् काठ १२,४ द्र.।

[h]) पाभे. अनुनिरवपन् द्र.।

[i]) तवै-प्रत्ययान्तस्य द्वैस्वर्यं भवति (पा ६,२, ५१)।

[j]) गस. ण्यदन्ते कृत्-स्वरः प्रकृत्या (पा ६,१, १८५; २,१३९)।

[k]) व्यप. (अग्नि-विशेष-)। कास. उप. अधिकरणे ल्युट् प्र. कृत्-स्वरश्च प्रकृत्या (पा ६,१,१९३;२,१३९)।

[l]) सपा. पै २,२२,३ अन्वेतु इति, शौ ३,१७,५ अनुयन्तु इति, ऋ ४,५७,८ प्रभृ. माश ७,२,२,९ अभियन्तु इति, मै २,७,१२ अभ्यैतु इति पाभे.।

[m]) सपा. ऋ १०,११५,१ अप्येति इति पाभे.।

[n]) वाक्यस्य टेर् उदात्तप्लुतः (पा ८,२,८२;९७) पद-स्वरात् पृथग्भूतः द्र.।

[o]) पाभे. अनु शौ १४,२,१० द्र.।

[p]) पाभे. अनुशिक्ष द्र.।

[q]) सपा. शौ १८,३,४० अन्वैतद् व्रतेन इति पाभे.।

[r]) सपा. तै १,१, २,२ प्रभृ. अन्विहि इति, काठ १, ४; ३१,३ क १,४; ४७,३ प्रेहि इति, मा ११,१५ प्रभृ. माश ६, ३, २, ८ आश्रौ ४, १३, ४ प्रभृ. वीहि इति च पाभे.।

४; अन्वयत् पै २०, ६०, ७; अन्वयः[a] पै ४, २२,६; †अन्वेतु ऋ ६,५४,५; तै ४, १, ११,२; मै ४, १०, ३; ११,१; काठ ४, १५;२०,१५; $शौ ६, ८९, २; १९, ४, ४[b]; पै २,२२, ३‡[c]; ५, ६, १ $; १९, २४, ९; अनुयन्तु कौ २,१२१४; शौ ३, १७, ५‡[c]; अनु···यन्तु खि ६, ३,२; पै ५,३८, २‡[d]; अन्विहि ऋ १०,५३, ६; मा १२,६२[e]; २२, १९[f]; का १३, ५, १[e]; २४, ६,१[f]; तै १[g], १, २, २; ४, २; २, ८, १; ३, ९, २; ४, २, १; ३, १; †३, ४, २, २;३,६; ४,१,२,२[g]; ६,१,११, २[g];३,९,४[g];४,५,५[g];७,१,१२, १[f]; मै २,७, १२[e]; ३,१२,४[f]; काठ †१३,११ ;१२; १६,१२[e]; क २५, ३[e]; पै १९, २६, ८; अनु···इहि मै ४, ९, ११; पै १९,१५, ८^{२};‡[h]; ¶अन्वैत् तै २,१,२, १;३, ५,१; ५, २,१, २; काठ १०, ११; ¶अन्वैताम् मै २, २, ४; काठ १०, ११; अन्वायन् ¶तै १, ५,१, १; ७, ३,५, १^{२}; ¶मै ३, ८, ६; ¶ काठ २४, ६; २६, १; ¶क ३७, ७; ४०, ४; शौ ११, ७, २; पै ३, ३८, ७; ¶ अन्वायन् मै ३, ८, १०; अनु···आयन् ऋ ⌊४, २६, २; १०, ६,७⌋; अन्वायम् ऋ ५, ३०, २; अनु···आयम् ऋ १०, ९५, ५; ¶अन्वियात् तै ७, १, ७,४.

†अन्वियाय ऋ ४,४, ११; तै १, २, १४, ५; मै ४, ११, ५; काठ ६, ११; †अनु···ईयतुः ऋ ८, ९९, ६; मा ३३, ६७; का ३२, ५, १३; कौ २, ९८८; शौ २०,१०५,२; †अनु···ईयुः ऋ १,१६३, ८[i]; मा २९, १९; का ३१, ३, ८; तै ४, ६, ७,३; काठ ४६,३.

अन्व(नु-अ)य- स°.

¶१अन्वि(नु-इ)त[j]- -तम् मै ३, १०,४.

?२अन्वि(नु-इ)त[k]- -तम् मै १,२, १५.

अन्वि (नु-इ)ति[l]- -तिः तै ३, ५, २, २ ; ४, ४, १, १ ; ५, ३, ६, १¶; काठ १७, ७; ३७, १७; क २६,६; -त्या मा १५, ६; का १६, २, १; मै २,८,८.

¶अन्वि(नु-इ)त्य तै ६, २,९, २; ६,३,१.

अन्वे(नु-ए)तवे[m] ऋ ७,३३,८.

†अन्वै(नु-ए) तवै[n] ऋ ⌊१, २४, ८; ७, ४४, ५⌋; मा ८, २३; का ९, ४,१; तै १, ४, ४५, १; मै १,३, ३९; काठ ४, १३; क ३,११.

अन्वि(नु√इ)न्ध्, अन्वैन्द्ध शौ १०, २,१६; पै १६,६०,९.

?अन्विये[o] पं १३,५,१५.

अन्वि(नु√इ)ष्, >च्छ्, ¶अन्विच्छति तै १,५,९,७; अन्विच्छे तै ४,३,११, ३[p]; अन्विच्छ शौ

---

[a] सांशयिकत्वेन संकेतयन् संस्कर्ता चिन्त्यः । लेटः मपु१ इत्येवं सुवचः ।

[b] अभ्येतु इति पाठं मन्वानः सा. ।

[c] पाभे. अन्वेति पै १२,६,१३ द्र. ।

[d] सपा. ऋ १०, १३६,२ अनु···यन्ति इति पाभे. ।

[e] पाभे. अनुशिक्ष द्र. ।

[f] सपा. काठ ४१, ३ अन्वेहि इति पाभे. ।

[g] पाभे. अन्वेमि मा १,११ द्र. ।

[h] पाभे. अति···एतु शौ ६,७५,३ द्र. ।

[i] अनु त्वा इत्यनुवर्तयन् सा. पर्यनुयोक्तव्यो भवति । वैयर्थ्याद् वैपरीत्याच्च ।

[j] वा. अनुबद्धं तृतीयान्तं पदं कर्त्तरीति कृत्वा यनि. धा. सकर्मकात् सतः कर्मणि क्ते प्र. अनन्तरगतिस्वरः (पा ६, २, ४९) । सहार्थस्य वा निपातस्य अनोः गतित्वकर्मप्रवचनीयत्वोभयोदासीनस्य सतोऽनुपसृष्टेन इत्यनेन कर्तरि क्तान्तेन 'अनुगत इतः' इति कृत्वा प्रास. पूप. प्रकृतिस्वरम् (पा ६,२,२) । एस्थि. उपसृष्टेभ्यो गत्यर्थेभ्यः क्ते प्र. उभयीयं विधा संभवन्ती यस्था. प्रकरणतोऽनुसंधेयेति ।

[k] पाठः (तु. आपश्रौ ९,७,१०)? इन्वितु- इति शोधः द्र. (तु. सपा. तै ३,१,४,४) ।

[l] गप. भावे क्तिनि अनन्तरगतिस्वरः (पा ६, २, ५०) ।

[m] गस. तुमर्थीयः तवेन् प्र. प्रकृतिस्वरत्वञ्च (पा ३,४, ९; ६,२,५०) ।

[n] तवै-प्रत्ययान्तस्य द्वैस्वरी द्र. (पा ६,२,५१) ।

[o] पाठः? शोध-सापेक्षः । ···अन्वयी ब्रह्मा इति वा ···अन्वये ब्रह्मणाम् इति वाऽध्यक्षरः पादः स्यादिति ।

[p] =सपा. पागृ ३,३,५ । काठ ३९,१० अनुयच्छे इति पाभे. ।

६, १३४, ३; पै ५, ३३, ६; १३, १, ९; ¶ अन्वैच्छत् मै १,८,२; अन्वैच्छत् शौ १२, १, ६०; अन्वैच्छत् पै १७,६,९.

¶अन्वैच्छन् मै १,७,२;४,२,६, ४,७^{१२}; काठ ८,१५;२५,२; क ८,३;३८,५.

अन्वि(नु-इ)च्छत्[a]- -च्छन् शौ ६, ३७,१; पै २०,१७,१.

अन्विच्छती*[b]- -ती खि ४, ५, २१.

¶अन्वे(नु-ए)ष्टुम् काठ २४,७;३०,४; क ३७,८;४६,७.

अन्वी(नु√ई), अनु···ईयते ऋ ५, ३४,१.

¶अन्वी(नु√ई)क्ष्, अन्वैक्षत् काठ ७. ९; \$अन्वैक्षन्त[c] मै १,२,१५;३, ९,७; काठ ३०,८; शौ २, ३४, ३; पै ३,३२,४; अन्वीक्षेत तै ६, ५,६,५; काठ ७, ९; अन्वीक्षेत तै ६,५,६,५.

अन्वीक्ष्य[d]- -क्ष्यः तै ६, ५,६, ५.

¶अन्वीप[e]- -पम् तै ६,४,२,२; मै ४, ४, १^{२}; काठ २८, १; क ४४,१.

अन्वृ(नु√ऋ), अनु···अर्त[f] ऋ ५, ५२,६.

¶अन्वृ(नु√ऋ)ज्, अन्वर्जेयुः तै ७, ५,३,२^{१}; काठ ३३, ५.

अन्वृज[g]- -जम् पै ५ २१ ६.

अन्वृ(नु-ऋ)जु[h]- -जवे तै २, २, ८. १; मै २, २, १०; काठ १०, ९; -जुम् तै २, २, ८,१; -जून्[i] मै २, २, १०; काठ १०,९.

अन्वृ(नु√ऋ)त्[j], ?अन्वर्तिष्ये[k] शौ १४,१,५६; पै १८,६,४.

†अन्व(नु-अ)र्तितृ[l]- -ता ऋ १०, १०९,२; शौ ५, १७, २; पै ९, १५,२

अन्वृ(नु√ऋ)तीय[m], अन्वृतीयामहे[n] मै ३, ७, ३; अन्वार्तीयन्त मै ३, ७, ३[o]; काठ २४, १; क ३७,२.

अन्वृ(नु√ऋ)धृ, अन्वानृधुः पै ५,

---

[a]) गस. शत्रन्त-कृद्-विकरण-स्वरः (पा ६,१,१८६)।

[b]) -न्वि°- इति मुपा. स्वरो नितरामुत्तन्त्रः शतुरनुमः (पा ६,१, १७३) इति नदीस्वरस्याऽनिवार्यत्वात्।

[c]) सपा. तै ३,१,४,२ अभ्यैक्षन्त इति पाभे.।

[d]) गस. कृत्-स्वरः प्रकृत्या (पा ६,१,२१३;२,१३९)। उप. यत् प्र. उसं. (पा ३,१,९७)।

[e]) तु. टि. अनूप-।

[f]) उत्तरार्धमात्रैकवाक्यत्वे सति यनि. भानु-कर्तृकोऽन्वयः सुलभः स्वारसिकश्च द्र. (तु. PW. GW. प्रभृ.)। सा. यत् 'अनु गच्छन्ति' इत्याक्षेपेण क्रियान्तरं चिकीर्षति विद्युतः इति द्वि३ मरुतः इत्येतत्-समानाधिकरणं सत् प्र३ इति कृत्वा तत्-कर्तृतया च युयोजयिषति, तदसत्। तथाऽन्वयस्य हि तस्याऽविशिष्टैः पदैर्वाक्यान्तरं चिकीर्षतस्तदर्थं च दिवः इति पं१ सत् ष१ इत्येवं मन्त्रस्वारस्यविरुद्धमनुजिगमयिषोर्नितरां दयनीयत्वप्रसङ्गात्।

[g]) =*प्रतिश्याय-रोग- (तु. पार. रेज़श, √रेशीदन ज़ुकाम; Eng. √*rain*)। <अनु √ऋज् '*स्रवणे' (तु. मूको., उद्युग- इति पर्यायश्च ; वैतु. BKA. र., Renou [Vāk ५,७६] च अन्वृ [नु-ऋ] जु- >-जुम् इत्यसङ्गत-कल्पनाः ?)।

[h]) प्रास. अव्य. पूप. प्रकृतिस्वरम् (पा ६, २, २)। अनु (=सन्ततस्) ऋजु- (=प्रापणशील-) इत्येवं तात्पर्यं च द्र. (वैतु. भा. गस. इति वा बस. इति वा ब्रुवाणः। तथा हि व्याख्यायमानं सदेतत् काममिन्द्रपरतया साध्वन्वितं स्यान्न तु शाखान्तरोपस्थापितसजात-परतया [तु. नाउ. यनि. मै. काठ. स्थले]। न हि कोऽपि यजमानः सजातानभिभावुकः सन् तानेवाऽऽत्मविधेयीकरणसमर्थत्वाऽऽत्मकविपरीतार्थप्रतीतिकरत्वेनेच्छेत्। अत इन्द्र-सजातोभय-सम्यगन्वयः प्रास. एव सुवचतर इति दिक्)।

[i]) पाभे. अनुकान् तै २,२,८,१ द्र.।

[j]) यनि. √ऋत (=√ऋ [बभा.]) >*अर्त- > √*अर्त यद्र.।

[k]) यनि. पपा. अनुवर्त्तेत इव (वैतु. नाउ. टि. BW. प्रभृ.)।

[l]) गस. तृजन्ते कृत्-स्वरः प्रकृत्या (पा ६, १,१६३; २,१३९)। वें. सा. चैतत् प्राति. <अनु √ऋति इतीकारान्तधातुमूलतां प्रतिपन्नौ भवतः (वैतु. BW. प्रभृ. एतद् <अनु √वृत् इति कृत्वा मध्यतो वर्णलोपमास्थिताः [तु. ORN.])।

[m]) तु. टि. ऋति- इति च √ऋतीय इति च।

[n]) मूको. शोधितो भवति (तु. संटि.)।

[o]) शोधनप्रवणः मुपा. स्वरतः स्वयं शोध-सापेक्षः द्र.। अन्यथा ह्यनुपपन्नद्वैस्वर्यं प्रसज्येतेति (तु. तत्रैव व्युह्वयन्त इति)।

२९,७; अनु···ऋध्याः ऋ ८,४८,२[a].

अन्वे(नु-आ√इ), ¶अन्वायन्ति तै ६,५,१,४; मै १,६,११; ३,७,९; काठ २४,८^{2}; २७,१०; क ३८,१^{2}; अन्वायुन्ति मै ३,७,९; ४,६,५; अन्वायसि पै २,९,२; अन्वैतु पं १७,३७,७; अन्वेहि[b] काठ ४१,३; अन्वेत पै ५,१३.९‡[c]; अनु···एत पै १९,१०,१४.

¶अन्वे(न्वा इ)त्य मै २,१,३.

अन्वेतवे, अन्वेतवै अन्वि(नु√इ) द्र.

अन्वेष्टुम् अन्वि(नु√इ)ष् द्र.

?अन्वैतद्व्रतेन[d] शौ १८,३,४०‡.

√*अप्(बधा)[e], अप्सन्त[f] ऋ १,१००,८.

१अप्[g]- अपः[h] ऋ १,१५१,४; ९,६३,७.

अप्-तुर्[i]- -तुरः ऋ १ ३,८; ११८,४; २,२१,५; ९,६३,५; -†तुरम् ऋ ३,२७,११; ५१,२; ९,६१,१३; ६३,२१; १०८,७; कौ १,४८७; ५८०; २,११७; ६८५; ७४४; जै १,५१,१; ५९,३; ३,११,८; २०,४; ५६,१३.

†अप्-तूर्य[j]- -र्यम् ऋ ३.१२,८; कौ २,९२८; १०४५; जै ४,२,७; -र्ये ऋ ३,५१,९; खि ५,५,२.

---

[a] अनेवंपश्यन्तौ PW. MW. च यथार्थदर्शिनौ न भवतः अनोः गतित्वभिन्नगतेरसंभवात् ।

[b] पाभे. अन्विहि मा २२,१९ द्र. ।

[c] सपा. ऋ १०,१८,२ यद् ऐत इति, तैआ ६,१०,२ यद् ऐम इति च पाभे. ।

[d] अनु, एतत, व्रतेन इति पपा.? अनु ऐत् तद्व्रतेन इति त्रिपदः शोधः द्र. (वैतु. शंपा [टि.] ?W. L. अन्वैत व्रतेन इति [तु. मूको.]) । पाभे. अन्वेमि ऋ १०,१३,३ द्र. ।

[e] करणादिषु धा. वृत्तिः । नाउउ. व्यु. औप. धा. मूलतः (√ऋ >) अर्- +पु-(< √पा [रक्षणे]) > *अर्पु > √*अर्पु > √*अप्पु = √*अप्र् > √*अप्, √आप् यद्र. (तु. √जल्प् > [पंजा. √जप्प्>] √जप्) ।

[f] लेटि. सिब्-अटौ (पा ३,१,३४; ४,९४) । स्क. < √भस् (दीप्तौ) इति । अन्ये तु √आप् इत्येतस्य सगोत्रस्य सतो ह्रसिताऽच्कत्वे सतीदं रूपम् इत्याहुः । तद् यथा । लङि क्सः इति सा., सन्नन्तप्रकारकमिति च PW. प्रभृ. (भूयसेऽपि विकल्पाय तु. √*अप्स) ।

[g] व्याप्तिविशिष्टकर्माऽऽख्यायां क्विपि निष्पन्नं सद् यनि. सद्भावतः संदिह्येत । एतदभिसंबन्धेन व्याचिख्यासितानां निगमानां परैः प्रायेण प्रागर्वाक्सामान्येन (वैतु. BW. MW.) नाउ. २अप्- इत्येतदभिसंबद्धतयैवाऽनुगमयितुमिष्टत्वात् (तु. NW.) । एस्थि. अपि सर्वेषां तेषां निगमानां भूयोविमर्शापेक्षत्वाऽभ्युपगमत्वाद् यनि. प्राति. पृथग् उपपद्येत । वस्तुतश्च २अप्- इत्येतद्वाच्यभूतोऽर्थः १अप्- इत्येतदीयवाच्यभूतार्थवैशिष्ट्यमात्रतां संश्रयमाणो मूलतः २अप्- इत्यस्य सिद्ध्यपेक्षयाऽपि १अप्- इत्येतत् तत्पूर्वजभूतं प्राति. उपकल्पयेदित्यपि मौलिकशब्दप्रवृत्तिगवेषणसहकारिणी दिक् ।

[h] यनि. रूपं द्वि३ इति कृत्वा 'युवं बृहतो दिवो (धुरि गां न, अपः उप) आभुवं दक्षं युञ्जाथे' इति वा. द्र. (वैतु. सा. अपः=१अपस्- इत्येवं स्वरविवेकाभावाद् नितरां भ्रान्तः सन् वर्णकवैविध्येन पदान्तराण्यप्येतत्-सामानाधिकरण्यं निनीषुर्व्यर्थंभूरिप्रयासः) । यनि. तु उप इति कप्र. इति कृत्वा 'यथा गामनड्वाहं शकटस्य धुरि युञ्जीरंस्तद्द्वारा साध्यं कर्मजातं च साध्नुयुः, एवं मित्रावरुणौ बृहतो दिवः (पुं. पं१ तत आगत्येत्यर्थः) यजमानमनोरथसंसिसाधयिषयेव तेन क्रियमाणेषु कर्मसु आभुवं नाम सर्वसाधकं दक्षमुत्साहं युञ्जाते इत्यहो सत्कर्मप्रवृत्तिषु दैवोऽनुग्रहः' इत्येवं व्याख्यानं सुवचं द्र. ।

[i] विप. (अग्नि-, देव-, सोम- प्रभृ.) । उस. उप. √तुर् + क्विप् प्र. कृत्-स्वरश्च प्रकृत्या (पा ६,२,१३९) । निर्देश-याथार्थ्यस्य भूयोविमृश्यत्वम् एपू. टि. गतम् (एवं तु. WN ३,१६६ यत्र २अप्- इति पूप. आस्थायि) ।

[j] उस. कृत्-स्वरः प्रकृत्या (पा ६,२,१३९) । उप. √तुर् > तूर् + भावे क्यप् प्र. उसं. (पा ३,१,१०७) । तस्य च पित्त्वान्निघाते स्वरेऽविशेषः । सा. २अप्- तूर्य- (√तूर् + भावे यत् प्र.) इति कृत्वा षस. कर्मणि ष. कारकभावादप्रच्युता भवतीति दर्शनादिव कृत्-स्वरः प्रकृत्या आह (तु. वें., द्विपू. टि. च) ।

*अप्-स[a]-> ✓*अप्स[b]>

अप्सस्(बप्रा.)[c]– -प्सः ऋ [१,१२४,७;५,८०,६]; ८, ४५, ५; मा १४, ४; १५, ३; का १५, १, ४; १६, १, ३; तै ४, ३, १२, २; मै १, १०, २[d]; २, ८,१; ७; काठ ९, ४[d]; १७, १;६; क ८, ७[d];२५, १०; २६, ५; शौ ६, ४९, २[e]; पै १९, ३१, १५[e]; –प्ससा[f] शौ ६, ४९, २; पै १९, ३१, १५.

[°प्सस्– दीर्घ°, सहस्र°].

२अप् (बप्रा.)[g]–

*अध्>द्- अद्भिः[h] ऋ १, ९५, ८; १२२, ६; १६१, १४; ४, ५४,६; ६,४९,१४; ८,३५, ३; ९, ६५, ६; ६८,९; ७४, ९; ९१, २;९३,२;९७,४५; १०९, १७; १०, १४, ९[i]; ६१, २६; मा ६, २८[i]; १८, ३५; का ६, ७,६[i]; २०,१, ६; तै १, १, ८, १[j]; २,४,८, २; १०,३; ¶६, ५,१[j]; ८,३;७; ¶५, ६, २, २; ७, ९,२[j]; ३;६, ६, ३,४¶; ७,

---

[a] उस. उप. ✓सन्+डः प्र. उसं. (पावा ३, २, ४८)। स्वरः नापू. द्र. (तु. नाउउ. च यस्थ. अप्सरस्–, अप्स(र्>)रा– च यदीयायां व्यु. अस्यौपयिकता स्यात्)।

[b] नाउ. व्यु. औप. इति सुकल्पो नाधा. (तु. टि. ✓*अप् > अप्सन्त यत्रायमवान्तरभूतः धा. अपि विकल्पयेत)।

[c] असुन् प्र. (पाउ ४, १८९)। नित्स्वरः। ✓*अप् (<✓आप्)+असुन् प्र. (तु. या ५, १३ [यस्थ. स्क. दु., दे ३, ७ च] इतीव प्राचामध्वा दवीयानित्युपैक्षि। एतत्-सरूपं भिन्ननिष्पत्तिकम् (<अ+✓प्सा) अपरमपि प्राति. प्रागभिमतं भवति (तु. गपू. या. [तु. मै १, १०, २; काठ ९, ४; क ८, ७; म. [मा १५, ३])। तत्रापि यनि. प्राति. एव स्यादिति तु संभाव्येत। विशिष्टार्थवृत्तित्वे सत्य् अत्याचरणप्रकारकपापपर्यायित्वपर्यवसानादिति दिङ्मात्रमिह स्याद् विस्तरश्च वैश. द्र.। एस्थि. भक्ष्याऽभक्ष्यप्रसङ्गाऽकल्पानायां ✓प्सा इत्यस्मात् व्यु. विकल्पस्याऽनवसरः। यच्चापि मा १४, ४ इत्यत्र उ. म. च २अप्– इत्युपपदे सति ✓सन् इत्यस्य कर्त्रर्थे कृद्वृत्तमातस्थाते, तन्न। स्वरानुपपत्तेः। तथात्वे हि उप. कृत्-स्वरः स्यात्। किञ्च यद् मा १५, ३ इत्यत्र म. अकारान्तमेतत् प्राति. इतीव प्रतीतिं कारयेत्, तदपि सकारान्तत्वविनिगमकरूपान्तरसंगमनाभावफलमित्युपेक्ष्यम्।

[d] सपा. मा ३,४५;२०,१७ का ३, ५,२; २२, १,४ एनः इति पाभे.।

[e] सपा. काठ ३५,१४ क ४८,१३ जै४, १०,४ आपश्रौ १४,२९,३ वृक्षः इति पाभे.।

[f] सपा. आपश्रौ १४,२९,३ वृक्षसा इति पाभे.।

[g] १अप्– इत्येतत्-समाना व्यु. द्र. (वैतु. ✓आप् [>✓*अप्]+क्विप् प्र. [पाउ २, ५८])। यथा तूभावपि ✓आप् इति च ✓*अप् इति च <✓*अप्प् इति सगोत्रौ सन्तौ स्वाधीनावेव धा. भवत इत्यर्थम् ✓*अप् इत्यत्र संकेतितपूर्वोऽर्थः द्र.। अथ पाप्र. यदस्य प्राति. सुब्-वृत्ते सर्वनामस्थानीये रूपे आपः प्र३ इत्यत्र दीर्घत्वमनुशिष्यते (पा ६, ४, ११) तद् भूयोविमर्शसहं द्र.। असर्वनामस्थानविषयत्वेऽपि द्वि३ दीर्घत्वस्योपलम्भात् (तु. ऋ १, २३, २३; शौ १०, ७, १०)। एस्थि. मूलतः *आप्– इत्येतद् दीर्घादेः ✓आप् इत्यतो निष्पन्नं स्वाधीनं प्राति. सदपि कालेन २अप्– इत्येतेनाऽर्थाभेदवशात् समभित्तेति कृत्वा स्वतन्त्रानुक्रमणार्हस्य सतोऽपि तस्य यदिहैवाऽवान्तरस्य प्राति. इव निर्देशो भवति तत्र पूर्वागत-प्रसिद्धिमात्रानुरोधो बीजं द्र.। एवमपि २अप्– इत्यस्यैव भादौ प्र. परे तकारादेशो (पा ७, ४,४८) भवतीति यदुक्तं भवति तदपि नैव रुचिरम्। भकारे परतः सति प्>ब् इत्यस्य वर्णसंक्रमस्य स्वाभाविकत्वेऽपि प्>त् इत्यस्याऽतथात्वात् (तु. अब्-द्– अब्-भ्र- प्रभृ.)। तदेवं सर्वथाऽपि ✓अध्>*अध्- इत्यस्य भिन्नव्युत्पत्तिकत्वेन संभाव्यमानस्य सतोऽपि समानप्रवृत्तिकत्वाद् २अप्– इत्यनेन संभिद्यमानस्येहावान्तरभावेन निर्देशः द्र.।

[h] पाप्र. सुप्-स्वरार्थम् ऊठ्– (पा ६, १, १७१) इत्यत्र २अप्– इत्यनुरुध्य *अध्- इत्यस्याऽपि उसं. द्र.।

[i] सपा. तैआ १,२७,५;६,६,१। मा ३५,१ का ३५, ४,२ माश १३,८,२,३ द्युभिः इति पाभे.।

[j] =सपा. माश ३,९,३,२९ तैब्रा ३,२,८,१ शांश्रौ ८, ९,२ आपश्रौ १,२४,५। मा १, २१ प्रभृ. माश १, २, २, २ माश्रौ १, २, ३, १३ ओषधीभिः इति पाभे.।

५,२३,२; ¶मै १, ४, ६;८,३^{१};
२,४,७$; ८; १२, १$; ३, ७,
१०;१०,१^{२}; ४,३, १०; ५, ५;
काठ ६,३^{२};११,७;९; १०; १८,
१३; २१,७; २२, १३; २५,५;
७;९; २६, ८; २९,६; ३०, १;
३२,५; ३५, १५; ४३, ४; ४५
२०; ¶क ४,२^{१};२९, २$; ३९,
२; ५; ४०,२; ४१, ६; ४५,७;
४६, ४; †कौ २, १३५; ५११;
७६९; †जै ३, १३,११;४०,७;
शौ २, १०, २; ४, २७, ४; ५;
१२,३,३०; १५, १४, ६; १८,
१,५५†[a]; पै २,३,२; ४,१०,४;
५;१४, ७; ३५, ४;५; ५, ३४,
५; ७; ८,८,५; १४, ८†; १४,
१, ८; १४; १७, ३८, ९; १९,
५२,७?; २०,५२,९; अ॒द्भ्य॒ः[b]
ऋ १,३४,६; ८०, २; ११२,५;
२,१,१;३८,११;५.३१,९;७६,
४; ६,६२,६;९,५९,२;१०,३९,
४; ६३, २; ८०, ३; मा ६, ९;
७,२१; ११,२७†; १७,१; १९,
७३; ७४; २२, २५; २९; २४,
२१; ३१,१७;३९,२; का ६,२,
३; ७,८,४; १२,२, १६†; १८,
१, १; २१,५,२^{२}; २४, ११,१;
१६, १; २६, ५,१; ३५, २,१;
३९,१,१; तै १, १, ८,१; ३,८,
१; ९, १; ११, १; ५, १, ४¶;
८,१३,३; २,४,९,३^{२}¶; ३, ३,
¶६,२; ३^{२}; ५,८, १; ४, १,२,
५†; ६,१,१;६,१,७, १¶;३,६,
३; ४¶; ७,१,११, १; ४, १४,
१;५,२३,१; मै १, २,१५;१६;
३,३५; ७,२¶;२,७, २†; १५;
१०,१; ३, ९, ६^{२}; १०, १^{२}¶;
११,६^{२};१२, १०; १४, २;¶४,
१,९;५, १; ३^{१}; काठ ३, ५; ६;
८,८; १५; ११, १०^{२}; १५, ३;
१६, २; १७, १७; १९; २१,४;
२६,६^{१}; ८^{१}; ३०, ५^{४}; ३१, ७;
३८,१^{२}; ३९,२;४१,२; ४४,३;
४५, २०; ¶क $२, १२; १३;
७, ३;८,३; २८, १$; ४१,४^{२};
६^{१}; $;४७,७; शौ ३,३,३;१०,
५,३३; १३,७,९; १५, २, १७;
१९, ४३, ७; पै २,७४,३; १६,
१२४,८; १७,२१,९; १९,४६,
३; २०,८,३.

२अ॒प्- ?*अ॒पु(ः?) शौ २,३,६[c];
६,२३, ३[d]; अ॒पः ऋ १, ⌊१०,
८; ८, ४०,१०; ११⌋; २३,१८;
३२, १; ३६,८; ५१, ११;५२,
६; ८; १२;५५,६;५६,६; ५७,
६; ६४, १; ६; ८०, ३-५;९१,
२२; ९६,२; १००, १८; १०३,
२; ५; १०५, ११; १२२, ९;
१३१,४^{२}; १५७,५; १६१, ११;
१६४,४७[e]; १६५,८; १७४, २;

---

[a]) पाभे. अ॒द्भि॒ः ऋ १०,१४,९ द्र. । [b]) तु. टि. अ॒द्भि॒ः ।

[c]) यनि. प्र३ (=आ॒पः ⌊तु. सा. यस्य पाठः 'भव॒न्त्वाप ओ॒ष° ···' इति संभाव्येन⌋ तु. W., L ४८१ d उउ.) । एस्थि. सौवरो विरोधस्त्वपरिहार्यः स्यात् । सर्वनामस्थानविभक्तिस्वरानुपपत्तेरिति यावत् । स्यादेतद् यथा॒ मुपा. विकृत इति । तथाहि श॒ं नः इति इ॒न्द्रस्य व॒ज्रः इति च जागतपादद्वयात्मके पूर्वार्धर्चे सति आ॒रात् इत्यारभ्य गायत्रपादद्वयतया मूलतः संभाव्यमान उत्तरार्धर्चे पतन्तु इत्यतः पूर्वम् अस्म॒त् इत्यस्य (तु. शौ १, १९, १ प्रभृ.) वा प॒रः इत्यस्य वा (तु. शौ ८, २, १२) च्युतस्यैव सतः पदस्य सुपूरता द्र. । अथ प्रथमस्य जागतस्य पादस्य यतिभङ्गभङ्गार्थं श॒ं नो भवन्तु, *अ॒पौ॒षधयः शिवा॒ः इति वा श॒ं नो भवन्तु, *अ॒प ओ॒षधीः शिवा॒ः (तु. नाउ. टि.) इति वा मौलिकी स्थितिः स्यात् । प्रथमे कल्पे अ॒प इत्युपसर्गश्रुतेः *घ्नन्तु इति क्विप. हन्तु इत्यतः परिणमय्याध्याहार्य्यम् । ओ॒षधयः इत्येतत्-कर्तृ-शिरस्कं श॒ं भवन्तु इति च रक्ष॒स॒ोऽप घ्नन्तु इति च वाक्यद्वयं क्रियेत । द्वितीयेऽपि कल्पे तावद् वाक्यद्वयान्तरं भवति । (२अ॒प्->) *अ॒पः (प्र३) श॒ं नो भवन्तु इति च ओ॒षधीः शिवा॒ः (भवन्तु) इति च ।

[d]) नापू. टि. दिशा श॒ं नो भवन्तु, *अ॒प ओ॒षधीः शिवा॒ः इति मौलिक्यां स्थितौ संभाव्यमानायाम् *अ॒पः इति कर्तृपदस्याऽऽर्थसंनिकर्षानुरोधतो यतेः पूर्वं पाठप्रवृत्तेराविर्भावाद् यतेः (५, ७>७, ५) इत्युत्तरसंक्रमः समजनि, तज्जः *अ॒प>अप॒ इति स्वरपरिणामश्च । एस्थि. अपि भवन्तु इत्यत्रान्ते यण्-सन्धिरनिष्टः स्यात् । गायत्रेणार्धर्चेन जागतपादस्यैव सुयोजत्व-प्रसिद्धेः [तु. शौ २, ३, ६ (यत्र द्वितीये कल्पे ⌊तु. टि.⌋ जागतपादपूर्त्यर्थकतयैव ओ॒षधीः>ओ॒षधयः इति पाठस्य परिणामः सुवचः)] । एस्थि. नेह अ॒पः> अप॒ः इत्येवं परिणामो निर्देश्यः (तु. W., गपू. L. च) किं तर्हि *अ॒प >*अप॒ इत्येवमविसर्जनीयान्तं च सयतिकं चेति । यतिमात्राधीनतया परिणामस्य पर्यवसेयत्वादिति दिक् ।

[e]) सपा. तै ३,१,११,४ मि॒हः इति पाभे. ।

[९; ६, २०,१२]; १८०, ४; ५;
२,११,५;१३, १; १४, २; २०,
७; २२, ४; २७, १३: ३६. १;
३, ६,७; ९,२; ३१, १६; ३२,
५; ६; ३४,८;**४**,१६,६-८; २६,
२;२८,१;[३८,१०; **१०**, १७८,
३]; ४२,४; **५**, २, ११; १४,४;
२९,२; ३०, ५;६; ३१, ६; ८;
४१, १४; [४६, ३; **७**, ४४,१;
१०,३६,१]; ४८,१;८३,६; ६.
२०,२;२२,८; २८,७;३०,४;५;
३२, ५; ३९. ५; ४७,१४; ५७,
४; ६०,२^{२};११;६२, २; ६४,४;
[६८,८;**७**,६५,३];७२, ३; ७३,
३;**७**,९, ५;[(**२**, ११, २) २१,
३];३२,२७; ५६, २४; ६८, ८;
९५,१; ८, ३, १०; ६,१३;१६;
७,२२; २८;१२, ३; १५, २;६;
२६,२५;[३२,२;९,१०९,२२];
७६,३; ८३, ३; ९६, १८; ९७,
१५; ९, २,३; ३,६; [७,२;९९,
७]; १६,२;४२,१;६१,२२;६२,
२६; ६८, ४; ७०, २; ७८, १;
८५,४;[(९,८३,५) ८६, ४०];
९०,४;९१, ६; ९४, १; ९६,३;
१३;१०७, ४; १८; १०९, २१;
१०,९,५;१६,३;३०, १-५;१०;
३६,१;४३,८; ५१, १; ५८,७;
६१,१६;६४,८;६५,७;११;६६,
८;७६,३;८९,४;९५, १०; ९८,
५;१०४, ९; ११३, ६;१२१,९;
१२४, ७; १३८, १; १४७, १;
खि **५**, ५,२; ७; १४, ३; मा **४**,
१३; **६**,२२; ८,२४;**१०**,१;**११**,
३८; **१२**, ३८; ३९; १०२†;
१४,८; **१८**,५५[a]; **२०**, २२‡[b];
२३,७; १७^{१}; **२५** १;२; ७; ९;
३३, ४९†; **३४**, २२†; **४०**,४;
का **४**,५,५; **६**,५,३; **९**, ४, २;
११.२,१; **१२** ४, १; **१३**.३,९;
१०;७,१†; **१५**. २.३; **२०**, ३,
५[a]; **२२**, १,७‡[b]; **२५**,३, ३;४,
६^{१}; **२७**,१,१;२, २;७,१;९,१;
२९, ४,४†; **३२**,४, ६†; **३३**,
१,१६†; **४०**, १, ४; तै **१**, ४,
४५, १; ३‡[b]; ४६‡[b]; २[c]; ५,
११,४†; ¶६,७,४;८,१;८,११,
१;१८,१¶; ¶२,१,११,४†;३,
१२,२;१४,६\$;४,१०,३;६,५,
१^{२}; २;६,१;**३**,१,११, ७^{२}†;३,
४,३¶;११,५†; ५,६,१[d]; **४**,१,
२, ४; २,३, ३^{१}; ७, १†; ३,४,
३; ७, १२, २; ¶**५**, १, ३,१^{२};
५,१; ६, १;९,३,२; ३,१,३;६,
२,१;४^{२};\$७, १२, १; २०, १;
¶**६**, १,१,३;७[e]; २,६, १;१०,
३;११,२;३,४,१;४,१, ५;२,३;
४^{२}; ३,२[e];३^{१}; ५,८,६; ६,३,१;
७,१,२०,१; ४, २०,१; मै ¶**१**,
३, ३९^{२}‡[b]; ४,४\$;१०^{२};६,३^{१};
७,२;८,२;३;९;९,२\$; १०, ५;
१९; २, १, ५¶;२, १३^{१}¶; ४,
७^{१}[a]; ८¶; ६, ८; ७, ४; १०^{१};
१८†; ८,२; १२, ३[a]; ¶**३**, १,
५^{२};\$; ६^{२};२, ४; ९;३, ५; ६,
२;७; ९^{२};७,७;८,४; ९,३;१०,
१;७;१२,१८\$;\$१५,१; २; ८;
९;¶**४**,१,१†;३;४^{२};९^{४};२,२^{१};
३,४;४,१; ३;५,१[f];२[f]; \$^{२};३;
४^{१}; ७,७; ८,५^{५};९; ९, २७†;
†१०, २; ६;†११, २;३; १२,
३\$; ५^{२}†[f]; \$; †१४, १; ७;
११; १३; १४^{२}; १८; काठ **४**,
१३^{१}; ‡[b]; १५^{२}; १६; ५, ६;
६, २; ३; ८, २; ९^{१}; १५; ९,
१०; १८; १९; **११**, ५; ९†[f];
१३^{२};†[f]; **१२**, १४; **१३**, १५;
१५, ६; **१६**, ४; १०^{२}; १४;
१७, १; **१९**, ५^{१}; **२०**, १०;
२१, १४; **२३**,१;६; ११; **२४**,
१; ४^{२}; **२५**,२; ३^{२}; ७^{१}; **२६**,
१^{२}; ८; **२७**, ४; **२९**,
३^{२};‡[b]; ¶; ५; **३१**, ३^{२}; ७^{१};
३२, ५; ७^{२}; **३४**, १८; **३६**,
१;१३; **३७**,१२; **३८**,५‡[b]; ७;
४०, ११; **४१**, ११; **४४**, ९;
५३,२;१०; ¶क **३**,११^{२}\$;‡[b];
४, १;२; **६**,७; **७**, ५^{१}; ८ ३;
२५, १^{२}\$; ५†; १०\$; **२९**,
४\$;**३०**,३^{२};\$; **३१**,२\$; १०;

---

[a] सपा. तै २,४,८,१ प्रभृ. उदुभिः इति पाभे. ।

[b] सपा. ऋ १, २३, २३ आपः (द्वि३) इति पाभे. (यत्र सौ [पा ६, १, १६८] इत्यस्य च ऊठ् [पा ६,१,१७१] इत्यस्य च समानः प्रवृत्त्यभावः द्र.) ।

[c] अत्र भा. 'कर्मणि' इत्येवं व्याचक्षाणश्चिन्त्यः । कर्मवाचिनो हि १अपस्- इत्यस्य भिन्नस्वरत्वाद् बहुषु रूपान्यथाऽऽपत्तेश्च । एवं चेदनिष्टः कर्मार्थाभिसंबन्धस्तर्हि १अप्- इत्यस्यैतद् रूपं गृह्णाणेति । न ह्येतदपि सुवचं भवेत् । तदर्थं समग्रबाह्वृचप्रकरणसंगमनसापेक्षता °द्र. । ततो ह्येतत् स्पष्टं भवितुमर्हति यथा कथमत्र २अप्- इत्येतदेव प्राति. सावकाशं न किमप्यन्यत् कर्मवाचीति दिक् । भूयांस्तु विस्तरः वैश. द्र. ।

[d] सपा. माश्रौ २,१,२,७ प्रभृ. अद्भिः इति, शौ १४, २,७० पयसा इति च पाभे. ।

[e] पाभे. अधि मै ३,६,३ द्र. ।

[f] पाभे. अपः ऋ १,१६४,४७ द्र. ।

१२; **३५**,७; **३७**, २; ५; **३८**,
५; ६^{२}; **३९**,५^{२}; **४०**,४^{२}; **४१**,
६; **४२**, ४; **४५**, ४\$; ६^{२};
४७, ३^{२}; ७; †कौ **१**, ५३;
१४८; ३३९; ३७१; ४१३;
४६६; ४७८‡[a]; ४९३; ४९४;
५११; ५३२; ५३९; **२**, २५;
११४‡[a]; १२६; २३२; ३६२‡[a];
३८९; ४७९; ५००; ५६६;
६०७; ७६०; ७७४; ८०७;
३, ३, ३; ११; †जै **१**, ५, ९;
१६, ४; ३५,८; ३९, २; ४०,
५; ४८,६; ५०,२‡[a]; ५१, ७;
८; ५३,१; ५४,८; ५५, ८; **२**.
१,३; ३,१; **३**,३,४; १२, १‡[a];
१३, २; २०, १६; ३०, ५‡[a];
३१, ९; ३६, ४; ४४, ६; ४९,
९; ५७, १२; **४**, २८, ५; २९,
१; ३०, ७; शौ †**१**, ४,३; ५,
४; **२**, ५, ५; **४**, १५ १२^{२}†;
२१, ७†; २७,४; **६**,२२, १†[b];
२; २३, १; **७**, ४२, १; ७९,
१; ९४, १‡[c]; ११४, २; ८,
९, २३; ११ ८; १०; **९**,६, ४;
१५, २२†[b]; **१०**, २, ७; ५,
३३; ४६‡[c]; ९, २७; १०, ८;
११, १,१५; १८; ७,७; ८, ११;
१०, २८; **१३**,१, २; २१†; ३,
९†[b]; **१४**, १, ३७†; २, ६९;
१५, १४,५; ११, ४; **१८**, २,
७†; **१९**, २, ५^{१}; १८, ६;
†**२०**, ९, ४; ११, ८; १५, ६;
१७,८; ३६, ८; ४९, ७; ६१,३;
५; ६२,९; ६३,९; ७५, २^{१}; ७७,
६-८; ७९, २; ९०, ३; १२८,
१४\$; पै **१** ८४,९; **२**, ८३,१;
३. ३१,१-८; **४**, ९,३; २४, १;
३५, ४; **५**,२, ८; ७,१०; ११; **६**,
३,१; १०, २; **७**, १७,६; ८,८,
४; ५; ११^{१}; १०, ८; **१३**, ६,१†;
१४,१,१; ६; ८; ३,९; **१५**,१४,
४; २२,२; **१६**, २०,२; ५१,८;
६०,९; ६९, १३†; ८७,९; ९०,
५; ८; ९१, ७; १०७, ८; १११,
४; ११२, ८; १३१, १-१०[d];
१३३, ११; १३८, ८; १५०,९;
१५३,७; **१७**,२८,५; **१८**,४,६†;
१३,९; १५,२; १७,१†; **१९**, १,
१२; ४, ९[e]; १०†; १२; २२,
१०†[b]; ११; **२०**,१०,१; ४६,१;
६१,९; †अप्रा ऋ ८, ४,३; कौ
१,२५२; **२**,१०७१; जं **१**,२६,
१०; अप्राइः[f] तै **६**, ४, ३,४;
अप्राम् ऋ **१**,२३,१९; ३२,११;
४६,४; ५१, ४; ५४, १०; [५६,
५; ८५,९]; ५७,१; ६१,१२; ६७,
५; ७०,२; [१००, ११; **६**,४४,
१८]; १२२, ३; १३४,५; १४४,
२; १४९,४; १५८, ६; [१६४,
५२; **३**,१, १३]; १६८,२; १८१,
१; १८७,८; **२**,[४, २; **१०**,४६,
२]; १२,७; १७, ५; १९,३; २१,
१८; ३०,१; **३**, १, ५; १२; ५,
३; २५, ५; ४५, २; **४**, २१, ८;
४०, १; ५८, ११; **५**, ४६, ७;
६,८,४; १३,१; १७,१२; ४७,
२७; ५२,१५; ६४,१; **७**, ९,३;
८२,३; ८८,३; ८९, ४; १०१,२;
१०३,४; ८,१४,१०; १३; १६,
२; [१८, १६ (३१, १०)]; १९,
४; २५, १४; ४४,१६; ९३,२२;
९, ३३, १[a]; ४९,१; [७२,७; ८६;
८ (२१)]; ७४, ३; ७६, ५; २५,
३६; ९५,३; ९६,१९; ९७, ४१;
५७; १०८, ५; १०[a]; १०९, १३;
१०, ८, [१; ४५, ३], ५; १७,१४;
३६,८; ४६, १; ४९, २; ५१,८;
७७,४; ८९, १०; ९३, ५; ९८,
१२; १२३, १; १२४, ९; १४२,
७; १६८ ३; खि **४**, ७,१,७; २,
६; ५,५,३^{२}; ११; मा **३**, १२†;
६,१०; **७**,१६†; ९,३^{२}; ६†; **१०**,
३^{४}; ७; **११**,२९; ४६; **१२**, २०;
३७; **१३**, २; १४†; १७; ३०;
३१; ५३^{१२}; **१४**, ५; **१५**,२०†;
१७, ६; ७; ३२; ८७; ९९†; **१८**,
५४; **१९**,७१†; ९४; **२२**,६; **२४**,
३७; **२५**,५; **२९**,५३†; का **३**,
३,२†; **६**,२,४; **७**,७,१†; **१०**,
१, ४^{२}; २,३†; **११**,२,३^{४}; ४,३;
१२,३,२; ४,१०; **१३**,२,३†; ३,
८; **१४**, १,२; १४†; २, २; ३,४;
५; ६,१^{११}; **१५**,१,५; **१६**,५,१†;
१८,१, ७; ८; ३,८; **१९**, १,१;
१२†; **२०**,३,४; **२१**,४,२१†;
६,१५; **२४**,२,१; **२६**,८,१; **२७**,
४, १; तै **१**, ३, ८, १; १०, २;
१३,२; ४, ८, १†; †५, ५, १;
१०, ३; ७, ७, २†; १२,२^{२}; ८,
११,१^{१}; १२,१; **२**,१, ¶९,२^{१};
३; ११,१†; ४,७, १; ९,३¶; **३**,
१,११,३†; ३, १, २; ४, १^{१}¶;

---

[a]) सपा. यक्र. ऋ ९, ३३,१; १०८,१० अप्राम् इति पाभे. । [b]) पाभे. अपुः ऋ १,१६४,४७ द्र. ।

[c]) पाभे. अपुः मा २०,२२ द्र. ।

[d]) अपाम् इति पाठः? यनि. शोधः (तु. टि. ? अप्राकाम) ।

[e]) सपा. शौ ६,१७,३ गिरीन् इति पाभे. ।

[f]) प्रश्नान्त उदात्तपि प्लुतिः उसं. (पा ८, २, १००) ।

५,१;३¶;९, १;४, ५,१; **४**,१,
३,१; ४,३;२,३,३; ८, १;३,१,
१^{२}; ४,३;११,५;४, ४,१†;६,
१,२;३†; २,४;६,६†; ७, ११,
२;५,१,४, १; २¶; ५,७; ८¶;
२, ६, ५^{१}¶;४,४,२^{२}¶; ५,१०,
६;७;२०,१;२१,१; ¶६, २,१;
४;४,३; ५;७,२१,१;¶**६**,१,९,
३[a]; ३,६,४^{२}\$; ४, ३,३;४,२;
६, ५,४^{२}; **७**, १, १४, १; १६,
१; मै **१**, २, १; १५; १७; ३,
१०†; †५,१;५; ११, १†;४^{२};
२,४,८^{१}¶; ५,१०;६,३¶; ७^{१};
८;७,३;४;१०; १६^{२}; १८^{१२};८,
१;१०, १^{२}†; ३; १२, ३; १३,
१०; **३**, १,५^{१};६^{२}; ३,६^{१}¶,६,
२^{१};¶; ७,२^{१}¶; ९, ६^{१}; ११,६;
९; १२,२;१४,१८; १५,४;१६,
३†; ¶**४**, ३,४^{१}; १०^{८}; ४, १^{४};
५, २^{६};४^{४}; ७,७;९,१०\$; ११,
२†; १२,३†; १३, १०†; काठ
२,१;१५; **३**, ५;७; **४**, ३;**६**,९;
८,५;११;१६;**११**,९;१०^{१}; **१३**,
९; १४; १५; **१४**, ३^{२}; **१५**,२;
६^{१}; **१६**,३;४;१०; १५; १८^{१२};
१७,१;१७^{२}; **१८**, १; १५;**१९**,
४^{२}; ५^{१}; १४; **२०**,५; ७^{१}; **२१**,
७^{२}; **२२**,९^{४}; १३; **२३**, १;११;
२४, २^{१}¶[a]; **२६**, ८; **२९**,३;५;
३०, ७;१०^{१}; **३५**, ३; ४; **३६**,
१५^{८}; **३७**,१^{२};**३८**, ३; **३९**, १;
३^{२}; १०; **४०**,६–८; ११; **४१**,
५;७; **४६**,१;**४७**,१०;११;५३,
११; क **१**,१३; **२**,१२; १४; **३**,
३†; **४**, ८†; ¶**७**, १; ८; **२५**,
१; ६; ९^{११}; १०; **२८**, १^{२}; २;
२९, ४; **३०**, २^{२};३^{२}; **३१**, ७^{२};
९^{२}¶; ¶**३५**,३^{१}; ६; ७; ¶**३७**,
३; **४१**,६; **४५**, ६¶;**४६**,८^{२}¶;
४८,५†; †कौ **१**, २७;७१;७७;
२११; ३३७\$; ४३१; ५४२;
५४४; ५८४; **२**, ५२७; ६०५;
७८५; ८८२; १०६९; ११२५;
†जै **१**,३,७;७, ९; ८, ५; २२,
८;३५,६\$;४२,५;५५,९; १०;
५९,७; **३**,४०,१;४१,३;४९,२;
४,२२,६; शौ **१**, ४, ४^{१}†; ३५,
३; **४**,४,५; ८, ५[b]; १५, २;३;
१०;१२; ३७, ३; **५**, ५,७;१९,
१३;१४;२४,४; २८, ६;२९,८;
६, १०६,२†; १२४, १; १२५,
२†; †**७**,४०, १;५१, १; ८,७,
८; **९**,४.२; ५;**१०**, ५,७–२१;
५०;८,३४;३५; **११**, १,१३;६,
२६; **१५** २, १८; **१६**, १,१;६;
१८, ३, ५; ५६†; ६५†; **१९**.
२,४^{१}; ३१, १; ४२, ४; ४५,३;
†**२०**,१५,१;२८,४;२९,३;३४,
७; ३५,१२; ३९, ५; ४४,२; पै
१,८३,३; १०७, ४; **२**, ३२,३;
३६.३; ५९,४;७६, १; ८७, ३;
३,२१,४; **४**,२,६[b]; ५,५;**५**,७,
२;४;८; ११; १०, ५; **६**, ४,६;
१६,९†; ८,८,१०^{१}; १३,११†;
९,१६, ५; २२,१०; २३, १९;
११,१,१०; **१२**, ३, १०; ५,१;
७, १४^{२}; **१३**, ३, ७; ४, ३; ६,
११†;७,७†;९,७; **१५**,४,३;७,
२;११,६†;**१६**,१२,८; १३,१;
२३, ६;२४,२;४;९०, ३;१२४,
८^{२}; १२८,१–९; १२९,१–१०;
१३१,१–१०;१३२,११; १५०,
९; १५२, १; २; **१७**, ३५,७[c];
१८, २८,१; **१९**,२४, १५;३३,
४†;४०,४;४७,१२;**२०**,९,८†;
२९,७;५९,२; अप्सु ऋ **१**,२३,
१९^{२}; [२०; **१०**, ९, ६]; [५९,
३;९१,४];६५,५;९५,३; १०४,
६;१०५,१;१०८, ११;१०९,४;
११६, २४; ११७, ४; १३५,६;
१५१, १; १६३, ४; १८२, ६;
१८४,३; **२**, [११,५; **३**,३९,६;
१०, १४८,२]; ३५, ४; ५; ७;
८;३८,७;**३**,१, ३;९, ४; १३,४;
२२, २; **४**, १३, ४; ५, ४४,६;
४५,११;८५, २[d]; **६**, १९,१२;
[२५, ४;६६,८]; २९,५;३१,१;
४६,४;**७**,१८,१२;७०,४;१०३,
५; ८,१,१७;९,५; ४३, ९;६८,
९;८२,८; ९, २,५; १६,३;२०,
६; [२४,१; ६५, २६ (६७, ७;
१०१,८)]; ३०,५; ४२,१;६२,
४; ५; ७१,३; ७९, ४; ८०, ५;
८५,१०; ८९,२;९६,१०; २४;
९७,४७;४८;१०७, १; २; **१०**,
१०,४;२७,१७;३०,४; ३२, ६;
४५, १;३;५;५०,२; ३; ५१,३;
६३,१५;६५, ९; ७३, ९;१०४,
२; १२५,७; खि **१**, ११, २; **२**,
१४, ९; मा ८, २५; ९, ६^{१}†;
२३; †**१२**, १८; २०; २२;
३५‡?[e]; ३६;४८; **१३**,८; **१८**,

---

[a] पाभे. अ॒न्ते तै ६,१,९,३ द्र. ।

[b] सपा. काठ **३६**,१५;**३७**,९ तैब्रा **२**,७,७,६; १५,४ रुचा॒ इति पाभे. ।

[c] सपा. शौ **३**,१२,८ विभे. ।

[d] सपा. मै **१**,२, ६ दिक्षु॒ इति, मा **४**,३१ का **४**,१०,२ तै **६**,१,११,३ काठ **२**,६;**४**,९ क **१**,१९ माश **३**,३,४ ७ दिक्षु॒ इति च पाभे. ।

[e] शोधस्य कृते तु. सस्थ. टि. बिभृता॒ । सपा. ऋ **६**,७५,४ प्रमृ. विभे. ।

५५[a]; १९,२;९४;२०,१९,२३, १४;२९, १५†; ३३,९०†; का २,३,५; ९ ४,३: १०, २,३[१]†; ५,१; †१३,२,१;३;५;३,६‡[b]; ७;४,४; १४,१,८; २०, ३,५[a]; २१, १, २; ६, १५; २२.१,४; २५,४,३; ३१,३,४†; तै १,३, १४,५†; ४,४५,२;७,†७,१;२; १०,१; २,३,१२,२¶; १३, १; १४,१†; ५,१, ६¶;१२,२†;३, २,५,७; ४,३,८[२]¶; †४, २,२, १[२]; ३; ३, २; ४, ३;८,३;११, ३;६,७,२; ¶५, २,२,४;५[२]; ३, १०,१;५,९,३$; ¶६,१,१,२[२]; ४,१,५[c]; २, १;४, २;९,२; ६, ३, १; ४$; ¶७, १, ६, २-४; मै १, ३, ३९[२]; ८, २[२]¶; ११, १[२]†; ४;६[२]†; २, १,९;३,१;७, ९[३]; १०†;११†;१५[d];१३,१०[e]; १३; ¶३. २,२;६; ६, २[३]; ३[f]; १०; ७,४[g]; ११, ७†; ९$; ४, ¶२,३;९;¶६,२[२]; ८, ५; ९,६; †१०,३;४[२]; †१२, ४; ५; काठ २,१४[२]; ४,१३[२]; ६,२;७,१३[२]; १४[२][h]; ८, ८; ९[२]; १०, ११[i]; ११,१०;११;१३;१३,१२;१४[२]; १५; १४, २;६[२]; १६, ९[३]; १०; ११;१५;१९,१२[२];२२,१३;२३, १[f];६; २७,४; २९, ३[२];३५,३; ४; १२;१४; ३७, ९; १८; ३८, ३;५; ३९,५;४०,३;५;६; क ३, ११[२]; ४,१¶;६,३[२];¶७, ३;५[२]; २५ ,१†;२;६; ३१,२[२]¶; ३५, ७¶; ४२,४¶;४८,४†; ५;१२; †कौ १, ३३१; ४१७; ४७३; ५१२;५६४‡[1]; २, ३११; ३२३; ३५८; ३५९;३९१;६६३;६६४; ९६४‡[1];११९४; †जै १,३४,९; ४०, ९; ४९, ७; ५३, २; ५७, ११‡[1]; ३,२५,७; २६,९; ३०, १; २; ३१, ११; ५५, ४; ५; ४, १९, ८; २०, ८‡[1]; शौ १, ४, ४[२]†; ६, २†; ३०, ३; २, ३१, ५;३,२१,१; २२, ३; ४, ८, ७;१०, ७; ३०, ७†; ३७, १०; ६,३८,२[j]; ८०,३; १३२, १-५; ७, ८८, १[k]; ९२, १; ८, १,११; १०, ५, १५-२१; ८, ४०; ११, २, २४;४, १२, ७, १३;८, २३;१०, ३४; १२, १, ३७; १३, १, १ ; २; ५०; २, ३०;३,१५; १४, १, ३७†; १६, १,७;१७,१, ८;१३; १८, १,४†;३,६०‡[1]; ४,८९†; १९, ३, २[२];८,१; २७, १०; †२०, ३३,१; १३९,५; पै १,१४, ३; ७०, २; ९१, २; १०४,४[e]; २, १५,५; ३१,६; ३४,३;३, १२, १; ४,२,४;२५,७; ८, १०, ७; १४,३†; ९,३,४; १०,७, १०; ९, १; १३, ४, ४; १५, २१, ९; २२,४; १६,२,१; १९, १[e]; ५६, १३ ; १०६ , ४ ; १२९, १-१० ; १५०, ७ ; १५१, ५; १५४, ४; १७, ४ , ७; ६, ९; १५, ६; १८, ४, ६†; १५, १; २; १९, १०; २३, ७; ३१, ३; ३२, १४†; १९, १६,१३; २२, २; ४८, ७;२०, ४, २; २७,१; ३२,४;६.

१आप्- आपः ऋ १,८,७;२३, २०; ⌊२३; १०, ९,९⌋; २४, ६ ; ३२, २ ; ८ ; १० ; ११; ३३, ११;५७, २;६३, ८; ६५, २; ८३,१;२; ९६, १; ⌊१००, १५ (१६७, ९)⌋; ११६, ९; १२५, ५; १५३, ४; १६१,९; १६९, ३; १७३,८; ⌊१७५, ६; १७६ , ६⌋; १७८, २ ; १९०, ७; २, २४, १२; ३०,१; ३५, ३; ४; १४ ; ३८, २; ३, १, ११; ५, ८; २२, ३ ; ३०, ९; ३३, ७;३५, ८; ३६, ६; ५१, ५; ५४, १९; ५६, ४ ; ७; ४, ३,१२; १७,२; ३;१८, ६-८; ३३,७; ⌊४७, २ (५, ५१, ६;) ८, ३२, २३⌋; ५७,३; ५,३४,

---

[a] पाभे. अन्तर् तै ४,७,१३,२ द्र. ।

[b] तु. टि. अप्सु मा १२,३५ ।

[c] सपा. मै ३,१०,७ उदकम् इति पाभे. ।

[d] वैतु. केचन मूको. सात. BW. MW. प्रभृ. च अप्सुषदस्- इति मिथ्याभूतम् अनिर्देश्यं प्राति. आहुः । वस्तुतः पपा. अनुरोधतः स्वरतोऽर्थतश्च अप्सु । सदांसि इत्येवं द्वैपद्यस्यैव सद्भावात् । उप. नतिरेवात्र भ्रमकरणीति (तु. सपा. काठ १६,१५ यत्र द्वैपद्यं नत्यभावश्च) ।

[e] पाभे. अन्तर् मै २,१३,१० द्र. ।

[f] पाभे. अधि मै ३,६,३ द्र. ।

[g] पाभे. अन्ते तै ६,१,९,३ द्र. ।

[h] सकृत् सपा. मै १,६,२ वनस्पतिषु इति पाभे. ।

[i] सपा. ऋ ९,८६,४३ आसु इति विशिष्टः पाभे. ।

[j] सपा. काठ ३६, १५ तैब्रा २, ७, ७,१ अश्वेषु इति पाभे. ।

[k] =सपा. वैताश्रौ १०, १२; २३, २० कौसू ३२, १४;१२७,४। काठ ३,८ क २, १५ आश्रौ ३,६,२४ द्वीपे इति पाभे. ।

[l] सपा. ऋ १०,१६,१४ विभे. ।

अप√नुद्, ¶अपनुदते तै १, ७,४, २; २, ४, १, ४; ५, ७, ३, १; ६, ४, १०, २; मै ४, ६, ३; काठ ६, ४; १०, ७; २०, ६; २१,२[d]; ४; २२, १०; २५, ७, २८, १; ३१, ११; क ४, ३; ३१, ८; १७[d]; १९; ३५, ४; ३९, ५[e]; ४४, १; ४७, ११; ¶अपनुदति तै ५, १, ८, ६; अप…नुदे पै १९, २३, ४; अपनुदामः शौ १०, १,१;२; पै १६, ३५, १; अपनुदताम्[f] मा २,१५^{२}; का २, ४,१^{२}; अप…नुदताम् मै १, ५, १; अप-…नुदेताम् काठ ३१, १४; ‡अप…नुदन्ताम्[g] मा २८, १३; का ३०, २, २; अप…नुदन्तु शौ १२,३,४९; पै १७ ४०,९; †अप…नुदस्व ऋ ३, ४७,२; ६, २१,८; १०, १३१, १; मा ७, ३७; का ७, २०, १; तै १, ४, ४२, १; मै १,३ २३; शौ २०, १२५, १; †अप (नुदस्व)[f] ऋ १०, १३१, १; शौ २०, १२५,१; पै १९, १६, ८; अप…नुद मे १, २, ९; ३, ८, ७¶; ¶अपानुदत तै ६, २,७,५; काठ ८,४; २७, ८; क ६,९; अपानुदत् पै १, ७१, २; ¶अपानुदन्त तै १, ७,४,२; २, ४,१, २; ३; ५, ७,३,१; ६,३, १, ४; ४,१०,४;६,४, ४; मै १, ९,८; ३, ६, १०;८,१०^{२}; काठ १०,७^{१}; अपनुदन्त ऋ १,१६७, ४; †अपानुदः ऋ १०, १८०, ३; तै १, ६, १२, ४; काठ ८, १६; शौ ७,८९,२; पै १,७७,१. ?अपनुद्यातु[h] पै ७,८,१.

अप-नुत्त[i]- -त्तः पै १६, १३१, १-१०; -त्ता काठ ४, ४; २७, ८; क ३, ३; -त्तौ तै ६, ४, १०, २¶; मै १, ३, १२; ४, ६,३.

¶*अप-नुत्ति[j]- -त्यै काठ ८, ४; २७, ८; क ६, ९. [°त्ति-भ्रातृव्य°]

अप-नुदत्- -दन् पै १९,३२,१२.

¶अप-नुद्य तै ६, ४, १०, २; मै ४,६,३.

¶अप-नोद्[k]- -देन मै ४,६, ३.

*अ-पन्न[l]- > अपन्न-गृह[m]- -हस्य मा ६,२४; का ६, ६, २; तै १, १, १३, ३; ३, १२, १; मै १, ३, १; काठ ३, ९; क २,१६.

¶अपन्न-दत्[n]- -दन् मै ३, ९, ५.

---

[a] बस. (पावा २,२,२४) पूप. प्रकृतिस्वरम् ।

[b] विप. (गो-) । गस. उप. कर्तरि उकञ् प्र. कृत्स्वरश्च प्रकृत्या (पा ३,२,१५४; ६, १,१९७;२,१३९) ।

[c] सपा. ऋ १०,१०९,४ उपनीता इति पाभे. ।

[d] सपा. मै ३,२,१० प्रणुदते इति पाभे. ।

[e] पाभे. अपतरम् मै ३,८,६ द्र. ।

[f] =सपा. माश १,८,३,१ । शांश्रौ ४,९,५ अपनुदन्तु इति पाभे. ।

[g] सपा. ऋ ६, २८, ४ अश्नुते इति, मै ४, १३,८ काठ १९, १३ मा…प्रणक् इति, तैब्रा ३, ६, १३, १ मा…पृणक् इति, खि ५,७,१,२? प्रणक् इति च पाभे. ।

[h] उपनद्यातु इति मूको. पाठः? यनि. वाऽन्यथा वा शोधः ।

[i] निष्ठा-तकारस्य वैकल्पिको नकारादेशाऽभावः (पा ८, २, ५६) ।

[j] अन्निति- टि. द्र. ।

[k] गप. घञन्ते थाथादि-स्वरः (पा ६,२,१४४) ।

[l] तस. नञ्-स्वरः । उप. <√पद् इति ।

[m] विप. (अग्नि-) । बस. पूप. प्रकृतिस्वरम् ।

[n] विप. (पशु-) । उप. व्यु.? तु. टि. दुत्- । पाप्र. दन्त> दत् इति समासान्तः (पा ५,४,१४२) ।

¶अपन्नदती[a]- -ती तै २, १, २, ७; मै २, ५, २; काठ १२, १३.

अप √पत्, >पाति, ?अपपपात[b] पै ५,३६,५; अप···पप्तन् पै २०, ५९,२.

अपपातय पै ४, १३, ५; अप-(पातय) शौ १९,५०,५; पै १४, ४,१५[c].

अप √पद्, अपपद्यते शौ ४, २८,५; पै ४,३७,३;५,२२,३.

अप-परे(रा √इ), अप···परेत्[d] ऋ १०,६१,८.

¶अप √पश्, अपापश्यन्[e] मै १,१०, १६.

अपपापम्[f]- -पम् शौ १९, ८, ५; पै २०,४६,२.

अपपित्व[g]- -त्वम् ऋ ३,५३,२४.

अ-पपिवस्[h]- -पुषः शौ ६,१३९,४.

अप √पू, अप···अपुनत पै ५, १९,७.

अप √पृ >पर्, अपपर्वि ऋ १,१२९, ५.

अप-प्र √गा, अपप्रगाः पै ५, ३६, ४;८.

अप-प्र √वह् (वहने), अप···प्र··· वहन्तु शौ १०, ५,२४; पै १६, १३०, २; अप(प्र···वहन्तु) शौ १६, १, १०; (अप)प्र···वहन्तु शौ १६,१,११^{२};(अप)प्र(वहन्तु) शौ १०, ५,२४^{२}; पै १६,१३०, २^{२}.

अप-प्रा(ण>)णा[i]- -णाः तै ५,३, ६,२¶.

अप √प्रुथ्, †अपप्रोथ[j] ऋ ६, ४७, ३०; मा २९,५६; तै ४, ६, ६, ७; मै ३,१६, ३; काठ ४६, १; पै १५,११,१०.

अप-प्रोथत्[k]- -थन्तः ऋ ९, ९८, ११.

अप-प्रे(प्र √इ), अप···प्रेयात् ऋ १०, ११७,४.

¶अप √प्लु >प्लावि, अपप्लावयति तै ६,४,३,४; मै ४, ५, २^{२}; अप (प्लावयति) तै १,३,१३,२¶[l].

¶अप-बर्हिस्[l'm]- -र्हिषः तै ६,६,३, २; मै १, १०, १८; ४, ८, ५; काठ २९,३; ३६,१२; -र्हिषम् काठ २५.१०; २६, ५; क ४०, ३; ४१, ३; -र्हिषौ तै ६, ६, ३, ३.

अप √बाध्, >बाधि, अपबाधत[n] पै २,११, ३; †अप···बाधते ऋ १,३५,९; मा ३४,२५; का ३३, १, १९; अप···बाधन्ते ऋ १, ८५,३; अपबाधे पै ५, २०,१; अपबाधताम् ऋ ७, ५०, २; १०, ३५, ३; मै १, २, ३; शौ ५, २२, १; पै १, ४६, ५; ७, ५,१२; १३,१,१; २०, ४२,१; †अपबाधस्व ऋ १०, ४२, ७; मै ४,१४,५; शौ २०, ८९, ७; अप···बाधस्व ऋ ६, ६, ६; पै ७, १९, २; अपबाधध्वम् ऋ ७,५६,२०; ?अपबाधत[o] पै ७, १९, ७; अपबाधाम पै ५, ४,

---

[a]) स्त्रियां ङीपः (पा ४, १, ६) पित्त्वान्निघातं स्वरेऽभेदः ।

[b]) मूको. '(अ)पपापाथ<(अ)प-पपाथ' (?<त) इति पाठः प्रतीयते । तथात्वे √पत् इत्यस्य छान्दसीम् अनिट्ताम् आश्रित्य तल्लिटि मपु१ स्यात् । संदिग्धस्थलीयत्वाद् भूयसी विमर्शापेक्षापीह द्र. ।

[c]) पूर्वमन्त्रत आख्यातपूर्त्तिः द्र. ।

[d]) आ इत्यस्य पुरा इत्यस्य च गत्यर्थेन धा. प्रातियोगिकोऽभिसंबन्धः श्रुतिप्रसिद्धः (तु. ऋ १, १२३,१२; १६४,३१;१९१,२) । इह अप इति पुरा इत्यस्याऽर्थस्य भूयोऽप्य् उपबृंहणं करोतीति विशेषः (तु. PW. GW; वैतु. वें. यः स्मत् ⌊यद्.⌋=अस्मत्तः इतीव कृत्वा आ इति पञ्चम्यर्थानुवादी कप्र. इतीवाभिप्रयात्, सा च आ-अप-परे[-रा √इ] इति त्र्युपसृष्टः धा. इति ⌊कथं तस्य आ इति पुरा इति चाऽव्यवहितावपि गती युगपत् स्वरभाजौ स्यातामिति कृत्वा त्वसावनुयोक्तव्यः स्यात् ⌋) ।

[e]) सपा. काठ ३६,१० अपश्यन् इति पाभे. ।

[f]) पाठः? अप ⌊क्रिउ.⌋, पापम् इति द्विपदः शोधः (तु. सा. RW. कतिपये मूको. च) । अथवा अप इति वर्जने कप्र. तस्य च च्छान्दसः पापम् इत्यनेन द्वि. योगः इति च ।

[g]) =अपगमन- । व्यु. कृते तु. टि. १आपित्व- ।

[h]) तस. नञ्-स्वरः । उप. <√पा (पाने) द्र. ।

[i]) बस. (पावा २,२,२४) पूप. प्रकृतिस्वरम् ।

[j]) सपा. शौ ६, १२६, २ पै १५, २०, ३ अपसेध इति पाभे. ।

[k]) गस. शत्रन्ते कृत्-स्वरः प्रकृत्या ।

[l]) तु. तै ६,४,३.४ ।

[m]) विप. (प्रयाज-, अनुयाज-, एतद्- ⌊=औदुम्बरी-⌋) ।

[n]) सपा. शौ २,४,३ बाधते इति पाभे. ।

[o]) अपबाधथाः पश्यमानः इत्यस्य मूलतः सतः पाठस्य स्थाने अपबाधता पश्यमानः इति प्रामादिको विभ्रंशः संभाव्यते ।

१४‡[a].

अपबाधय शौ १२, १, ४९; पै १७, ५, ७; अपबाधयः पै २०, १८,१.

अप-बाधमान,ना- -†नः ऋ १, ३५, ३ϕ; ९, ९७, ४३ϕ; १०, १०३,४; मा १७,३६; का १८, ४,४; तै ४, ६,४,२; मै २,१०, ४; काठ १८,५; क २८, ५; कौ २, १२०२; शौ १२, ३, १५$; १९, १३, ८; पै ७, ४,८; १२, ६, ८$; १५, ११, ४‡[b]; १७, ३७, ५; -ना ऋ ५, ८०, ५ϕ; ७,७८, २ϕ; तै ४, ३, ४, २ϕ; मै ४,१४,६; -ϕनाः ऋ १,९०, ३; मा १७, ५४; १९, ८४; का १८,५,५; २१, ६,५; तै ४, ६, १,२; ५,४,६,२; मै २,१०,५; ३,११,९; काठ १८, ३; ३८,३; क २८,३.

अप √ब्रू, अपब्रवत्[c] शौ ६, ५७, १; अपब्रुवत् पै १९, १०, ३; अपब्रूत पै १९,२३,८.

अपाब्रुवन् मै १,५,१२.

अप √भज्, अपभजन् पै ५, २१, २; अप··भजाम ऋ १०, १०८,९.

अप-भरणी-, अप-भर्तवै, अप-भर्तृ- अप √भृ द्र.

†अप √भिद्, अप··भिन्धि[d] ऋ ८, ४५, ४०; कौ १, १३४; २, ४२०; जै १,१४,१०; ३, २३, १०; शौ २०,४३,१.

अप √भू, †अप··भवतु ऋ ९, ८५, १; कौ १, ५६१; जै १, ५७, १०; †अपभवन्तु ऋ १०, ६७ ११; शौ २०, ९१, ११; †अप···भवन्तु ऋ १०, १२८, ९; मा ३४, ४६; का ३३, २, ९; तै ४,७,१४,४; काठ ४०, १०; शौ ४, ३५, ७; ५, ३, १०; २२, १$[e]; पै २, ३८, १; ५. ४,१४.

अपभूतु ऋ १, १३१,७^{२}; अपभूत ऋ ४, ३५,१; †अपभूतन ऋ ७,५९, १०; तै ४, ३, १३, ५; मै ४, १०, ५; काठ २१, १३; अपाभूत ऋ ४, ३४, ११; †अपभूः ऋ ⌊१०, ११,९[f];१२, ९⌋; शौ १८,१,२५.

¶अप-भूत[g]- -तः तै ३, ४, ८, २;७.

अप-भूति[h]- -तये शौ ५,८,५[i].

अप √(हृ>)भृ, अप···भरताम् ऋ १०,५९, ८-१०; अपाभरत् ऋ १,१६१,१०.

अप-भर(ण>)णी[j]- -णीः[k] तै ४,४,१०,३; काठ ३९, १३.

†अप-भर्तवै[l] ऋ १०,१४, २; मै ४,१४,१६; शौ १८,१,५०.

†अप-भर्तृ[m]- -र्ता ऋ २, ३३,७; पै १५,२०,५.

¶अप √भ्रंश्, अपभ्रंशते, अपाभ्रंशन्त, अपाभ्रंशन्त मै १, ६,९; अप···अभ्रंशन्त मै ४, ६, ४; काठ ९,१६.

१अपम[n]- -मस्य ऋ १०,३९,३.

२अप-म[n]- -मा?[o] शौ १०,४, १; पै १६,१५,१.

---

[a] सपा. ऋ १०, १२८, ९ अवबाधामहे इति पाभे.।

[b] सपा. ऋ ६,७५,१४ परिबाधमानः इति पाभे.।

[c] लेटि अड्-आगमे (पा ३, ४, ९४) आगमानुदात्तत्वसामान्ये धास्व.। यत्तु सा. उपब्रुवत् इत्येवं पपाठ तच् चिन्त्यम्।

[d] ϕअप-साह्वान् टि. द्र.।

[e] पाभे. अप···धमन्तु पै १३,१,१ द्र.।

[f] तु. उद्गी. वें. प्रभृ.; वैतु. सा. कृद्-वृत्तमेतदिति भाषमाणः स्वरशास्त्रं चोपेक्षमाणोऽश्रद्धेयः स्यात्।

[g] अन्तर्भावितण्यर्थतया सकर्मत्वोपाचारादिव कर्मणि निष्ठायामनन्तरगतिस्वरः (पा ६,२,४९)।

[h] क्तिनि तादौ (पा ६,२,५०) इत्युक्तः स्वरः।

[i] सपा. पै ७,१८,६ अभिभूतये इति पाभे.।

[j] = नक्षत्र-विशेष-। गस. ल्युडन्ते कृत्-स्वरः प्रकृत्या। यत्तु कर्तरि ल्युः प्र. ततश्च गौरादित्वाद् ङीष् (पा ४, १, ४१) इति शक. मन्येत, तन्न। अन्तोदात्तत्वप्रसङ्गात्।

[k] सपा. मै २,१३,२० भरणीः इति पाभे.।

[l] तवै-प्रत्ययान्तस्य द्वैस्वर्यं भवति (पा ६,२,५१)।)

[m] गस. तृजन्ते कृत्-स्वरः प्रकृत्या।

[n] वैयुत्पत्तिको विमर्शः पाठशोधश्च नाउ. टि. द्र.।

[o] शौ. मूको. तदीये च पपा. अप-मा इत्याकारकः सावग्रहो विभागश्च प्रदर्श्यते। पै.(मूको.) उपमा? इत्याकारकं च शब्दरूपमुपलभ्यते। तत्रैवं कियानपि विमर्शः सावसरः स्यात्। प्रथमं तावद् यनि. भिन्न-संख्ययोर् अवगृहीताऽनवगृहीतयोः प्राति. मध्ये सूक्ष्मेक्षिकया विवेकः द्र.। प्रथमेऽनवगृहीते प्राति. अप इति निपातोऽनुपसर्गोऽगतिसंज्ञो निकर्षसामान्यवाचकः। तस्मात् तात्रभाविकस्य तद्धितस्य सामान्येन शैषिकस्य वा म-प्रत्ययस्योत्पत्तिः।

अप√स्मा(बधा.), अप···मिमीमहे शौ १८,२,४०.

अप-माय[a] पै ३,३०,६.

अप√*मि, ?अपमयाः[b] शौ १९, ५७,५.

अप-मित्य, अप-मित्य- अप√मे द्र.

इत्थं निकर्षे भवो निकृष्ट इत्याद्यर्थोऽस्य प्राति. संजायते (तु. उद्गी. वें. सा.)। ननु नाम्नस्तद्धितोत्पत्तिः प्रसिद्धा न निपातमात्रादिति चेद् न । नायं नियमो यत् तद्धितो नाम्न एवाऽऽगच्छति न निपातादिति । तद् यथेहैव समानमनवगृहीता बहवः शब्दा म-प्रत्ययान्ताः भवन्ति । तेषु **प्रथम-, मध्यम-, परम-, आदिम-** प्रभृतयो नामभ्यः प्रत्ययोत्पत्त्या संभूताः । अथान्ये **अवम-, अपम-, उपम-** प्रभृतयो नामेतरेभ्यो निपातेभ्यः प्रत्ययोत्पत्त्या संभूताः । अथापि **अधम-** इति शब्दो नामनिपातोभयेतरभूतादव्ययात् अधस् इत्यस्मात् प्रत्ययोत्पत्त्या संभूतः । अत आख्यातविलक्षणत्वे सत्य् आख्यातार्थनिर्भरः सत्त्वभूतो मूर्तिमानिव भावः संख्याकालाद्यविविक्तः । तस्मात् सामान्येन नामीभूतेभ्यः शब्दरूपेभ्यः क्वचित् क्वचिद् अव्ययात्मकेभ्यः स्वरादिभ्योऽतिविरलतयोपसर्गप्रतिरूपकेभ्यो निपातेभ्योऽभिव्यक्तिं लभमानात् तद्धितोत्पत्तिर् भवतीत्येवं सुवचम् । तादृशश्चार्थो निकर्षप्रकारक इह **अप** इति निपातगम्य इति कृत्वा तस्मात् तद्धितोत्पत्तिर् निर्बाधा भवेत् । ननु कैश्चिन्नवीनैरभियुक्तैः (तु. PW. GW. MW. प्रभृ.) एवंविधेषु संकेतितचरेषु स्थलेषु निपातेभ्य एभ्य आतिशायनिकम् **तमप्** प्र. उच्यते स एव स्वीक्रियताम् इति चेत् । सत्यं, शक्नुयाम चेदवश्यं तद् अङ्ग स्वीकुर्याम । का बाधेति चेद्, उच्यते । नेह कोऽपि नवीनानामेव प्रतिभाया अयं प्रकाशो यन्निपातेभ्यः आतिशायनिकः प्र. उच्यते । प्राक्तनैरपि स्वीयया प्रक्रियया सोऽनुमतः । तथाह्य् अर्थतो निपातविशेषस्य गतित्वेऽध्यवसिते तादृक्तत्प्रयोगबलेनाऽध्याहृतयोग्यक्रियाया निष्ठान्ताया घ-संज्ञकस्य प्रत्ययस्योत्पत्तेः सुवचत्वसंभवात् । तेन यथा ऋ (१०, ९७, १८) इत्यत्रौषध्यन्तरापेक्षयौषधिविशेषस्य श्रेष्ठत्वापादनार्थम् **उत्तमा-** इति शब्दः श्रूयते । तत्र 'उद्गततमा उत्तमा' इति मध्यमपदलोपविशिष्टः प्रयोगः द्र.। अनयैव दिशाऽत्र (शौ.) इन्द्रादीनां प्रथमत्वादिविशिष्टेषु त्रिषु रथेषु श्रावितेष्व् अहीनां चतुर्थस्य रथस्य रथान्तरापेक्षया **अपगततमस्य** भूयस्तमां निकृष्टस्य श्रुतिर्भवति । तत्र प्रकरणतोऽर्थतो हीनताविशेषप्रद्योतनार्थं **तमपः** सावकाशता भवति । तथा च **उत्तम-**शब्दे मध्यमपदस्य **गतेत्यस्य** लोप उक्त एवमिह तस्य प्रत्ययाद्यक्षरसहितस्य लोपः द्र. । एवम् **उपम-** शब्देऽपि समानो न्यायः । नन्वेवं निपातेभ्यः स्वीकृत एवाऽऽतिशायनिकः प्र., किमित्यवोचः स्वीकर्तुं न शक्यत इति चेत् । नैतदुक्तं निपातेभ्य आतिशायनिको न भवतीति । एतदेवोक्तं यत् पूर्वोक्तेषूदाहरणेषु सर्वत्राऽऽतिशायनिक एव प्र. इति या केषांचिदभिरुचिः सा न प्रशस्येति । यत्र यत्राऽऽतिशायनिकः प्र. संगतः स्यात् तत्र तत्रैव स सुवचः । अन्यत्र पूर्वोक्तस् तात्रभविकम् तद्धितो मः प्र. इति । प्राक्तनानां पदकाराणां यशोवर्धिन्येषा विवेकदृष्टिर् भवति यत् ते **तमबन्तेषु** प्रयोगेष्व् अवगृह्णन्ति नाऽवगृह्णन्ति च तदितरया प्रक्रिययाऽवगतेषु प्रयोगेषु । तदवग्रहभावाऽभावाभ्यां शब्दराशिद्वयपार्थक्यं संजायते । तेन ऋ (१०, ३९, ३) इत्यत्राऽऽतिशायनिकार्थस्याऽभावे **म-प्रत्ययान्तम्** अवग्रहनिरपेक्षम् **१अपम-** इति प्राति., **शौ.** चाऽऽतिशायनिकार्थस्य सद्भावे **तमप्-** प्रत्ययान्तं सावग्रहं **२अप-म-** इति प्राति. द्र. । एवम् **१उपम-** इत्यस्य **२उप-म-** इत्यतो विवेकः द्र. । अतः शौ. पै. च यमु. W. BW. MW. प्रभृ. च प्रस्तावितः **अपमः** इत्याकारकः **शोध** एव सुवचः स्यात् (वैतु. पक्षान्तरे W. **अपमा-** इति दीर्घान्तस्य रूपस्य क्रियाविशेषणतया निर्वाहं यत् प्रास्तौत् तन् निर्मूलमिव भवति । साक्षाद् रथविशेषणस्यापेक्षितत्वात् मन्त्रपूर्वार्धपठितरथान्तरविशेषणीभूतप्रथमादिशब्दान्तरसकक्षत्वापादनस्वस्य युक्ततरत्वादित्यर्थः) ।

a) **ल्यपि** रूपम् (तु. नाउ. टि.) ।

b) रूपे च धा. च? । रूपम् तावत् । यनि. उत **अप-माय** इति । कथमिति । मूको. पञा. सा. च यनि. आहुस्तेन पूर्वः कल्पः । यनि. नापू. मन्त्रे श्रूयमाणस्य **स्वप्न** इत्यामन्त्रितस्याऽऽक्षेपपुरःसरं पूर्वार्धेनैव परिसमाप्यमानस्य वाक्यस्य नापू. मन्त्रेण संनिहिततराभिसंबन्धस्य प्रतीतेश्चोत्तरार्धीयवाक्य-

अप √ मृ > *अप-मार्- > ¶अपमारिन्[a]- -री तै २,५,१,७.

अप √ मृज्, अपमृज्महे[b] शौ ४, १७, ६; ७; १८, ८; ७, ६७, २; ३; पै ५, २३, ८; अपमाष्टुं, अप (माष्टुं) शौ ४, १८, ७; पै ५, २४,७; अपमृड्ढि शौ ११, १, २९; पै १६,९१,९; अप…मृजेथाम् शौ १८, ४, ४९; ¶अपामृष्ट काठ ६,१; क ३,१२.

अप-मृज्य[c], अप (मृज्य) शौ ४, १८,८.

अप-मृष्ट- -ष्टः मा ७, १२; १७[d]; का ७,६,२;७,३[d]; -ष्टम् शौ ६, ११३,३.

अ(प>)पा-मार्ग[e]- -र्ग मा ३५,११; का ३५,४,१०; शौ ४, १७, ६; ७; १८, ८; ७, ६७, १; २;३; पै २, २६,४; ५,२३, ८;२४,८; १९,१५, १०; -र्गः शौ ४,१७, ८; १८, ७; १९,४; पै २,२६,५; ५,२३,४; २४,७; २५,४; १६,१४७, १-८;१४८, १-१०; १४९, १-८; -र्गान् मै २, ६, ३; ४, ३, ४; काठ १५,२.

अप-मृत्यु[f]- -त्युः खि ७, ७, १०; -त्युम् पै १७, १४,९. [°त्यु-पाप°°].

अप √ *मृप्[g], अपमृपः[h] पै १,६४,३.

अप √ मे(प्रणिदाने) > मि[i], अपमयेत मै ४, २,७.

अप-मित्य[j] शौ ६, ११७,१; पै १६, ५०,१.

अप-मित्य[k]- -त्यम्[l] शौ ६,११७, १; पै १६,४९,१०.

†**अप √ म्यक्ष्**, अपो(प-उ)म्यक्ष ऋ २,२८,६; मै ४,१४,९.

अप √ म्लुच् > अप-म्लुक्त- -क्तम् ऋ १०,५२,४.

अप √ यज्, अपयजामसि पै १९, २३, ५; ?अपयजामहि[m] पै ४, १८,२.

अप √ या, ?अपा…यान्ति पै १७, १३,८; अपयाहि शौ १९, ५६, ६; पै ३,८, ६; अपयात शौ ६, ७३,३; पै १९,१०,१०.

अपययौ पै १७.२९,२

मात्रत्वेन पृथङ् मन्त्रतयाऽवस्थितेरुचिरत्वेन प्रतीतेश्च पूर्वार्धोत्तरार्धयोः समानमन्त्रान्वयवत्वे मपु. प्रारभ्य उपु. पर्यवसितेरनुपपत्तेश्च पै. अन्यथाश्रुतेश्चोत्तरः कल्पः (तु. पै ३,३०,६ W. च)। अथ पूर्वे कल्पे धा. संदेहः। कथमिति। अप √ मय् (तु. पाधा.) इत्यु उत तन्मूलतया सुकल्पः अप √ *मि(गतौ) इतीति। उभयथाऽपि लेटि मपु१ रूपं द्र.। यत्तु सा. अपसारय इति लोटा व्याचष्टे, तल् लेटश्च लोटश्चार्थसंनिकर्षनिबन्धनं द्र.।

a) विप. (⌊अपमृत्युमत्-⌋ व्रतरहित- रजस्वलाप्रसव-)। घञन्तात् इनिः प्र. मत्वर्थीयः (पा ५,२,११५)। तत्-स्वरः।

b) =सपा. द्राश्रौ ६, ४, ११ लाश्रौ २, १२, १२। काठ ३८,१३ आपश्रौ १६,१६,१ अपहन्महे इति पाभे.।

c) गस. ल्यबन्ते कृत्-स्वरः प्रकृत्या (वैतु. सा. लोटि मपु१ इति मन्वानश्चिन्त्यः)।

d) =सपा. माश ४,२,१,१४ काश्रौ ९, १०, ४^{२} शुअ १, ४५५^{२}। आपश्रौ १२, २२, २ अपनुत्तः इति पाभे. (वैप४ ⌊आपश्रौ. टि.⌋ मा ७, १७ इति शोधः)।

e) =ओषधि-विशेष-। मा. शौ. पपा. नावग्रहः; वैतु. PW. < अपा (प-आ)° इति ? गस. करणे घञन्ते पूप. दीर्घत्वं थाथादि-स्वरश्च (पा ३,३,१२१; ६,२,१२२;२,१४४)।

f) =अकाल-मृत्यु-। प्रास.।

g) उपसृष्टस्य धा. विस्मरणे वृत्तिः। √ कृप्, √ तृप्, √ दृप्, √ सृप् इत्येतेषु ऋदन्तेषु धा. मूले सति √ पा(रक्षणे) इत्येन्मूलः पकारोजन इति द्र. (तु. टि परा √ सृप्)।

h) लुङि मपु१ द्र.। पाप्र. लृदित्कारतः अङ् उसं. (पा ३,१,५५)।

i) यनि. आत्वं च तत इत्वं च (पा ६, १, ४५; ४, ७०) न प्रादर्शिषाताम्। तद्वच्छ्रुत्यनुपलम्भात्। इत्वमपि यत् प्रदर्शितं भवति, तदपीत्वविषयभूते हलादौ किति ङिति ल्यब्-मात्रे विकल्पितमेव (पा६,४,७०) भवति। ततः किमिति। कथमपि न्याय्यत्वे संभवति व्यत्ययसाध्यत्वम् इत्वस्य मा भूदिति (वैतु. सा.)।

j) गस.। अत्र यत् सा. उदीचाम् (पा३,४,१९) इति क्त्वाम् आह तत्र चोद्यं भवति। समानकर्तृकयोः (पा ३, ४, २१)। इत्युक्तदिशा पूर्वकाले यथान्यायं प्र. सुसंगतत्वाच्च न्याय्यपौर्वापर्यविपर्ययाऽस्याविषयत्वे सत्यु औदीच्यविकल्पस्याऽवसराभावाच्चेति दिक्।

k) विप. (ऋण-)। गस. क्यबन्ते कृत्-स्वरः प्रकृत्या। एपू. टि. द्र.।

l) तु. टि. ?२अरत्नि-। पाभे. कुसीदम् तै ३,३, ८,१ प्रभृ. द्र.।

m) °मसि इति शोधः (तु. मूको. सपा. पूर्वं स्थलं च)।

अप √यु. अपायुवन् पै १८,२१,३[a]. अप····युयोति ऋ १, ९२, ११; अप····युयोधि ऋ ९, १०४, ६; अप···युयोधि ऋ ८, ११, ३; अप···युयोतन ऋ ५, ८७, ८; १०,६३,१२; अप (युयोतन)^{२} ऋ १०, ६३, १२; अप(युयुयाताम्) ऋ ८, १८, ८[b].

१अ-पर,रा[c]– -रः ऋ १, ७४, ८; १२०,२; ६,२७,५; १०,१८,४; ५; २७, ७; १३६, ५; मा ३५, १५†; का ३५, ४, १६†; ¶तै १,६,७, २; २,२,२,५; ४,७^{२}; ६, १, ३,६[d]; मै १, ८,४;८;९, ६; ३,७,४^{२}; ९,१; काठ ६, ६; ८,३;४^{४}; ९, १४; १३,४; २३, ४[d]; २५, २^{२}[d]; ३^{२}; ¶क ४, ५; ६,८;९^{४}; ३६, १; ३८, ५^{२}; ६^{२}; शौ ९,५,२८; १०,१,२७^{२}; ४,१; †१२,२, २३; २५; १३,

---

a) सपा. शौ १३,२,९ अपावृक् इति पाभे.। अपायवन् इति मूको. ।

b) सपा. तैब्रा ३,७,१०,५ आपश्रौ १४, २९, १ अप (यूयाताम्) इति पाभे. ।

c) प्रथमं प्राति. आद्युदात्तं विप. द्वितीयं च प्राति. अन्तोदात्तं वा. क्रिवि. भवतः । तदिह किमेकमेव शब्दरूपं विशेषणतया क्रियाविशेषणतया वा प्रयोग-भेदाद् भिन्नस्वरमुताहो भिन्नव्युत्पत्तिकं सरूपं शब्दद्वयमित्यादिर् विमर्शविशेषापेक्षोऽन्यत्रविस्तरो विषयः द्र. । संक्षेपस्त्वेवमवधेयः । आद्युदात्तं प्रथमं प्राति. पक्षद्वयान्यतरसुसाधं भवति । अ + पर- इत्येवं तस. नञ्-स्वरः (पा ६, २, २) इत्येकः पक्षः । इह पर-शब्दस्य मुख्यतया वर-पर्यायतायां सत्यामवराणां स्वाभाविकीमनुयायिनीं वृत्तिमुपादायाऽवरपर्यायभूतयाऽपरशब्दस्यापि तथाविधां वृत्तिं कल्पयित्वाऽनुयानं कालिकतया परिणमय्य भाक्त उत्तरभावेऽपि पाक्षिकमर्थपर्यवसानं द्र. । एवं तावन्मुख्यामुख्यार्थद्वयसुनिदर्शनः प्रथमः पक्षः । अथ द्वितीयः । यथा अपम–, अवम–, उपम– प्रभृ. अपाऽऽदिभ्योऽव्ययेभ्यो म-प्रत्ययेन तद्धितेन निष्पन्ना उक्तपूर्वाः (तु. टि. २अपम-) तथैवेह निकर्षसामान्यवाचिनः अप इत्यव्ययात् तद्धितो मत्वर्थीयो रन् प्र. नित्-स्वरेणाद्युदात्तश्च द्र. । कालिकोत्तरभावपरिणामप्रक्रिया चापि प्रथमपक्षवदिहापि प्रवर्त्तनीया भवति । एतयोर् द्वयोः पक्षयोर् मध्येऽपि किञ्चित् तारतम्यमिव भवति । तथाहि वैयाकरण-कुलाचार्यप्रवृत्तिर् ज्ञापयति यथा द्वितीय एव पक्षः साधीयान् स्यादिति । कथमिति चेद् उच्यते । सर्वादिषु (पा १, १, २७) हि पर-शब्दे पठ्यमाने ततो नञि तस. सर्वनामकार्यकलापस्य पूर्ववद् अबाधितत्वात् पुनर् यद् अपर-शब्दः पठितस्तेन ज्ञायते यथाऽयं शब्दो नञ्-पूर्वात् पर-शब्दाद् भिन्न एव स्याद् अत्रोक्तद्वितीयपक्षगतप्रक्रियया निष्पन्न इति । न च बहुव्रीहौ सर्वनामताया बाधितत्वात् (पा १, १, २९) तस्याः पुनः प्रसवार्थम् अपर-शब्दः पठ्यमानोऽत्र २अपर- इत्यस्य ग्राहक इति सुवचम् । तस्य क्रियाविशेषणतया प्रयोगभूयस्त्वाद् विशेष्यगर्भतया भविष्यत्सामान्यवाचकत्वात् सर्वनामतयोदाहार्यत्वासंभवात् । अथ तृतीयः पक्षः । अपरः '=अपगततरः' इति कृत्वा अप इत्यव्ययाद् घः प्र. स्यादातिशायनिक इत्येवमभिप्रयन्तः PW. प्रभृ. अवग्रहाभावविषये चोद्या भवेयुः । कामं सावग्रहनिदर्शभावाच् चोद्यपरिहारे प्रयत्नः क्रियेत न त्वसौ चरितार्थः स्यात् । समानप्रक्रियया घान्ततया व्याख्यातेषु १अपम– प्रभृ. शब्देषु सावग्रहत्वस्य विद्यमानत्वादिति दिक् । अथ द्वितीयं प्राति. अन्तोदात्तम् । तत्र विमर्शसंक्षेपः । इह पर-शब्दस्य वर-पर्यायताऽनवकाशा भविष्यदर्थपर्यवसानकालिक-विप्रकर्षार्थवाचकता च सावकाशा भवति । किमिति भेदोऽयं विधीयत इति चेत् । नायं विधिरपि तु यथाश्रुत्यन्वाख्यानमात्रमिदं भवतीति । एवं च सति पूर्ववदत्रापि पक्षत्रयमुपस्थाप्य 'न परमुत्तरभवं यतस्तद् यथा स्यात् तथा' इति कृत्वा भविष्यत्-सामान्ये क्रियाविशेषण-तया बस. सत्यन्तोदात्ततया च (पा ६, २, १७२) निगमा यथायथं व्याख्येयाः । निकर्षार्थस्य च श्रुतिषु निदर्शनाऽभावाद् द्वितीयस्य तद्धित-र-प्रत्ययान्ततया व्याख्यानवतः पक्षस्य, घान्ताच् छान्दसे अमु-प्रत्ययेऽन्तोदात्ततायां सूपपदायामपि पूर्वोक्तदिशाऽवग्रहाभावाच्च अपराय, अपरीभ्यः, अपरीषु इति निगमानाम् अमन्त-घान्ततया व्याख्यातुमलभ्यमानत्वदर्शनात् तत्-प्रधानस्य तृतीयस्य चापि पक्षस्य PW. प्रभृ. सूद्घोषितस्य सतः सुत्यजता निर्बाधा द्र. ।

d) पाभे. अभ्युः मै ३,६,८ द्र. ।

२,१४; १४,२,३‡[a]; पै ५,२०, १; ८, १९, ११; १६, १५, १; ३७, ८^{२}; १७, ३२, ३†; ४†; १८, ७,३‡[a]; २१, ८; १९, ५१, ११; २०, २४,४; -रम् ऋ १, ३१, ४; १४५, २; ६, ४७, १५; १०, १३९, २; मा १७, ५९†; का १८, ५, १०†; ¶तै २, २,२,५; ३,१२, २; ४,६, ३, ४†; ६, २,४, १; ¶मै १,४, १०; ६, १२^{१}; ८,४; ९^{२}; २, १,११[b]; ५,४;१०,५†; ३,१, ३^{२}; १०, ४; ४, ५, ६?[c]; ¶काठ ६,६^{२}[d]; ११,६; १२,६^{२}; १३,४; १८,३†; १९,२;३२,७; ¶क ४,५; २८,३†; २९,८; शौ ९, ५, २७; १३, १,५६[e];५७[e]; १४,१, ६४; १८, २, ३८-४५; ५०; ५१^{२}; ४, ४४; पै ५,३८, ५‡[f]; ८,१९,१०; ९,७,४;१६, १०३, ७†; १५३, ६[g]; १८, ६, १२; १९,२६,१०; २०,२७,५[e]; -¶रया काठ ११,६; -रस्मात् मै १,८,४¶; -¶रस्मिन् मै १, ८, ४; काठ २३,६; -¶रस्य मै ४,२,८; -रस्याः ऋ १०, २९, २; शौ २०, ७६, २†; पै १९, ३९, ६;८; -¶रस्याम् मै २,५, ९; -रा ऋ १, १२४,९;१८५, १; मै ३,८, ७¶; -राः ऋ ३, ५५,५; ५,४८,२; शौ १०,१०, ८; पै १६ १०७, ८; -रान् ऋ ७,६,३; शौ १०, ३, १३-१५; पै ३, ३, ३; १६, ६४, ३-५; -¶राभ्याम् तै ७,५,३,१; काठ ३३,५; -राम् ¶काठ २०,१०; २८,४^{१}; ¶क ३१, १२;४४,४^{२}; शौ ६.१८,१; -राय ऋ ७,२०, ७; पै १, १७, ४[h]; -रासः ऋ ५,४२,६; शौ १८ १,४६‡[i]; पै २, ३०, ३‡[i]; -रे ऋ १०, ४४,७; शौ ९, ११, ३; १८,३, ७२; २०, ९४,७†; पै ८, १९, ५; १६, ५२, २[j]; -रेण ऋ २, २९, ३; मै १, ८, ६¶; क २, १०?[k]; ४१,३?[k]; शौ १०, ४, ३; पै १६. १५, ४; -रेभिः ऋ ६,४७,१७; -¶रौ मै २, ५,१; ३.९, १; काठ १३, १; -रौ पै २०, २८, ७. [°र- १पूर्व°, शिव°].

अपर-ज[l]- -जः काठ ३६, ७; -जान् तै ३, ५, ३,२; पै १६, १३१, ३-१०; -जाय मा १६, ३^{२}; का १७, ५, १; तै ४, ५, ६,१; मै २.९,६; काठ १७,१४; क २७,४.

¶अपर-पक्ष[m]- -क्षः तै ३,४,९,६; मै १, ५, ७^{२}; ९, ३; काठ ९, ११; -क्षाः तै ५, ७, ६, ६; -क्षान् काठ ३४, १३; -क्षाय मै १, ५, ७; काठ ७, ५; क ५, ४; -क्षे काठ ७, ५; क ५, ४; -क्षौ पै १७,२९,९.

अपर-पाद- -दौ पै १७,२९,९.

अपरा(र-अ)ह्ण[n]- -ह्णः शौ ९,१०, ५; पै १६,११५,२; ३[o]; -ह्णम् मै ४,२,११; -¶ह्णे तै २,१,२, ५^{१}; ४,२^{१}; मै २, १, ७[p]; काठ १०, १[p]; ३३, ७^{२}[q]; ३४, ३[r]; पै १०, ६, ७$; -ह्णेषु पै ९, १२,१२.

---

[a] सपा ऋ १०,८५,४० विभे. ।

[b] सपा. काठ १०,५ द्वितीयम् इति पाभे. ।

[c] शोधार्थं तु. सस्थ. टि. आहरिष्यति ।

[d] सकृत् सपा. क ४,५ पश्चा इति पाभे. ।

[e] वैतु. पाम ६,१,७६ प्रभृ. अपराम् इति पाभे. ?

[f] सपा. ऋ १०,११६,५ अपरः इति पाभे. ।

[g] सपा. शौ ११,७,६ उत्तरम् इति पाभे. ।

[h] सपा. शौ १,१२,४ अवराय इति, मा २३, ४४ का २५,८,६ तै ५,२,१२,२ काठ ५०,६ अवरेभ्यः इति पाभे. ।

[i] सपा. ऋ १०,१५,२ प्रभृ. उपरासः इति पाभे. ।

[j] अपरे इति प्र२ इति एतः इत्याख्यातेन कर्तृतयाऽन्वितमुताहो अपरा । इह इत्येवं पदविभागः साधीयानिति विमृशन्तु भूयस्तरां विमृशः ।

[k] पाठः ? उपरेण इति शोधः (तु. सपा. खि ५,७, ३,९ मा ६,२ प्रभृ.) ।

[l] विप. (भ्रातृव्य-, रुद्र- प्रभृ.) । उस. उप. √जन् + डः प्र. । कृत्-स्वरः प्रकृत्या (पा ६,२,१३९) ।

[m] =कृष्ण-पक्ष- । कस. सास्व. (पा ६,१,२२३) ।

[n] = मध्याह्नोत्तर-भाग- । कस. उप. अहन्- + समासान्तः टच् प्र. अह्नादेशश्च (पा ५, ४, ८८; ९१) । चित्-स्वरः ।

[o] सपा. शौ ९,१०,७ विद्योतमानः इति पाभे. ।

[p] सपा. तै २,२,९,६ तृतीयसवनस्याऽऽकाले इति पाभे. ।

[q] यक्र. सपा. तै ७,५,६,४; ७,३ तृतीयसवने इति, तृतीयसवनम् इति च पाभे. ।

[r] सपा. तैब्रा १,४,७,६ तृतीयसवने इति पाभे. ।

¶अपरे-द्यु॒स् (:)[a] मै ३, ७, ८; काठ १९,१२[b]; क ३१,२[b].

२†अ-प॒र्[c]- -रम् ऋ १, ३६,६; १८४, १; १८९,४; २,२८,८; २९,२; ८,२७,१४; १०, ८६,११; मा ३३,९४; तै १,७,१३,१; काठ ८, १७; जै ४,१९,४; शौ २०, १२६,११; -राय ऋ ६,३३,५

†अप॒री[d]- -रीभ्यः ऋ १, ३२, १३; पै १३, ६,१३; -रीषु ऋ १, ११३, ११; १०, ११७, ३; १८३,३[e]; तै १, ४, ३३,१.

¶अप-रज्जु[f]- -ज्जुः काठ ३०,९.

अपर-पक्ष॒-, अपर-पाद- १अ॒-पर- द्र.

¶अ॒-परशुवृक्ण[g,h]- -क्णम् तै ५,१, १०,१^{२}; मै ३, १,९; काठ १९, १०; क ३०,८.

?अपरस्कम् पै १९,४२,१.

अ॒-परागत[g]- -तम् तै ६,६,७,२; मै ४,७,२; काठ २९,२; क ४५,३.

¶अप √राज्, अ॒पाराड्[i] मै १, ६,३; ४ ८,३.

अ॒-पराजित,ता[g,j]- -तः खि ५, ५, १०‡[k]; मै ४, १२, ५; शौ ५, ३०,१७; ८ ५,२२; १०,४,१५; पै ९,१४,७; १६, १६,५; २८, ११; २०, २८, १०; -तम् ऋ ⌊१,११,२; ५,२५,६⌋; १०,४८, ११; खि २, १०,७; ५ ४,६;७; मा २८,२; का ३०, १,२; ¶तै ६, ३, १, १^{२}; ४ २, ६^{२}; मै ४, ११, १†; काठ २, १५†; कौ २,१७८†; ४, ६;७; जै २, ७, २; ३; ३, १६, १६†; पै १, ११२,३; १६,८८,५;६; -ता ऋ ⌊३, १२, ४; ८, ३८, २⌋; तै ४, ४, ५, २; मै २, ८,१४; काठ ४०, ५; †कौ २, ४२४; १०५२; †जै ३, ३२, १५; ४, २३,१; -ताः तै ५, ७, २,५¶; -ताम् शौ १०, २,३३; पै १६, ६२,५; २०,२०,६.

?अपराणुत्वा[l] पै ७,६,३.

अप √राध्, अ॒प···रराध तै ३,२,८, २; मै २,३, ८; पै १, ८८, २; अ॒प···ररा॒ध शौ २, ३५, २; ¶अ॒परात्स्यामि तै ६, ४, ११, ३; अ॒परात्सीः तै ७, ५,१०,१; अ॒प···अरात्सीः शौ ५, ६, ७; पै ६,११,९; ¶अ॒पाराधम् तै २, ५,३,६; ६,५,५,२.

अ॒प-राद्ध- -द्धः शौ ६, ११६, २; पै १६,४९,८.

¶अ-परानंश[m]- -शाय[n] काठ २४,३;

---

[a] सद्यस्-(पा ५, ३, २२) इत्युक्त-निपातनमात्र-परिवार्धितक्लृप्तिभिः पाणिनीयैर् यद् अहन्यभिधेये अपर-शब्दाद् एद्युसुच् प्र. उच्यते तद् वस्तुस्थितेस्तिरोभावायैवाऽलं भवेत्। उप. दिव्- इत्यस्यैवास्मिन् शब्दविशेषे रूपान्तराऽऽपत्तितया सुवचत्वात्। तथात्वाद् ऋते केवलम् अपर-शब्दस्य प्रत्ययमात्र-योगतो निर्बीजस्य दिनार्थवाचकत्वस्य निराधारत्वादनुपपन्नत्वादित्यलमभियुक्तानां क्वाचित्कच्छिद्राऽन्वेषणेन।

[b] पाभे. अन्ये-द्यु॒स्(:) मै ३,२,२^{२} द्र.।

[c] बस. अन्तोदात्तः (पा ६, २, १७२)। व्यु. कृते १अ॒-पर-, अप॒री- च टि. द्र.।

[d] केवल-(पा ४, १, ३०) इत्यत्र टापं (पा ४, १, ४) बाधित्वा छान्दसनित्यनिपातनतया यो ङीप् शिष्टस्तत्र न केवलमयमेव विवेको यल्लोके टापा निर्वाहश्छन्दसि च ङीपा इति। किमित्येवमुच्यते। अव्याप्तिपरिहारायैवमुच्यते। तद् यथा। टाबन्तस्यापि छन्दसि सुभिक्षं वर्त्तते। तद् एवं किलेह विवेको वक्तव्यो यथा बस. अन्तोदात्ताद् २अ-प॒र्- इत्यस्माद् नित्यं छन्दसि ङीप् भवति, अपरस्माद् आद्युदात्ताद् १अ॒-पर- इत्यस्मात् टाप् इति। एतच्चैवं विविच्यमानमेतद्-भिन्नस्वर-सरूपशब्दद्वयनिष्पत्तिसंकेते पूर्वोक्ते ज्ञापकान्तरतयापि सुग्रहं द्र.।

[e] सपा. कागृ ३०,३ अवरीषु इति पाभे.।

[f] विप. (⌊त्रिगत बन्धन-⌋ यजमान-)। बस. (पावा २,२,२४)।

[g] तस. नञ्-स्वरः।

[h] उप. परशु॒-वृक्ण- इति तृस.।

[i] अकर्मकस्य सतः सकर्मकतापत्तौ सत्यां लुङि लेर् लुक् उसं. (पा २,४,८०)।

[j] विप. (अग्नि-, इन्द्र- प्रभृ.), नाप. (इष्टका-विशेष- ⌊मै २,८,१४⌋)।

[k] सपा. ऋ १०,११६,५ विभे.।

[l] *अ॒-पराणुत्ति- > अ-पराणुत्त्या इति मूलतः सतो भ्रेषः सुशोधः स्यात्।

[m] तस. उप. परा √*नंश् (व्याप्तौ) + भावे घञ् प्र. [=‘मैव सोमक्रयणी पराची गात्’ इत्यर्थमेतद् यजुरिति (तु. तै ६, १, ७, ७ मै ३, ७, ६; वैतु. BW. च ?*अ॒-परातंस- इतीवाऽपशोधुकः ⌊तु. ? BW. उप.⌋; SI. अपरान्। अंशाय इति द्वे पदे इति मन्वान उपेक्ष्यः)]।

[n] सपा. तै ६,१,७,८ आ॒वृत्यै इति पाभे.।

क ३७,४.

अ-परापरण[a]- -णः शौ १२, ९, ७; पै १६,१४५,७.

¶अ-परापात[b]- -ताय मै ३,६,७.

¶अ-पराभाव[b,c]- -वाय तै १,५,२, २; ५,७,२,५; ६,६,२,३^{२}.

?अपरावता[d] पै १,९८,४.

*अ-परावप्->अपरावपिष्ठ[e]- -ष्ठम् तै ४,१,३,१.

¶अ-परावाप[b,f]- -पाय मै ४,१,२; काठ ३१,१; क ४७,१.

अ-पराहत[b]- -तः शौ १८,४,३८.

अपराह्ण- १अ-पर- द्र.

¶अ-परिगृहीत[b]- -तः काठ २६,१०; क ४१,८; -तम् काठ २०,४; क ३१,६; -ते तै ५,२,६,३.

¶अ-परि(त्त>)त्ता[g]- -त्ता मै ३, १,८.

१अ-परिपर[h]- -रेण शौ १८, २, ४६.

¶२अ-परिपर्[i]- -रः मै ३,७,७;४,८, ५; काठ २४,६[j]; क ३७, ७[j].

¶अ-परिमित,ता[b]- -तः तै १, ७, ३, २^{१}; ५, १, ८, ४; मै ४,१, १०; ७, ४; काठ ८, १३; ९, १२; २६, ४; ३४, ९; क ८ १; ४१, २; $शौ ९, ५,२१; १५, १५,९; $पै १६, ३४, ५; ९९, ८; -तम् तै २,५,१०, ४; ११, २; ३, १,७, ३; ६, १, १, ६; मै १, ६,१०; ८, ६; ७; ३, २, ५; ६, ३; ७, ४; ८, ७[k]; काठ ८,३; १३; १३, १; २४, ५^{१}; ३१,१५; क ६, ८; ८, १; ३७, ६^{१}; शौ ९, ५, २२^{२}$; -तस्य तै २, ५, १०, ४; ५, १, १,४; २,६, ३; मै ३, १, २;६,९; ७, ४; ४, ५,३; काठ ८, ३; १९, १;६; २६,६; ३४,९; क ६, ८; २९, ८; ३०, ४; ४१, ४; -ता तै ५,१,१, ४; मै ३, १,२; काठ २५,६; क ३९, ३; -ताः मै १, १०,१७; ३, २, ५; ९, ५^{२}; ४, ५, ३; काठ २०,१; ३४,९;३६, ११; क ३१,३; $शौ १५, १३, ९;१०; -तात् तै २, ६, ४, २; ३,१,७,३; मै ३,८,६; काठ २५, ४; क ३९,१; -तान् तै ६, १, ४,८; -ताभिः तै ५, २, ६,३; -ताम् काठ १९, १; ६; क २९, ८; ३०, ४; -ते मै १, ६, १०; काठ ८,३; क ६,८.

¶अपरिमित-छन्दस्[l]- -न्दसः तै ५,१,८,४.

¶अ-परिमित्य[b] तै ५, २, ६, ३; काठ २०,४; क ३१,६.

¶अ-परिमोष[b]- -षाय तै ६, १, ११,५.

¶अ-परिवर्ग[b,m]- -र्गम् तै ३,४,१०, ४; ५,३,१०,४;४,३, ४; ५,३;

---

[a] बस. अन्तोदात्तः (पा ६, २, १७२)। उप. *परा- पुरण-(<परा√पॄ ⌊तु. परा-पुर्-, परि√पॄ> परि-पर्-⌋) यद्र. (तु. ?W., MW.; वैतु. PW. अ+पर- +१अपर- + नः प्र.?, ता. अप-रै- > *अप-रा- + *अप-रण-?)।

[b] तस. नञ्-स्वरः।

[c] उप. परा√भू + भावे घञ् प्र.।

[d] पाठः? मा परावतः इति शोधः (तु. पै २०,६१, ११)।

[e] विप. (⌊विनाश-रहित-⌋ पुष्कर-)। परा√वप् इत्यस्माद् घ-प्रत्ययेन निष्पन्नस्य नञ्-पूर्वस्य बस. अन्तोदात्तस्य यनि. सत इष्ठन्नन्तत्वे (पा ५,३,५५ ⌊तु. १वसिष्ठ- प्रभृ.⌋) नित्-स्वरः। पाप्र. तु परावप्- इत्येतस्यैव प्रथमं मतुबन्तत्वे तत आतिशायनिके इष्ठनि प्र. विन्मतोः (पा ५,३,६५) इति मतुपो लुकि अ+परावपिष्ठ- इत्येवं तस. नञ्-स्वरः स्यात्।

[f] उप. परा√वप्+भावे घञ् प्र.।

[g] विप. (⌊असमर्पिता-⌋ उखा-)। उप. परि√दा (दाने) + कर्मणि क्तः प्र. तकारादेशश्च (पा ७,४,४७)। अत्र दस्ति (पा ६,३,१२४) इत्युक्तस्य गतिदीर्घत्वस्याऽभावो मौलिको वा प्रामादिको वेति निगमान्तरस्यापेक्षया विमर्शसहोऽयं विषयः द्र.।

[h] विप. (⌊परिपन्थि-रहित-⌋ पथिन्-)। तस. नञ्-स्वरः (वैतु. सा. बस. इत्याह तत्-स्वरानुपपत्तिप्रसङ्गाच्चिन्त्यम्)। उप. विप. परि-पर-(⌊<परि√पॄ 'हिंसायाम्' + कर्तरि कृत्⌋=परि-परिन्-) तद्वति वृत्तिः।

[i] =१अ-परिपर-। बस. अन्तोदात्तः। उप. भाप.। अ॰ इति पठन्तः BW. प्रभृ. चिन्त्याः।

[j] सपा. तै ६,१,७,३ अरक्षोहतः इति, मै ३, ७,७; ४,८,५ अरक्षस्तुः इति च पाभे.।

[k] सपा. काठ २५, ८ क ४०, १ असंख्यातम् इति पाभे.।

[l] बस. पूप. प्रकृतिस्वरम् (पा ६, २, १)।

[m] वा. क्रिवि. द्र.। भावे घञन्तं यद्वा णमुलन्तम् (तु. भा. ⌊तैब्रा २, १, १०, ३ प्रभृ.⌋, सा. MW. च; वैतु. भा. ⌊तै ३,४,१०,४⌋ बस. इति ?)।

५,१०,६;६,१,१,८;३,४,३.

अ-परिविष्ट[a]- -ष्टम् ऋ २,१३,८.

¶"अ-परिवीत[a]- -तम् काठ २६,६^{2}; क ४१,४^{2}.

¶अ-परिश्रित्य[a] मै ३,५,३^{1}.

अप √रिष्, अप···रिषत् पै ४,२२,५.

¶अ-परिषिश्वत्[a]- -श्वन् मै १,१०, १९^{2}; ३,२,५^{2}[b]; काठ २१, ७^{2}; ३६,१३.

‡अ-परिहृत[a]- -ताः मै ४.१२,४[c].

†अ-परिह्वृत[a][d]- -तः ऋ १०,६, २;मै४,१४,१५;-ता ऋ ८,७८, ८; -ताः ऋ १, १००, ⌊११९[c]; १०२,११[c]⌋; १०,६३,५; काठ १२,१४.

अपरी- २अ-पर- द्र.

†अ-परीत[a]- -तः ऋ ५, २९, १४; -तम् ऋ ८,२४,९; -ताः ऋ १,१००,३; -तासः ऋ १,८९, १; मा २५,१४; का २७, ११, १; काठ २६,११.

अ-प(रि>)रीवृत[a]- -तः ऋ २, १०,३.

अप √रुध्, >रुरुत्स, अप···अरोधम् ऋ १०,३४,२.

¶अपरुणद्धि काठ २७,५; २८, १; क ४२, ५; अप···रुणद्धि ऋ १०, ३४, ३; ¶अपरुन्धन्ति[e] काठ १०, ८; अपरुध्मः शौ १२, ३, ४३[f]; ¶अपरुन्ध्युः काठ २७,५; २८, १; क ४२,५.

अप·····अरुधन् शौ १८, २, २७.

¶अपरुध्यते तै ६, ६, ५, ४; ¶अपरुध्यताम् तै ६,६,५,३.

अप-रुद्ध- -¶द्धः तै २, १, ४, ७^{2}; ८; २, ८, ४; ३, १, १; ६.६, ५,३; ४; काठ १०, ८[e]; ९; ११, ६ ; २७, ५^{2} ; २८, १^{2}; क ४२,५^{2}; -द्धम् ¶काठ २७,५,२८,१^{2}; ¶क ४२, ५; शौ ३, ३, ४; पै २, ७४, ४. [°द्ध- ज्योक्°]

¶अप-रुध्य काठ ३५, १८; क ४८, १६.

अप-रुध्य- अन्°.

¶अप-रुध्यमान- -नः तै २, २, ८,५;३,१,१;२.

अप-रुरुत्स्यमान- -नः काठ १०, ९;११,६;३७,११.

¶अप-रोद्धृ[g]- -द्धा मै २, २, १०; काठ १०, ९; -द्धारः तै २,३, १,१; मै २,२, १; काठ ११,६.

¶अप-रोध[h]- -धात् मै २, २, १०.

¶अप-रोधुक, का[i]- -काः मै २,२, १;४,४,२. [°क- अन्°].

अप-रोध्य- अन्°.

¶अ-परुस्[j]- -रुषि मै ३,९,२.

अप-रूप[k]- -पम् ¶तै ३, ५, ७, ३; ¶काठ २२, ८^{2}; ३५, १९; ¶क ३५,२^{2};४८,१७; शौ १२, ४,९; पै १७,१६,९.

अपरेद्युस् १अ-पर- द्र.

?अपरेहि[l] पै १६,३७,९.

¶अ-पर्ण, र्णा[j]- -र्णः काठ २६, ३; क ४१, १; -र्णम् तै ६, ३, ३, ४; $पै २, ७०, ५; १९, ३४, १६; -र्णा मै४,१,९; काठ २६, ७; क ४१.५.

अप(प-ऋ)र्तु[m]- -र्तुः शौ ३,२८,१.

अ-पर्वन्[j]- -र्वन् ऋ ⌊४, (१७, ७), १९,३⌋.

अप(प √ऋ)र्ष्, अप···अर्षंतु पै १९, ३१,६[n].

अ-पलाश[j]- -शः ऋ १०,२७,१४.

---

[a]) तस. नञ्-स्वरः ।

[b]) अत्रैकतरत्र यद् विकरण-स्वरस्तादवस्थ्येन प्रादर्शि तदपलक्षणत्वाच्चिन्त्यम् ।

[c]) सपा. °हृताः<>°ह्वृताः इति पाभे. ।

[d]) उप. परि √ह्वृ+क्तः प्र. ।

[e]) यक्र. सपा. मै २,२,९ निरुद्धः इति, निरुद्धम् इति च. पाभे. ।

[f]) सपा. पै १७,४०,३ अवरुध्मः इति पाभे. ।

[g]) गस. तृजन्ते कृत्-स्वरः प्रकृत्या (पा ६,१,१६३) ।

[h]) गस. घञन्ते थाथादि-स्वरः (पा ६,२,१४४) ।

[i]) गस. उकञन्ते कृत्-स्वरः प्रकृत्या (पा६,१,१९७) ।

[j]) बस. अन्तोदात्तः (पा ६,२,१७२) ।

[k]) प्रास. अव्ययं पूप. प्रकृतिस्वरम् (पा ६, २, २) अथवा बस. पूप. प्रकृतिस्वरम् (पा ६, २, १) स्यात् (तु. भा.) तत्फलभूतं विप. च विशेष्यगर्भं द्र. । अपि वा बस. सतः क्रिवि. द्र. ।

[l]) पाठः? परा √इ > परेहि इति सुपठं छन्दोऽनुवृत्त्च द्र. (तु. शौ १०,१,२८ अथेहि इति पाभे.) ।

[m]) विप. (⌊अपकृष्टाऽऽर्तवबीजोपेता-⌋ यमिनी- ⌊गो-⌋) । बस. वा प्रास. वा । उभयथाऽपि गत्यादौ स्वरे प्राप्ते (पा ६, २,१;२) उपसर्गादुत्तरस्य समासमात्रेऽन्तोदात्त-प्रकरणेऽस्य उसं. द्र. (पा ६,२,१८७) ।

[n]) अप···अर्षंतु > शौ ४, ३, २ पुरेण·····अर्षतु इति पाभे. ।

अप√लिख्, अ॒प···लिखात्, अ॒प (लिखात्) शौ १४,२,६८; पै १८,१३,८.

अ॒-पलित- -ता: शौ १९,६०, १.

¶**अ॒-पलितंभावुक**[a]- -कः मै ४, १,९.

अप√लुप्, म्प्, ¶अ॒पलुम्पति मै १, ६, ५; ¶अ॒पलुम्पेते मै १, ६,४; अपलुम्पतु पै २,८१, २[b]; ५, १४, १; १६, १४७, १-८; १४८, १-८; १४९, १-८; २०, ५९,२; अपलुम्पन्तु पै १९, ३२, १८; अपलुम्पत पै १९,४५,१४; ¶अ॒पालुम्पत् मै १, ६, ५; अ॒पालुम्पन्[c] काठ १२,१३; अ॒पालुम्पन्[d] काठ १२, १३^{२}; २७, २^{२}; क ४२, २^{२}.

अपालुपत् पै ८,१५,१२.

अपलुप्य॒ते शौ ५, १७,७; पै ९, १५,७.

¶**अप-लुम्पम्**[e] मै १,६,५.

अप√वच्, अपावोचत् पै २,२,४[f].

अप-वक्तृ॒- -॑क्ता ऋ १, २४, ८; मा ८, २३; का ९, ४, १; तै १, ४, ४५, १; मै १, ३, ३९; काठ ४, १३; क ३, ११; पै २, २, ४§[f]; १९, ९, ११; -क्तारः शौ ५, १५, १-११; पै ८,५,१-११.

अप-वाचन- अन्°.

अ॒प-वत्- २अप्- द्र.

अप√वद्>अप-वादि(न्>)नी- -नी पै १९,२३,८.

अप√वध्, अ॒प···वध्यासम् मा १, २६; का १, ९, ४; अ॒प-(वध्यासम्) मै १, १, १०; ४,१, १०; अ॒पावधीत् ऋ १०, १४६, ४; मा ५, ८^{१}; का ५, २, ८^{१}; काठ २, ८^{४}; क २, ३^{४}; ¶अप॒ावधीत् मै ४, ३, ४; अ॒पावधीः मै १, २, ७^{१}; कौ १, ३५३; जै १, ३७, १; अ॒पावधीम् तै १, २, ११, २^{२}.

अप√वप्, अ॒पवपति[g] काठ १०, ५; अप···वपामि पै १७,३८, ३[h]; अ॒पवप[i] ऋ ८, ९६, ९; अ॒पावपत् शौ ८, ८, ५; १९, ३६, ४; पै २, २७, ४; ९, ६, ८; ११, ७, ९; १६, २९, ५; अप॒ावपत् ऋ २, १४, ६; तै ३,३,७, ३¶; अप॒ावपः ऋ १, १३३,४.

अप-वर्तृ-, अ॒प॰॰॰वम् अप√वृ द्र.

अप√वस् (बधा.), >अप-वास॒[j]- -से शौ ३, ७, ७^{२}; पै ३, २, ६^{२}.

अप-वाश्यमा(न>)ना[k]- -ना पै १३,५,१६.

अप√वह् (बधा.), ¶अपव॒हति काठ ३७,११; अ॒पावहत[l] शौ २०, १३०, १; अपवहेः पै ३, २५, १३[m].

°अप-वाह॒[j]- > ¶अपवाह-त॒स्(:) तै ६, ६, ५, ४; मै ३,२,८.

अप√वा, ॑अपवा॒ति ऋ १, १६२, १०; मा २५, ३३; का २७, १३,२; तै ४, ६, ८, ४; मै ३, १६,१; काठ ४६,४.

अप-वा॒त्- -वान् शौ १९, ५०, ४.

?**अपवाचिराम्**[n] पै १६,२९,९.

अप√विच्, अ॒प···विनक्तु शौ १२, ३, १९; पै १७, ३७, ९; अ॒पा-विनक्[o] शौ ११, ३, ४; पै १६, ५३,९.

---

[a] अ॒-नग्नंभावुक- इत्यत्रत्यं टि. द्र.।

[b] अपुलम्पतु इति पाठः? यनि. शोधः (तु. टि. ?अक्षौर्; वैतु. BKA. उपलुम्पतु इति शोधः)।

[c] सपा. तै २,१,२,२ प्रा॒यश्चित्तिमैच्छन् इति पाभे.।

[d] एकतरत्र पाभे. अप॒ाकृन्तत् मै २, ५, २; अन्यत्र सपा. तै २, १,२, २ प्रभृ. अप॒ाघ्नन् इति पाभे.।

[e] गस. शक्यार्थे णमुल् प्र.। कृत्-स्वरः प्रकृत्या।

[f] पाभे. यक्र. अ॒ध्यवोचत्, अधिवक्ता॒ मा १६, ५ द्र.।

[g] अव° इति संकेतयमानः SI. विमृश्यः। सपा. मै २,१,११ अ॒पहते इति पाभे.।

[h] सपा. शौ १२,३,२२ अ॒पि···वपामि इति पाभे.।

[i] वैतु. GW. -पः इत्येवमुशन् चिन्त्यः प्रकरणे लोटः प्रयोगस्य दर्शनात्।

[j] गस. घञन्ते थाथादि-स्वरः (पा ६,२,१४४)।

[k] विप. (वशा-)। उप.<√वाश्>स् इति MW.।

[l] तु. RW.। शिष्टं सस्थ. ?बहुलि॒मा टि. द्र.।

[m] सपा. पै १७, २९, १७ संबर्हं इति, विबर्हः इति च पाभे.।

[n] अनपवाचना॒ (शौ ८, ८, ९) इत्यस्य स्थाने चादपवाचिराम् इति दुःश्लेषा संहिता द्र.। यमु. छेदे चात् इत्यस्य चाऽऽत् इत्याकारिका व्यवस्था भवित्री काप्यन्या वेत्यादि सर्वं भूरिविमर्शापेक्षमेव।

[o] सपा. तै १,१,५,२ वि॒विनक्तु इति पाभे.।

१¶अ-पवित्र[a]- -त्रम् मै ४,५,७.

२¶अ-पवित्र[b]- -त्रौ तै ६,४,६,३.

¶अ-पवित्रपूत[a,c]- -तः,-तम् मै ४,५,५.

अप-विद्ध- अप √व्यध् द्र.

अप √विश् > वेशि, अपवेशय > या शौ ९,२,२५; पै १६,७८,७.

अप √वी †अपवेति ऋ ५,६१,१८; १०,४३,२; शौ २०,१७,२.

अ-पवीरव[d,a]- -वान् ऋ १०,६०,३.

अप √वृ (आच्छादने), अप···वरत ऋ ६,४५,२४; कौ २,१०१८; जै ४,९,९; शौ २०,७८,३. अप···वर्षथः[e] ऋ ८,५,२१; †अ(प>)पावृधि ऋ १,७,६; २,२,७; ४,३१,१३; ७,२७,२; ८,२३,२९; तै २,२,१२,६; मै ४,१२,२; कौ २,९७१; शौ २०,७०,१२; अप···वृधि ऋ १,१०,७; अपावृत ऋ ५,४५,१. ‡अपो···वृणुते[f] कौ १,३०३; २,१०१; जै १. ३२,१; ३,१०,३; ¶अपवृणोति[g] काठ १३,३; अ(प>)पावृणु[h] का ४०,१,१५; अपावृणोत् ऋ १,१३०,३; ३,४४,५; ४,२८,१; १०,१३९,६; मै २,५,३¶; †४,९,११; ११,२; काठ ९,१९†; १३,३¶; †अप···अवृणोत् ऋ ३,३१,[२१; १०,१२०,८]; ८,६३,३; पै ६,१,८; अप···अवृण्वत ऋ २,३४,१; अपावृणोः ऋ २,११,१८; अपावृणोः ऋ ८,१००,६; अप···अवृणोः ऋ १,५१,[३; ९,८६,२३]; ४; अप[j]···अवृणोः ऋ १,१३२,४. †अप···ववार ऋ १. ३२,११; पै १३,६,११; अप···ववर्थ ऋ ३,४३,७; अप···आवः[i] ऋ १,११३,१४; ३,५,१; ७,७५,१; अप···वः ऋ १,१२१,४; अप····वः ऋ २,१४,३; †अपव्रन् ऋ ४,२,१६; ५५,६; ५,२९,१२; मा १९,६९; का २१,४,१९; तै २,६,१२,४; काठ १६,९‡; शौ १८,३,२१; अप···व्रन् ऋ ४,५,८; †अपावः ऋ १,११,५; कौ २,६०१; जै ३,४८,१७; ?अप···वम्[k] ऋ १०,२८,७.

अप-वर्तृ[l]- -र्ता ऋ ४,२०,८.

अपा-वृत्- अन्°.

†अ(प>)पा-वृत[m]- -तम् ऋ १,५७,१; शौ २०,१५,१.

अ(प>)पा-वृति[n]- -तिम् ऋ ८,६६,३.

अप √वृज्, अपवृङ्क्ते ऋ १०,११७,७; अपवृञ्जाते शौ १०,७,४२; अपवृङ्क्ष्व[o] शौ ३,१२,६; पै २०,२२,३; ?अपावृक्[p] शौ १३,

---

a) तस. नञ्-स्वरः। b) बस. अन्तोदात्तः (पा ६,२,१७२) इति। c) उप. तृस. पूप. प्रकृतिस्वरम्।

d) सस्थ. पवीर-व- टि. द्र.।

e) लेटि सिब्-अटौ द्र.। वर्षप्रतिबन्धवशाद् इषश्च सिन्धवश्च पिहितद्वारतिरोधापितवस्तुवन्नैव दृष्टिपथमवतरेयुः। तत्तिरोधापकस्य द्वारापिधानस्येव सतस् तन्निरोधनस्याऽपवरणमाशंसितं भवति [तु. वें. PW. प्रमृ; वैतु. सा. यन्मते अप इत्यस्य योग्यक्रियायाश्च योग्यकर्मणश्चाऽऽक्षेपेण 'मेघादपकृष्य' इति कृत्वा पृथगन्वयो भवति। वर्षथः (<√वृष्) इति क्रिप. च सेचनार्थकस्य सतः इषः इत्येतेनैव कर्मणाऽन्वय इष्यते (न सिन्धून् इत्येतेनापीत्यभिसन्धिः)। चिन्त्यं त्वेतन्मतं भवति। आक्षेपबहुलत्वस्य स्वारस्यविघातकत्वाव्यभिचाराद् द्वारा इत्यस्य द्वि३ सतः तृ१ एतदिति कृत्वा व्याख्यानस्य समानप्रकरणान्तरसर्वस्वविरोधाच्च (तु. ऋ १,१२८,६;३,५,१ प्रमृ.)]।

f) सपा. तैब्रा ३,१,३,२। ऋ ७,८१,१ अपो(प+उ)···व्ययति इति पाभे.।

g) अप, आ इति द्व्युपसृष्टं क्रि. संकतयमानः SI. चिन्त्यः। मुपा. वैपरीत्यदर्शनात्।

h) अपा° इति मुपा. स्वरः? यनि. शोधः। छान्दसं दीर्घत्वम्।

i) छान्दसः आङ्-आगमः (तु. [वि √वृ 'आच्छादने' >] व्यावः, वि···आवः इति)।

j) सपा. ऋ ४,१,१५; १६,६; १०,४५,११ प्रमृ. आपमं २,११,३० विवव्रुः इति पाभे.।

k) अप···वः इति शोधः (तु. सस्थ. टि. ०इन्द्र)।

l) गस. तृजन्ते कृत्-स्वरः प्रकृत्या (पा ६,२,१३९)।

m) कर्मणि क्तेऽनन्तरगतिस्वरः पूप. दीर्घत्वं च (पा ६,२,४९;३,१३७)।

n) गस. क्तिनि तादौ (पा ६,२,५०) इत्युक्तः स्वरः।

o) सपा. मागृ २,११,१४ उपसेध इति, आपमं २,१५,५ हिगृ १,२७,७ अपसेध इति च पाभे.।

p) लुङि प्रपु१। अपावर्क् इति प्राप्ते गुणाभावे यनि.। सपा. पै १८,२१,३ अपायुवन् इति पाभे.।

२,९.

अप-वृज्य- अन्°.

अप √ वृत् > वर्ति, अप···वर्तय ऋ २,२३,७.

?**अपवृप्राणिमज्जह्य** पै ५,१४,५

अप √ वृश्च्, अपवृश्चामि पै ७, २, ६[a]; अप···वृश्चतु पै ४,४,७[b].

अप √ वे, अपवय ऋ १०,१३०,१.

अप √ वेन्, अपवेनः[c] शौ ४, ८,२.

?**अपव्यक्ता** पै ५, १३, ६; १४, ३, १०.

अप √ व्यध् > विध्, अप···विध्यतः मै ३,१६,३‡[d]; †अप···विध्यताम् ऋ ६, ७५, ४; मा २९, ४१; का ३१, २, ४; तै ४, ६, ६, २; काठ ४६, १; पै १५, १०,४.

अप-विद्ध- अन्°.

अप √ व्ये, अपो··· व्ययति ऋ ७,८१, १[e]; अपव्यये शौ ६,९१,१[f].

अप-व्ययत्- अन्°.

१अप-व्रत[g]- -तम् मै ४ २,१२.

२अप-व्रत[h]- -तान् ऋ १, ५१,९;५, ४२, ९; -तेन ऋ ५, ४०, ६; खि ३, २१, १; मा १७, ४७; का १८,४,१५; कौ २, ११९०; शौ ३.२,६; पै ३,५,६.

अप √ शत्[i] > शाति[j], अप···शातय शौ १९,३४,३[k].

¶**अ-पशव्य**- -व्यः तै ६, ३,३, ४; काठ २६ ५; क ४१, ३; -व्यम् तै ६, १, ९,२; काठ ६,३; क ३,२.

¶**अप √ शास्**, अपाशासुः मै ३ ८, ५;६; ४,५,८;६,३.

¶**अप-शीर्षन्**[l]- -र्षा, -र्षाणम् तै ५,५,४,३.

¶**१अ-पशु**[m]- -शवः तै ५, २, ९, ४.

¶**२अ-पशु**[n]- -शवः काठ१२,२;-शुः तै१,७,१,३^{२}; ६; २,६,६,६;८, २; ५,२,६,३^{२}; ९, ३; ४; ३,१, ४^{२}; ६, १, ९, २^{२}; ३, २,५;३, ४^{२}; ११, ५^{२}; ६, ३, ५; ४, ४; मै १,८,९; ३,२,७^{२}; ४,८[o]; ७, ७; ४,१, ११; काठ ८,८; १०, ११; १२,१;२; ५; २०, ३;४^{२}; ८; १०^{२}; २४, ४; ६; २६, २; २७,६;२८,३; २९, ३; ३०,९; ३१.१३; ३५, १८; १९; क ७, ३; ३१,५; ६^{२};१०; १२^{२}; ३७, ५; ७; ४०, ५; ४२, ६; ४४,३; ४२,४;४८,१६;१७.

अपशु-ता[p]- -ता पै १६, १४९, ८; -¶ताम् मै २,१,८.

अ-पशु(हन् >)घ्नी[q]- -घ्नीः शौ १४,१,६२.

अप √ शुच् (दीप्तौ) > शोशुच् > †φअप-शोशुचत्[r]- -चत् ऋ ⌊१,९७,१^{२}; २-८⌋; मा ३५,६;

---

[a] सपा. शौ २, ३२, २ अपिवृश्चामि इति पाभे.।

[b] सपा. शौ १,७,७ अपि···वृश्चतु इति पाभे.।

[c] मा, अपवेनः<>सपा. पै ४,२,२ वीडयस्व इति, काठ ३७,९ तैब्रा२,७,८,१;१६,१ वीरयस्व इति च पाभे.।

[d] सपा. ऋ ६,७५,४ अप···विध्यताम् इति पाभे.।

[e] पाभे. कौ १,३०३ अपो···वृणुते द्र.।

[f] सपा. पै १९ १८,७ अपह्वयताम् इति पाभे.।

[g] प्रास. अव्ययं पूप. प्रकृतिस्वरम् (पा ६, २, २)। मै. संकेतिते स्थले कर्तृतया योगः कर्मतया वाऽथापि क्रियाविशेषणतया वेत्यत्र भूयान् विमर्शोऽद्यापि सावकाशः द्र.। क्रियाविशेषणतया इति चेदध्यवसीयेत तर्हि स्वरूपतः बस. इत्येव सुवचम्। तथात्वे स्थलान्तरीय-निगमान्तरैः संगतत्वसामान्यात्। कर्तृत्वकर्मत्वान्यतरपक्षे तस. इत्येव सुवचम्। तथात्वे प्राति. एतद् निगमान्तरीयात् प्राति. बस. इत्येवं व्याख्येयाद् भिन्नं वाच्यम्। एतत् सर्वं यस्थ. सुधीभिः सुधीविषयीक्रियेत।

[h] बस. पूप. प्रकृतिस्वरम् (पा ६,२,१)। नापू. समानस्वरं किञ्चिद्-भिन्नार्थयोगं प्राति. वस्तुतो भेदेन प्रदर्शनार्हं न वेत्यत्र नापू. टि. द्र. स्वयं च विविग्भिर् विवेच्यम्।

[i] धा. *चातने वृत्तिः (तु. Eng. √*shoot* ⌊गमने⌋)।

[j] तु. √शत् (हिंसायाम्)। पाप्र. तु < √शद् (पा ७,३,४२)।

[k] सपा. पै ११,३,३ अप···साधय इति पाभे.।

[l] बस. (पावा २,२,२४) पूप. प्रकृतिस्वरम्।

[m] तस. नञ्-स्वरः।

[n] बस. अन्तोदात्तः (पा ६,२,१७२)।

[o] सपा. अपशुः स्यात् > तै ५,५,७,१ पशून् व्यर्धयेत् इति पाभे.।

[p] भावे तलन्ते लित्-स्वरः (पा ६,१,१९३)।

[q] तु. टि. अ-देवृघ्नी-।

[r] गस. शत्रन्ते कृत्-स्वरः प्रकृत्या। वा. अघम् इति कर्मपदमनेनान्वितं द्र. (तु. सस्थ. आ √ शुच् ⌊दीप्तौ⌋ > आ···शुशुग्धि)। अत्र सा. कल्पद्वयं भवति। प्रथमे कल्पे तावद् अप इति कप्र. नः (द्वि ३) इत्यंतदभिसंबद्धो भवति तद्धीनमाख्यातं च सकर्मकत्वे सति लेटि साऽट्के तिपि

२१; का ३५, ४, २०; २१; शौ ४, ३३, १^{२}; २–८; पै ४, २९, १^{२}; २–८.

अप √शुष्, अपशुष्यति शौ ६, १३९,४.

अप-शुष्क,ष्का[a]- -ष्का, -ष्काः तै २,१,४,८.

?अ-पश्चा-दग्धृ- -ग्धा शौ १९,५५, ५[b]; पै २०,४१,९.

‡अ-पश्चा-द्घ्वन्[c]- -द्घ्वने[d] कौ १,३५२; २,७९०; जै १,३७,१.

अ-पश्चा(त्>)द्-दघ्वन्[c]- -द्घ्वने[d] ऋ ६,४२,१; -द्घ्वा मै ३, ९, ४^{2b};¶.

†**अप √श्नथ्**, अप…श्नथिष्टन ऋ ९,१०१,१; कौ १,५४५; २,४७; जै १,५६,१; ३,५,६.

अ-पश्य[e]- -श्याः ऋ १,१४८,५.

अ-पश्यत्[f]- -श्यते तै ७,५,१२,१; काठ ४५,३; -श्यन् ऋ १०,१३५,३; -श्यन्तः तै ३,२,२,१.

?अ-पश्यमान[g]- -नः पै ७,१९,७.

अप √श्रि

अप-श्रय[h]- -यः शौ १५,३,८.

अप-श्रित[i]- -तः ऋ ⌊(१,८४,१४); ५,६१,१९⌋; ८,२४,३०;

रूपम् (तु उ. मा ३५, ६)। अथोत्तरे कल्पे सगतिकमुक्तपूर्वमेवाऽऽख्यातमकर्मकत्वेनाऽन्वितं भवति। उभयत्र अघम् इति च कर्तृपदम्। अथापीह सा. आ…शुशुग्धि इत्युत्तरे क्रिप. √शुच्(दीप्तौ) इत्यस्माच् शोकाऽर्थकतयाऽभिसंमतात् प्रथमाद् धा. दीप्त्यर्थकं सन्तमपरं धा. विवेचयिष्यति। तदेतत् सर्वं चिन्त्यं भवति। अग्निकर्तृकाऽऽशोचनाऽपशोचनक्रिययोर्विषयीभावेनाऽभिन्नप्रतियोगिकयोः सतो रयेश्च अघस्य चोपस्थाप्यमानत्वप्रतिभानाद् अपाऽऽङोः उपसर्गयोर् भिन्नार्थद्योतकत्वचमत्कारसमर्पणे श्रुतिस्वारस्यस्योपपन्नतरत्वादिति यावत्। एस्थि. पराभिमतस्य भिन्नधातूपकल्पनस्य च प्रथमे वाक्ये अघ- इत्येतत्कर्तृत्वस्य च क्रिप. सकर्मकत्वाऽकर्मकत्वान्यतरत्वं प्रत्यौदासीन्यस्य च समानं वैयर्थ्यं द्र.। ननु यदुक्तं सा. नः इति द्वि३ इति अप इति च कप्र. तद्युक्त इति चाहेति, तन्न। भाष्ये नः इति ष३ इत्येवम् उक्तत्वाद् अप इत्यस्य गतित्वेन प्रदर्शनाच्चेति। सत्यं, वचसैवमेव तत्र भवति तात्पर्यतस्त्वन्यथेति। तत् तु कथमिति। अप इत्यस्य गतित्वे पर्यवसन्ने सति तदर्थस्याऽऽख्यातमात्रानुरञ्जकत्वे चरितार्थत्व-स्वाभाव्याद् 'अस्मत्तो निर्गत्य' इत्याकारकस्य पञ्चमीस्थेन सना. योगतः प्रवर्तयितुमिष्यमाणस्य व्याख्यानस्य नितान्तमन्याय्यत्वे सत्यप्यस्मत् प्रस्तावितचोद्यप्रकारत एव सूपलम्भत् (तु. उ. नः = अस्मान् इति स्पष्टं भाषमाणः)। अथाऽन्ततो यच्च म. अनुस्मयमाणं लेटि रूपम् इत्याकारकं कल्पान्तरमाह, तदप्यसत्। ऋगङ्गतया व्याख्यायां कथंचित् सिध्यत्यपि निघाताभावे (तु. सा.) तदभीष्टे यजुरङ्गतामात्रेण व्याख्याने तदनुपपत्तेरिति दिक्।

a) विप. (लोक-, विश्-)। गस. अनन्तरगति-स्वरः (पा ६, २,४९)। पूप. निन्दायामिति।

b) सपा. ?°दग्धा ⌊तु. सा.⌋<>°द्-दघ्वा (आपश्रौ ७, २८, २ माश्रौ १, ८,६,२२ अप्राय २, ७ अअ १९, ५५ प्रमृ. च ⌊तु. BW. RW⌋) इति पाभे.। यत्तु पपा. अपश्चा। दग्धुऽअन्नस्य (तु. शंपा.) इति प्रादर्शि तदसत्, अन्नस्य इत्यस्य कर्मभूतस्य पदस्य नितान्तपार्थक्यस्याऽनिवार्यत्वात् (तु. पाभे. मै ३,९,४)।

c) विप. (नृ-, अस्मद्- ⌊मै.⌋)। तस. नञ्-स्वरः। एकतरत्र उप. पश्चा इति पूप. भवति (तु. ⌊सरूपे⌋ ऋ १, १२३,५ प्रमृ.)। अन्यतरत्र पश्चात् इति। वस्तुत एनयोरभेदः। उप. √दघ् गतौ ⌊तु. निघ २,१४⌋+वनिप् प्र.।

d) सपा. °द्घ्वने<>°द्-दघ्वने (तैब्रा ३,७,१०,६ आपश्रौ १४, १९, २ च) इति पाभे.।

e) तस. उप. पाप्र. √दृश्+शः प्र. (पा ३,१, १३७) अच्कौ (पा ६, २, १५७) इत्यत्र श-प्रत्ययस्यापि उसं. अन्तोदात्तत्वं द्र। अथवा स्वतन्त्रात् सतः √पश् इत्यतः कर्तरि वा भावे वा कृत्यः प्र.। नञ्-पूर्वत्वे च पूर्वे कल्पे कृत्योकीयोऽन्तोदात्तः (पा ६,२,१६०)। उत्तरे च कल्पे तावद् बस. अन्तोदात्तः (पा ६, २, १७२) इति विविक्।

f) तस. नञ्-स्वरः।

g) शोधः अप √बाध् > ?अपबाधत टि. द्र.।

h) नाप. (उपधान-⌊नभा. तकिया⌋)। उप. अधिकरणे अच् प्र. थाथादि-स्वरश्च। W. उप-श्रयु- इति शोधुकः (तु. कौउ.)। सपा. कौउ १,५ उपश्रीः इति, शांआ ३,५ ?अपरश्च यः इति च पाभे.।

i) सस्व. कृते तु. टि. अप-शुष्क-।

-†तम् ऋ ⌊१, ८४, १४; (५,६१, १९)⌋; मै २, १३, ६; काठ ३९,१२; कौ २,२६४; जै ३,२२, ११; शौ २०, ४१, २; -तौ शौ ६,१२७,२[a].

१अपस्-, २,३अपुस्- √*अप् द्र.

अप-सं√विश्, अपसंविशस्व[b] पै १६,७८,७.

†अप-सं√वृत्>वर्ति, अप…संवर्तयति ऋ १०, १७२, ४; कौ १, ४५१; जै १, ४७, ५; शौ १९,१२,१.

¶अप-सत्य[c]- -त्यम् क ३५, २; -त्या३म् काठ २२,८[d].

अप√सश्च्, ‡अप….सश्चिम[e], अप(सश्चिम)[e] मा ३८, २०; का ३८,५,३; मै ४,९,१०.

अप√सह्, अप…सहताम् पै ४, ८, १-१३.

φअप-साह्वस्[f]- -†ह्वान् ऋ ९, १०५,६; कौ २,९६३.

अप√साध्>साधि, अप…साधय पै ११,३,३[g].

अप√सिध्, अपसेधति शौ २०, १३५,१३[h]; अपसेधन्ति शौ ५, १९,९; अप…सेधसि शौ ६, ८१, १‡[i]; पै १९ १७, १; अपसेधामि शौ ८, २ ११; पै १६ ४,१; अपसेधतु खिसा २९, ८; अप…सेधतु ऋ १०,३६,४; पै ७,५,७; अपसेधन्तु ऋ १०, १००, ८; †अपसेध ऋ ६,४७, २९; मा २९, ५५; का ३१, २, १२; तै ४,६,६,७; मै ३,१६,३; काठ ४६, १; शौ ६, १२६, १; २‡[j]; पै १५, ११, ९; २०, ३‡[k]; अप…सेध ऋ ८, ६०, २०; १०, २५, ७; अप…सेध ऋ ८ ७९, ९²; †अप²…सेध ऋ १०,९८, १२; मै ४, ११,२; काठ २, १५; अप…सेधतम् मै ४, १४, ६; शौ ४, २५, ४[l]; पै ४, ३४, ६; अप (सेधतम्) शौ ४,२५, ४[m]; पै ४. ३४, ६; अपसेधत ऋ ⌊८, १८,१०;१०, १७५,२⌋; खि ५, २१,३[h]; कौ १,३९७†; जै १,४४, ७†; †अप(सेधत)ऋ८,१८,१०²; १०,१७५,२;१०; कौ १,३९७²; जै १, ४४,७²; अप…असेधत् ऋ ६, ४७, २१; अप…असेधः ऋ ५,३१,७.

अपसेधिरे; अपसेधिम खिसा २९, ९; अपसेधस् पै १९,१,१०.

---

[a]) सपा. पै १,९०,२ अपाकृतौ इति पाभे. ।

[b]) सपा. शौ ९,२,२५ अभिसंविशस्व इति पाभे. ।

[c]) विप. (अग्नि-) । मलो. बस. ।

[d]) अचेष्टा३अपसत्या३म् इत्येवं मूलतः सति पाठे प्लुतेः प्रथमाया उत्तरं आद्यकारस्य स्थाने मु इत्येवमाकारो श्रेषः द्र. ।

[e]) तु. माश १४,३,१,१९ यतो वाक्यद्वयस्य मिथ्याऽऽभासमिव गृहीतवन्तौ उ. म. च द्वेषः इति ह्वरः इति च द्वि१ सती प्र१ इति कृत्वा अप (=अपगच्छतु) इति च अन्युव्रत- इति देवतापरमिति च व्याचक्षाते तद् विमर्शापेक्षं द्र. । सपा. °सश्चिम, अप(⌊सश्चिम⌋ माश १४,३,१,१९ तैआ ४,११,४ च)<>ऋ ५,२०,२ अप²⌊यद्र.⌋ इति सश्चिरे इति च पाभे. ।

[f]) गस. क्वस्वन्ते कृत्-स्वरः प्रकृत्या (पा ६,१,१२) । सह्वस्- इति पपा. । हे इन्दो! कंचिद्(=अपि सर्वम्) अदेवमत्रिणम् आ-साह्वान्(भव ⌊तु. नापू. ऋक्⌋) बाधश्(च) परि(-साह्वान् भव)द्वयुं (च) यनि. (भव) इति वाक्यत्रयात्मकः वा. द्र. [तु. ऋ ८, ४५, ४० यत्र अप इति परि इति च नि. यक. भिन्धि, जहि>ही इत्येते क्रिप. उपसृजन्तौ विशपयेतां यथा प्रकृतेऽपि तौ नि. च आ इति च क्रियार्थप्रधानं साह्वान् इति पदमुपसृजेयुरिति (अस्मत् इति पं. च वारणार्थेप्सितवचना द्र. ⌊पा १, ४, २७⌋) । यद्वैते नि. कप्र. एव स्युः यक. द्वयुम्, बाधः, अस्मत् इत्येभिः पदैर्युक्ताः [तु. सस्थ. ?φआ(साह्वस्- > -ह्वान्), ?φपरि-साह्वस्- > -ह्वान् (यत्रापि वैतु. PW. प्रभृ. भिन्नप्रकारकस्य वा. आलोचनम्); वैतु. वें. सा. साह्वान् इति चाध्याहृताऽऽख्यातांऽशं क्रिय. (=अप ⌊युयोधि- =अपगमय⌋) इति च (नितान्तमरुचिरा सती तदीयाऽवान्तरवाक्यकृतिराकरतः द्र.)] ।

[g]) पाभे. शौ १९,३४,३ अप…शातय द्र. ।

[h]) सपा. आगृ २,१,४ अपबाधताम् इति पाभे. ।

[i]) सपा. तैब्रा २,४,१,६ आश्रौ २, १२,३ प्रभृ. सेधति इति पाभे. । [j]) पाभे. ऋ ६,४७,३० अपप्रोथ द्र. ।

[k]) सपा. ऋ २,३३,३ रपसो युयोधि इति विभे. ।

[l]) वैतु. सा. अप+इतः (<√इ) इति । नितरां चिन्त्यं त्वेतत् । इतः इत्यस्याऽनिहतस्य सतः क्रिप. एतदित्यस्य वचसः संस्कारच्युतिमात्रत्वे सति मपु२ इति कृत्वा व्याख्यानप्रवृत्तेः साहसमात्राऽनतिरिक्तत्वादिति । इतः इति तसि-प्रत्ययान्तं द्र. ।

[m]) सपा. पै ४,३४,७ परा (सेधतम्) इति पाभे. ।

अप-सिध्य[a] शौ ८,२,७.

अप-सेधत्- -धत् ऋ १, ३५, १०; ९, ८२, २; ११०, १२φ; मा ३४, २६†; का ३३, १, २०†; काठ ३८, १२φ[b]; कौ २, ६६८†; जै ३, ५५ ९†[c]; पै १०,१,१२φ.

अप√सू (प्रेरणे), अप···सुवे काठ ३८, १३; अप···सुवामि शौ ६, ११९, ३[d]; अप···सुव ऋ १०,३७,४; मा ३५,११; का ३५,४,१०; अप (सुव) ऋ १०, ३७,४; मा ३५, ११^{४}[e]; का ३५, ४,१०^{४}[e]; पै १७,२५,७.

अप···साविषत् ऋ १०,१००, ८; अप (साविषत्) पै २०, १७, ९[f].

अप√सृ, अप···सरत् ऋ ४, ३०, १०.

अप√सृज्, अपसृजामि पै १६,१३०, ३[g].

अप√स्कन्द्, >स्कन्दि, अपस्कन्दयतु पै २,२४,१;४; अपस्कन्दयन्तु पै २,२४,२;३;५.

अप-स्कन्द- -न्देन पै २,२४,५.

अप-स्कन्द्य पै २,७०,१.

अप√स्कम्भ् > अप-स्कम्भ[h]- -म्भस्य शौ ४,६,४; पै ५,८,३; ११,२,४.

अपस्तम- √*अप् > २अपस्- द्र.

अप√स्था, >तिष्ठ, अपतिष्ठात् पै १३, ९,१२; अप···तिष्ठन्तु पै १,९४, ३; अप···अतिष्ठन् ऋ १०,१२४,८.

अपस्थातम् ऋ १०, १०६, २; †अपस्थात>ता ऋ ८,२०,१; कौ १,४०१; जै १,४५,३.

अप···अस्थुः[i] ऋ ८,४८,११.

†अप-तस्थिवस्[j]- -स्थुषः ऋ ९,१९, ६; कौ २,१११; जै ३,११,७.

अप-स्थापन- > अपस्थापन-भेषज- -जम् पै १,५८,४.

?अपस्थाय[k] पै २०,४८,१०.

अप√स्पृ, †अपस्पृण्वते[l] ऋ ८, २, ५; जै ४, १६,६; ¶अपास्पृणुत काठ २४,१; क ३७,२.

अप-स्पृश्- अन्°.

†अप√स्फर्, अपस्फरीः ऋ ६,६१, १४; मै ४, ११, २; काठ १७, १८; ३०,३; क ४६,६.

अप√स्फाय् > स्फा

अप-स्फान- -नस्य पै १,५८,१.

अप√स्फुर्

†अप-स्फुर्[m]- -स्फुरम् ऋ ८,६९, १०; शौ २०,९२,७. [°स्फुर्-अन्°].

¶अप-स्फु(र् >)रा[n]- -रा मै २, ६,५; ४, ३,८; काठ १५,४. [°र- अन्°].

? अप-स्फुर(त् >)न्ती[o]- -न्ती पै १४,३,१.

१-४अपस्य-, √अपस्य, १अपस्या-, २ अपस्या-, अपस्यु,स्यू- √*अप् द्र.

अप√हन्, > जङ्घन्, ¶अपहते तै २,४,२,४;५, ३,१; ३,२,९, ५;५, ३, ४, ७; ७, ५, २^{२};६, १,१,५; मै २, १,११^{१}[p]; ५,५; ६^{२}; ८;९^{२}; ३, ६,२; ६; ४, ३, ४;८,३; काठ १०,९^{२};१०[q];१३; २; ३; ६^{२};७^{२}; १४,६; १९,३[r], ११; २२, १;२३,४[s]; ३१,११;

---

[a]) सपा. पै १६,३,७ उपजित्य इति पाभे.।

[b]) पाभे. φअपदुहन् शौ १,२८,१ द्र.।

[c]) अप-सेधन् इति मुपा.? यनि. शोधः।

[d]) पाभे. अपधित्सामि द्र.।

[e]) एकतरत्र अपो(प-उ) इति समुदितो निपातः द्र.।

[f]) सपा. शौ १,१८,२ निः (साविषक् ⌊<√सू 'प्रेरणे'⌋) इति पाभे.।

[g]) सपा. शौ १०,५,२३ पै २०,२६,७ पागृ १,३,१४ प्रहिणोमि इति पाभे.।

[h]) गस. घञन्ते थाथादि-स्वरः (पा ६,२,१४४)।

[i]) वें. 'अपतिष्ठन्तु' इति यदाह तद् यथा-धातुस्थिति-वचः। यत्तु 'अपगच्छन्तु' इति वें. च सा. चाहतुस् तत् तात्पर्यप्राप्त्यपेक्षिताऽनुषङ्गपरं वचः द्र.।

[j]) गस. क्वस्वन्ते कृत्-स्वरः प्रकृत्या (पा ६,२,१३९)।

[k]) °स्थात इति शोधः (तु. सपा. ऋ ८, २०,१)।

[l]) प्रपु३ झच् आदेशः उसं. (पा ३,४,७८)। चिद्-अन्तोदात्तः (तु. MGS. ४६० टि. ४)। यत् सा. पक्षान्तरे अप इत्यस्य धात्वर्थानुवादकत्वम् आह तदक्षोदक्षमतयोपेक्ष्यं श्रुतिस्वारस्येतरत्वात्।

[m]) विप. (सोम-)। गस. क्विबन्ते कृत्-स्वरः प्रकृत्या।

[n]) विप. (धेनु-)। गस. इगुपधलक्षणः कः प्र. (पा ३, १,१३५) थाथादि-स्वरश्च।

[o]) अनपस्फुरन्ती इति शोधः (तु. शौ १२, १,४५)।

[p]) सकृत् पाभे. अपवपति द्र.।

[q]) सपा. मै २,२,१० विहते इति पाभे.।

[r]) सपा. मै ३,१,४ व्यास्थत इति पाभे.।

[s]) सपा. मै ३,६,७ प्रहरति इति पाभे.।

३४, १२; क ३०, १[a]; ३१, १; ३६, १[b]; ४७, ११; ¶अप……हते तै २, १, १०, ३; २,५, १; ¶अपहन्ति तै २, १, २, ८; १०, १; ३; २, २, २; ७, ५; ६, ४, २; ६, ३[c]; ५, १, ३, ४; ८, ६; १०, २; २, १, ५; ३, २; ७, ४[d]; ५^{२}; १०, १[d]; ६, २, १, ६[c]; ४, ५; ९, २; ६, ३, २; मै २, ५, ९; ३, १, ९; २, ६; ७, ४; ८, ७; ९, ७; ४, १, १३^{२}[c]; ३, ४^{२}; ८, ५^{३}; काठ १०, ४; ५; ११, ५^{३}[e]; १३, ७; १९, ३; २०, ५; २५, ४^{२}[f]; ८; ३१, १; ३; ७; ८; ९^{२}; १०; ३४, ५; क ३०, १; ३१, ७; ३९, १; ४०, १; ४७, १; ३; ८^{१}[d]; ९; १०^{२}; $शौ ९, ५, ७; ११; $पै १६, ९७, ८; ९; ¶अपहुन्ति तै २, ६, ६, ३; ६, २, १, ६; मै २, १, ५^{२}[g]; काठ ११, ५; अप……हतः[h] ऋ ६, ६०, ६[i]; अपघ्नन्ति मै २, १, ५¶; अपहुंसि मा १८, ५२; का २०, ३, २; तै ४, ७, १३, १; मै २, १२, ३; काठ १८, १५; क २९, ४; पै ३, ३८, ६; ‡अप……हथः[h] कौ २, २०५; जै ३, १८, १२; अपहन्महे[j] काठ ३८, १३; अपहन्मः शौ १, १८, ३; ८, ६, ४; पै १६, ७९, ४; अपहन्मसि शौ ८, २, १२; ६, ५; पै १६, ४, २; ७९, २; ५; ८१, ५; अप……हन् ऋ १०, १८२, [१–३]; अप……हनत् तै ४, १, ४, ४; ५, १, ५, ९; अप……हनाथ शौ १४, १, ५९; पै १८, ६, ७; अपहन्तु शौ २, ३, ६; ६, १३४, १[k], ८; ७, १४; १२, ३, १४; पै ५, ३७, २; १६, १३, ४; ९७, ७; १५०, २; १७, ३७, ४; १९, ५०, ४; अप^{२}(हन्तु) पै १९, ५०, ५; अप……जहि ऋ १, ४२, २; ९४, ९; ९, ४, ३; [१३, ८; ६१, २८]; मा १, १७; ११, ४७; का १, ६, १; १२, ४, ११; तै १, १, ७, १; ३, ५, ८, १^{२}‡[l]; मै १, १, ८; २, ७, ५; ४, १, ८; काठ १, ७; ९; १६, ४; २५, ४; ३१, ६; ८; क १, ७; ९; ३९, १; ४७, ६; ८; †कौ १, ४७९; २, १२८; ३९९; ५४४; †जै १, ५०, ३; ३, १३, ४; ३१, १९; ४२, १०; †अप……जहि ऋ ९, ८, ७; ६३, २८; कौ २, ५३४; जै ३, ४१, १०; †अप(जहि) ऋ १०, १५२, ५^{२}; तै ३, ५, ८, १; ९, २; शौ १, २१, ४^{२}; पै २, ८८, ५^{२}; †अप……हतम् ऋ १, १३२, ६; १०, ४०, १३; मा ८, ५३; का ९, ६, ५; शौ १४, २, ६; पै १८, ७, ६; ७; अप (हतम्) पै १८, ७, ७; (अप) हतम् ऋ १, १३२, ६; मा ८, ५३; का ९, ६, ५; अपहत ऋ [(७, १०४, ७) १०, ७६, ४]; शौ १२, २, ४७; पै १७, ३४, ८; †अप……हत > ता ऋ ९, १०१, १३; कौ १, ५५३; २, ७३६; जै १, ५६, ९; ३, १२, ८; ४, २६, १; ¶अपःहत तै २, ५, ३, १; ५, १, १०, २, मै २, १, ११^{२}; ३, १, ९; ४, १; १३; ३, ४; काठ ८, ५; १०, ९^{२}; १३, ७; क ७, १; ¶अपाहत मै २, ५, ५^{२}; अपाहन् ऋ ३, ३३, ६; ¶मै २, ५, ९; ४, १, ९; १०; ८, ५; ¶काठ १०, ५; २७, ३; ३१, ७; ८; ¶क ४२, ३; ४७, ७; ८; अपाघ्नाताम्, अपाघ्नाताम् ¶मै २, ५, ९; ¶अपाहताम् मै २, १, ५; ¶अपाघ्नत

---

[a]) पाभे. अपहते काठ १९, ३ द्र. ।

१असुर्यँ,या॑[a]- -०र्यं ऋ २, २३, २;१०,१०५,११; -†र्यः ऋ ८, १०१, १२; मा ३३, ४०; का ३२, ३, ११; काठ ३४, ३¶; कौ २, ११३९; जै ४, ३, ३; शौ २०, ५८, ४; -र्यम् ऋ २, २७, ४; ३३, ९; ३, ३८, ७; ५, १०, २; ६६, २; ६, २०, २; ३०, २; ३६, १; ७४, १; ७, ५, ६; ६५, १; ९,७१, २; मा ८, २४[b]; का ९, ४,२[b]; तै १,४,४५,१[b]; २, १, ११, ५†; ५,१, ७, ४¶; मै १, ८, ३¶; ४,७,४^{२}¶; ११,२†; १२, १†; काठ ४, १३[b]; ६, ३¶; ११, १२^{२}†;१९,७¶; क ३,११[b];४, २¶; ३०,५¶; पै १, १०९,३; -†र्यस्य ऋ २,३५,२; ७, २२, ५; काठ १२, १५; कौ २, ११४९; -र्या ऋ १, १६७, ५; १६८, ७; ७, ९६, १; ¶काठ २५,८; ¶क ४०,१; -र्याणि ऋ ४,४२,२; १०, ५४, ४; -र्यात् ऋ १, १३४, ५; -र्यान् मै १, ३, ३९[b]; काठ २४, १०¶; क ३८,३¶; -†र्याय ऋ ४, १६, २; ७,२१,७; ⌊६६, २; ८,२५, ३⌋; १०,५०,३; जै ३, ५४,८; शौ २०,७७,२; -¶यौँ मै ४, ६, ३.

२*असुर[c]- > *असु(र-क)रिका[d]- > असुरी[e]- -यँः[f] मै १,६,३.

*?३असुर[g]- > *असुरिक[h]- > २¶असुर्यँ,या॑[l]- -यँः मै १, ६, १०; काठ १३,४; -र्यम् मै ३,६, ६^{३}?[l]; काठ ३४,२; -र्या मै १, ८,६; ३, ६,६; काठ ८,३; क ६, ८; -र्याः[k] मा ४०,३; का ४०,१,३.

१,२असुर्यँ- १, *?३असुर- द्र.

¶अ-सुवर्ग्य[l]- -र्ग्यः तै ५, ५, ३,२; -र्ग्यम् तै ५, २, १०, ७; ५, ४,४.

अ-सुषिरत्व[m]- -त्वाय मै ३, १०,२.

अ-सुष्वि[n]- -ष्वीन् ऋ ४, २४, ५; ६, ४४, ११; -ष्वेः ऋ ४, २५,६.

---

[a]) तद्धिते यति नित्-स्वरः (पा ६, १, १८५)।

[b]) सपा. असुर्यँम् (माश ४,४,५,१२) <> असुर्यान् इति पाभे.।

[c]) मौस्थि. *२अस्-वर्- (=उस. थाथीय-स्वरः ⌊पा ६, २, १४४⌋) इति विशेषे सति १असुर- इत्यत्र निर्दिष्टा दिशा एवाऽतिदेश्या। एउ. व्यु. औप. द्र. (तु. एउ. टि.)।

[d]) नाउ. व्यु. नैप्र. औप. द्र.।

[e]) पाप्र. १असुर- इत्यतः ङीषः उसं. (पा ४, १, ४१) यथेष्टलाभे संभवत्यपि मौस्थि. स्त्री. उपयुज्यमानस्यैकारस्य स्वरभावाऽभावतो यथायोगं मूलशब्द-सस्वरविस्वराऽन्त्याऽकारस्थानितया प्रतिपत्तेरिदं कल्पना-गौरवमिह लब्धाऽऽदरमिति दिक् [तु. टि. १असुर- > आसु(र>)री- > -यौँ (मै २, ५, ९)]।

[f]) जसि स्वरसंक्रमः (पा ८, २,४)।

[g]) नापूपू. सरूपयोरन्योन्यं स. विषयभेदे सत्यप्यर्थतः सजातीयत्वं भवति। तयोरुभयोः प्रकाशसाहित्यवति तात्पर्यात्। प्रकृतं तु प्रकाशराहित्यवति तात्पर्यात् ततो विजातीयं द्र.। एवमर्थतः सिद्धेऽपि विवेके व्यु. स्वरस्य च विषये संदेहो भवति। तथाहि। यनि. उप. च उस. थाथीय-स्वरः स्यात् (पा ६, २, १४४)। नापूपू. सरूपं सद् भावे वा कर्तरि वा <√वृ 'आच्छादने' (वैतु. नापूपू. सरूपयोः उप. कर्तरि <√*वृ <√भृ) इति स्यात्। यद्वा तस. नञ्-स्वरेण *?४अ-सुर- इत्येवं वा निर्देष्टव्यम्, यत्र उप. (√*सृ ⌊प्रकाशे⌋>) *सुर- इति भाप. द्र.। नाउउ. व्यु. चैतत् औप. द्र.।

[h]) तस्येदमीयेऽर्थे ठ>इकः प्र. उसं. (पा ४, ३, १२०)। तत्-स्वरः। मौस्थि. नाउ. व्यु. औप. द्र. (तु. *?असूरिक-)।

[i]) विप. (रात्रि-, लोक-, वर्ण- प्रमृ.)। नैप्र. वर्णविपरिणामे सति स्वर-संक्रमः (पा ८, २, ४)। यद्वा पाप्र. एपू. वा नाउ. वा यति प्र. तित्-स्वरः।

[j]) तु. सस्थ. टि. अ-सूर- > ?१असूर्यँ- > -यँम्।

[k]) =सपा. माश १४, ७, २, १४ ई ३ च। बृउ ४, ४ ११ कठउ १, १, ३ अनन्दाः इति पाभे.।

[l]) तस. नञ्-स्वरः (पा ६, २, २)।

[m]) वा छन्दसि (पाम ५,१, ११९) इति प्रकृतिस्वरं बाधित्वा नञ्-स्वरः (पा ६, २, २)। वस्तुतस्तु भावप्रत्ययान्ततया निष्पन्नेन सता नञः स. च तत्-स्वरश्चेत्येवं सुवचम्।

[n]) नाप. (सोमाभिषवाऽकर्तृ-)। उप. √सु(अभिषवे) +क्विन् प्र. उसं. (पा ३, २, १७१)।

अ-सू[a]– -सूम् मा ३०, १४; का ३४, ३,१; –स्वम्[b] ऋ १, ११२, ३; १०,६१,१७; शौ ७,३६,३.

अ-सू-सू[c]– -स्वः[b] शौ १०,१०,२३; पै १६,१०९,३.

?**असूक्त**[d] पै १४,१,१८.

अ-सूतिका[e]– -का शौ ६, ८३, ३; पै १,२१,४.

***असूय**[f]–> √असूय > **असूयत्**[g]– -यन् ऋ १०,१३५,२.

असूया[h]– -या पै ४, २४, ३?[i]. [°या- स°].

?**असूयेकपस्तु**[j] पै ४,२४,३.

अ-सूर[k]– -रे ऋ ८, १०, ४.

*?**असूरिक**[l]–>?१**असूर्य**[m]– -र्यम् मै ३,६,६[n].

असूर्त[o]– -र्तम् शौ १०,३,९; पै १६, ६३,८; –र्ते ऋ १०, ८२,

---

[a] विप. (⌊प्रसवाऽसमर्था-, बन्ध्या-⌋ धेनु-, सपत्नी-), नाप.(बन्ध्या-स्त्री- ⌊मा ३०,१४⌋) । बस. अन्तोदात्तः उप. √सू (प्राणिप्रसवे) + भावे क्विप् प्र. । यद्वा तस. उप. कर्तरि क्विबन्तं चार्वादिषु उसं. (पा ६,२,१६०) ।

[b] स्वरसंक्रमात् स्वरितः (पा ८, २, ४) । शाखा-भेदेन यण्-भावाऽभावौ द्र. ।

[c] पपा. नावग्रहः । तेनाऽभ्यस्तीभावमिव स्वार्थिकं नञ्-पूर्वमिति संभाव्य PW. प्रमृ. एतत् =नापू. इत्यभिसंदधिरे । यथा यनि. पक्षेऽवग्रहाऽभावो नोपपद्येत, एवं परपक्षेऽप्य् अभ्यासह्रस्वाऽभावो धा. मूर्धन्यादेशाऽभावश्च नोपपद्येयातामित्युभयोः पक्षयोश् चोद्यदुष्परिहरत्व-सामान्यात् प्रकरणाऽनुसंधानतोऽन्यतरपक्षपरिग्रहो निर्णीयेत । एस्थि. वशायाः सामान्येन अस्वः सत्याः सूभावोदये श्राविते सत्येव तद्-गर्भश्रुतिरुपपद्येत चमत्कृति-सहकृता च भवेद् इति युज्येतैव समासपक्ष इति मतं भवति (तु. W.) । यनि. अ-सू- इत्यस्य नञ्-युक्तस्यैव पूर्वपदीभाव इति उस. क्विबन्ते कृत्-स्वरः प्रकृत्या ।

[d] सवितृ-प्रकरणात् असूत (<√सू ⌊प्रेरणे⌋) इति शोधः द्र. ।

[e] विप. [(⌊पूयस्रावम् अजनयन्ती-⌋ वन्ध्या-) अपचित्-] । बस. समासान्ते कपि कात्पूर्वस्याऽकारस्येत्त्वं ह्रस्वान्तेऽन्त्यात्पूर्वीयः स्वरश्च (पा ५, ४, १५४; ७, ३, ४४; ६, २, १७४) ।

[f] व्यु.? पाप्र. असु- इत्यतो क्यषन्ताद् वा यगन्ताद् वा नाधा. सतः (पा ३, १, २७; पाम ३,१,१३) पचाद्यजन्तं प्र.ति. द्र. (तु. टि. √वसूय) । मौस्थि. तु १असुर->१असुर्य- इत्यतः नैप्र. यनि. विपरिणामः (तु. माश १,२,५,४) ।

[g] शतुर्निघाते तुदा. विकरणस्य स्वरः (पा ६,१,१८६) ।

[h] स्त्री. भावे अः प्र. टाप् च (पा ३, ३, १०३) ।

[i] पाठः? तृ१ सल् लुप्तैकयकारं संभाव्येत (तु. नाउ. टि.) ।

[j] पाठः? असूया (=असूयया), एकपस्तु इति पदद्वयं स्यादिति तत्परः शोधः द्र. (पञ्चपन्मातृत्वादेकपद्विषयाऽसूयेत्यभिसंधिः) । अधिकाक्षरनिविवर्तयिषा-प्रयोजितः यनि. पाठस्य विकारः द्र. ।

[k] नाप. । अर्थः? ⌊प्रज्ञा-रहित-⌋ मनुष्य- इति वें., ⌊स्तोतृ-रहित-⌋ देश- इति सा., ⌊सूर्य-रहित-⌋ काल-, रात्रि- इति BW. WAG ⌊२, ५१b⌋ प्रमृ. । बस. अन्तोदात्तः (पा ६, २, १७२) ।

[l] *असुरिक- इत्यत्रत्यं टि. द्र. ।

[m] २असुर्य- इत्यत्रत्यं टि. द्र. ।

[n] एव किल मूको. (तु. संटि.) । प्रकरणतस्तु *?३असुर->२असुर्य- इत्यस्य रूपं द्र. । एवमप्यन्यतरत् क्रिवि. (=नक्तम् इत्येतत्सकक्षम्) अन्यतरच्च कर्मपदम् इति विवेकः द्र. ।

[o] व्यु.? *अस्वूर्त- [=(√१अस् ⌊<√*भस् (तु. २असि-, पंजा. भस्,⌋>)*अस्- (=भाप. धूलि-पर्यायः)+(√वृ>)*वुर्-[भाप. (=वूर्->ऊर्- इत्यत्र तु. *वूर्णा->ऊर्णा- ; पंजा. ⌊*वुण्णु->*उण्णु->⌋ उन्नु) इति कृत्वा *अस्वुर्- इति तस सास्व. (पा ६, १, २२३) सति (√तॄ>)त्र-(भाप.) इत्यनेन बस. पूप. प्रकृतिस्वरः (पा ६,२,१)] इत्यस्य (धूलिधूसरित-वचनस्य सतः) नैप्रा. यनि. विपरिणामः स्यात् [तु. टि. असूर्ति-, *सुवुर्-, सूर्त-, *सूर्ति-, शौ (१०, ३,९) च यत एतन्निगमान्तरेऽपि रजस्- इत्यस्यैव विप. भवतीति स्पष्टम्; वैतु. या. (६, १५) प्रमृ. असु- इति पूप.? (तु. दे. ⌊४, ३⌋, स्क. दु., सा. ⌊तै., का.⌋ उ. म.), √ईर् इत्येतत् क्तान्तं सत् उप. चेति कृत्वा तृस. पूप. प्रकृतिस्वरः (पा ६, २, ४८) अभावतश्चोद्याः, नञ्-पूर्वः बस. वा (तु. सा. ⌊ऋ.⌋) तस. वा (तु. PW. GW. ORN. NW. MW.) इति सूर्त- (√सृ इत्यतो वा ⌊तु. पाका ८, २, ६१⌋, सा. ⌊ऋ.⌋, PW.⌋ √स्वृ इत्यतो वा ⌊तु. ORN. GW. NW.⌋) इति उप. चेत्यपि स्वरतोऽसाधु वचः । बस. अन्तोदात्तः (पा ६,

४[a]; मा १७,२८[a]; का १८,३,४[a].

असूर्ति[b]- -‡र्ता[a] तै ४,६,२,२; मै २, १०,३; काठ १८,१; क २८,२.

?१असूर्य[a]- अ-सूर- द्र.

२अ-सूर्य[c]- -र्ये ऋ ५, ३२,६.

?असृगादा पै ९, ६,६.

असृज्[d]- -सृक् ऋ १, १६४, ४; खि ४, ५, १४; ७, १, ६; मै ४, २, ९^{२}¶; काठ ३४, ८^{२}; १२; शौ ४,१२,४; ५; ९, १४, ४†; पै ४,१५, ३; ७, ११, ४; १५,२३,२; १६,६६, ४†; १७, २१,१; २०, ५२, ११; –सृजा पै २०,३९,२; -सृजाम् ?पै ८. ७,८; –सृत्?[e] तै ७,४,९,१¶.

असृक्-तस् (:) पै २०,५२,१२.

¶**असृक्-त्व**- -त्वम् मै ४, २, ९; काठ ३४,८.

असृक्-पावन्[f]- -वानम् शौ २,२५, ३; पै ४,१३,६.

असृक्-सृष्ट- -ष्टम् पै २०,४९,८.

असृक्-स्थान- -नम् पै २०, ५४,३.

असृङ्-मुख[g]- -खः मै ४, ९, १९; –खान् शौ ११, ११,१७; पै १७,१२,८.

¶**अ-सृष्ट,ष्टा**[h]- -ष्टः मै १,६,६;–ष्टम् मै ४,२, ९; पै २०, ४९, १०; –ष्टाः मै १, १०, ५; काठ ३५, २०; क ४८, १८; -ष्टान् पै २, १५,३$[i].

अ-सृष्टि- -ष्टौ पै २०,४९,८.

अ-सेन्य[j]- -न्या ऋ १०,१०८,६.

¶**अ-सोम**[k]- -मः काठ २७, ४; क ४२,४.

¶**अ-सोमप**[h]- -पाः मै १,४,६; काठ २६, ९^{२}; क ४१, ७^{२}; –पान् काठ २६, ९; क ४१, ७; –पैः काठ २६,९^{२}; क ४१, ७^{२}; –पौ तै २, १,१०, १; मै ४, ६, २; काठ १३, ६; २७, ४; क ४२,४.

¶**अ-सोमपीथ**[l]- -थः काठ ११, १०.

¶**अ-सोमयाजिन्**[h]- -जी तै २, ५, ५,१^{३}.

¶**अ-सोम्य**- -म्यस्य[m] काठ ५,२.

¶**अ-स्कन्द**[h]- -न्दाय तै १, ५,८,५; २, ५, ८, ६; ५,६, ८, ४; ७, ६, ५; ६, ३,८, १; ३; ४, ५, २; मै ४,१,३; १०[n]; काठ १३, १०; १९, ४; २३, ३; २५, ४[n]; ३१, २^{२}; ८[n]; क ३०,२; ३९,१; ४७,२^{२}.

***अ-स्कन्द्यङ्च्**-> **अस्कन्दी(क>)का**[o]- -के पै १५, १८,७.

अ-स्कन्न[h]- -न्नम् मा २,८; का २,२, २; ¶तै २, ६,१, ७; ६, ३,८, १; ३; ४, ५, २; मै ¶१, ४, १२; ३,१०,२; ¶४, १, २;२, १४^{२}; ¶काठ ६, ३; २३, ३; ३१, १; ३२, २; ¶क ४, २; ४७, १; –¶न्नाः मै ३, १०,१; ४,५,५^{२}.

२, १७२) तस. च आद्युदात्तः (पा ६, २, २) स्यादित्यभिसंधेः]।

[a]) सपा. असूर्ते<>असूर्ता इति पाभे.।

[b]) व्यु.? *अस्वर्त्रि- (=उप. *त्रि- इत्येव नापू. विशेषः) इत्यस्य नैप्र. विपरिणामः स्यात्। ननु किमितीदं नापू. पृथक् प्राति. इति (वैतु. सा. [तै. स्थ.] भूतानि इत्येतत्समानाधिकरणं सत् यनि. नापू. न. द्वि३ इति)। असूर्ते सूर्ते रुजसि निषत्ते (ऋ १०, ८२, ४) इत्येतस्य मौलिकस्य सतः पाठस्य स्थाने प्रकृतस्य पाठस्य पर्यायान्तरमात्रत्वाभिसंधेरिति । कथमिति ·। यथा तत्र असूर्ते इति सप्त१ सद् रुजसि इत्यस्य विप. भवति (वैतु. यस्थ. या. (६,१५) प्रमृ. एकारान्तं पुं. प्र३ सद् ऋषयः इत्येतत्समानाधिकरणमिति), तथेह (रुजसो) विमाने इत्यनेन सप्त१ सता असूर्ता (=-र्तौ) इत्यस्य संबन्धो गालवेष्टो पुंवद्भावश्च (पा ७,१,७४) इति (तु. टि. *सूर्ति-, निषत्त-)।

[c]) विप. (तमस्-)। बस. अन्तोदात्तः (पा ६,२,१७२)।

[d]) =शोणित-। (√अस् [भुवि]>) *असु-+(√सृज्>) *सृज्- (भाप.) इति स्थिते नैप्र. एकसकारलोपे सति बस. पूप. प्रकृतिस्वरम् (तु. टि. असन्-)।

[e]) यकृत्-, शकृत्- इत्येतदीयाऽऽभासजन्यः ज्>त् इति विपरिणाम इति (तु. L५२३) वा, पृथक् प्राति. इदम् उप. √सृ>भाप. *सृत्- इत्यंशमात्रे असृज्- इत्यतो विशिष्टं सत्तेन सव्यु. इति वा विमृश्यम् ।

[f]) विप. (२अराय-)। उस. उप. √पा(पाने) + वनिप् प्र. कृत्-स्वरश्च प्रकृत्या।

[g]) बस. पूप. प्रकृतिस्वरम् (पा ६,२,१)।

[h]) तस. नञ्-स्वरः।

[i]) पाभे. अशिष्टान् शौ २,३१,३ द्र.।

[j]) तस. अन्तोदात्तः (पा ६,२,१५६)।

[k]) विप. ([सोम-रहित-] मैत्रावरुण-ग्रह-)। बस.।

[l]) विप. (शूद्र-)। बस. उप. भाप.।

[m]) पाभे. अब्राह्मणस्य मै १,४,१२ द्र.।

[n]) सपा. क ४७, ८ असुताय इति पाभे.।

[o]) तस.।

¶अस्कन्न-त्व[a]- -त्वाय मै १,८,३; ३, ४, ७; ८, १०; ९, ७^{2}; ४, ५,२;८,९.

¶अस्कन्न-हविस्[b]- -विः तै १, ६, ८,२.

अ-स्कम्भन[c]- -ने ऋ १०,१४९,१.

†अ-स्कृधोयु[d]- -यु ऋ ६. ६७,११; ७,५३,३; -युः ऋ ६, २२,३; शौ २०,३६,३.

?अस्त[e] पै २०,१६,१.

१अस्त- √अस् (क्षेपणे) द्र.

२अस्त[f]- -स्तः[g] पै ५, ३०, ७; -स्तम् ऋ १, ६६,५; ११६,५; २५; १३०, १[h]; ३, ५३, ४;६; ४, १६,१०; ३४,५; ५, ६,१^{1}; ३०, १३; ६, ४९, १२; ७, ३७,४; ६; ८, ⌊३, २३; (७४, १४)⌋; ९१, १; ९, ६६, १२; ९७,८; १०, १४, ८; २८, १; ३४, १०; ८५, ३३; ८६, २०; २१; ९५, २; ४; १३; १११, १०; खि १, २,१^{2}; ३, १९,१; ५, २२, ६^{1}; मा ३, ४७; १५, ४१^{1}†; का ३, ५, ४; १६, ५, २३^{3}†; तै १, ८, ३, १; मै १, ६, २; ७^{2}; १०, २; २, १३, ७^{1}†; काठ ७,१४; ९, ४; १७, १८†; ३९, १४^{3}†; क ६, ३; ८, ७; †कौ १, ४२५^{1}; २, ९; ४६७; १०८७^{1}; †जै १, ४१, ७^{1}; ३, १, ११; ३५, २; ५३, ८; शौ ४,१५,६; १०, ८,१६; १४, १, ४३; २, १३; २९†; १८,३, ५८†; †२०,१२६,२०; २१; पै १, ७२, २; ४, २६, १†; ५, ७, ३; ८, १५, १२; १६, १०२,५; १८, ४, १०; ८, ४; ९, ९†; -‡स्ता[h] कौ १, ४५९; जै १, ४८, ३; -?स्ताः मै ३,८,३‡[i]; -†स्ते ऋ ७,१, २; काठ ३९,१५; कौ २,७२४; जै ३,५९,१७.

अस्त-क[k]- -कम् खि २, ९, ५; शौ २, २६,७; पै २, १२, ५. [°क- सु°].

अस्त-ताति[l]- -तिम् ऋ ५,७,६.

अस्तम्[m]

अस्तमि(म् √इ) > अस्तंयत्[n]- -यते[o] शौ १७, १, २३; पै १८, ३२, ७; -यन् शौ ९,१०,५; पै १६, ११५,२;३.

---

[a] तु. टि. अ-सुषिरत्व- ।

[b] बस. पूप. प्रकृतिस्वरम् (पा ६,२,१) ।

[c] नाप. (अन्तरिक्ष-) । बस. अन्तोदात्तः ।

[d] विप. (⌊अनल्पप्राप्ति-, पुष्कल-⌋ यद्-, रयि-) । तस. नञ्-स्वरः । उप. <स्कृधु ⌊=कृधु-⌋+१आयु- इति या. ६,३ वें. सा. प्रभृ. । शेषं कृधु- टि. द्र. ।

[e] सपा. शौ ७, ११८, १ असः (√अस् ⌊भुवि⌋) इति पाभे. ।

[f] नाप. (गृह-, धामन्-) । व्यु.? पाप्र. √अस् (भुवि)+तन् प्र. उसं. भ्वादेशाऽभावश्च (पाउ ३, ८६) । नित्-स्वरः । यनि. एव बधा. च स्वामित्वविशिष्टोपवेशनाऽर्थकः सन् √आस् इत्यस्य च √*निश् (तु. २निष्कृत-, नीड-) इत्यस्य च सनाभिरिति कृत्वा √*अर् (रक्षणे) इत्यस्य तदवान्तरप्रभेदतया सुवचस्य सतः कायविस्तरः स्यात् [वैतु. दे. (३, ४) भू-गति-दीप्त्या(प्ति-आ)दान-क्षेपणानामन्यतममर्थमपेक्षुकः सन्ननिर्णीतवचाः, सा. (ऋ १, ६६, ५) प्रभृ. √अस् (क्षेपणे) इत्येतमुपयुञ्जानाः, WW २, ३३४ √*नस् इत्यतः व्यु. पश्यंस्तदादिनकारलोपमिव संकेतुकः संश्चिन्त्यः (मौस्थि. अकारादेश्च नकारादेश्च धा. समानमूलभूतस्य √*अर् इत्यस्याऽननुनासिकादितया सानुनासिकादितया चोच्चारणद्वैस्वाभाव्यं तदधीनश्चान्यतोऽकारादेश्चाऽन्यतो नकारादेश्च धा. पारिणामिकः प्रादुर्भाव इति कृत्वा तयोः परस्परं सानाभ्यं न तु जन्यजनकभाव इत्यभिसंधेः):] ।

[g] पाठः? इहैवाश्विनोर् अस्तं स्यात् इत्येवं ३यः पादः सु-शोधः, वकारोपक्रमश्च त्रुटिताक्षरयुग्मश्च ४र्थः पादो भूयोविमर्शसहः द्र. ।

[h] सपा. °स्तम् <> °स्ता इति पाभे. ।

[i] पाभे. अश्व शौ २०, १३६, ५ द्र. ।

[j] सपा. ऋ ८,९६,२ अस्त्रा इति पाभे. । पाठः? अस्ता ⌊न. प्र३⌋ इति शोधः संभाव्येत (तु. प्रकरणम्) ।

[k] स्वार्थे कन् प्र. उसं. (पा ५,४,२९) । नित्-स्वरः ।

[l] सकक्ष-विशेषणान्तरसाम्येन करेऽर्थे तातिप् प्र. उसं. [पा ४,४,१४३; (तु. दुक्ष-ताति- ; वैतु. सा. करेऽर्थे PW. प्रभृ. च स्वार्थे तातिलम् प्र. इच्छन्तो लित्-स्वरस्य ⌊पा ६,१,१९३⌋ अभावं प्रति पर्यनुयोज्याः)] ।

[m] मूलतः द्वि१ सद् मान्तम् अव्य. इति व्यवहारमुपैति । तदेतत् स. पूप. सत् उप. प्रति मौस्थि. क्रिवि. इति कृत्वा तत्-संबद्धं सत् ग. इति कृत्वा व्यवहार्यते (पा १, ४, ६८) ।

[n] विप. (सूर्य-) । गस. शत्रन्ते कृत्-स्वरः प्रकृत्या ।

[o] विभक्तिरुदात्ता भवति (पा ६, १, १७३) ।

अस्तमि(मू-इ)त[a]- -ताय शौ १७, १, २३; पै १८, ३२, ७.

अस्तमे (मू-ए) ष्युत्[b]- -ष्यते[b] शौ १७,१, २३; पै १८, ३२,७.

अस्तमी(मू-ई)कु[c]- -के ऋ १. १२९,९.

?अस्तनयन्न्[d] पै १३, १४,४.

¶अ-स्त(न>)ना[e]- -नाः मै ४,१,१४.

?अस्त(र्यं>)र्या[f]- -¶र्या मै १, ५, १०; -र्याः[g] पै २,२३,५.

अस्तवे, अस्तवै, अस्ति- √अस् (क्षेपणे) द्र.

अ-स्तुत,ता[h]- -तः ऋ ५,६१,८;६७, ५; काठ ७, १०¶; क ५, ९¶; -तम् खि २, ७, ४; मै ३, ८, १०¶; -¶तया तै ७, ५, ८, ४.

*?अस्तुर्-मिश्[i]- -शम् शौ १९, ७,१.

अस्तृ- √अस् (क्षेपणे) द्र.

अ-स्तृणत्- -णन् काठ ३६,१२.

१अ-स्तृत,ता[j,h]- -०त शौ १९,४६, २[k]; पै ४, २३, २; -तः ऋ १, ४१, ६; ६,१६, २०; ८, ९३, ९; १५; ९,२७,४; मै २, १३, ६†; काठ १२,३¶; २०,१४†; ३७, १५; १६; ३९, १२†; †कौ २, ५७४; ६१३‡[l]; ६३९; ६७४‡[m]; †जै ३,४६,१२; ५०, १‡[l];५१,५;५६,२‡[m]; शौ १९, ४६, १-७; †२०,४७,३;१३७, १४; पै ४, २३, १-७; ६, १२, ५; ६; १९, ४६, १[n]; -तम् ऋ १, ४, ४; १५ ५; १४०,८; ८,१, ११; ६६, १०; ९, ९, ५; १०,४८,११; तै ३, २, ६, २[o]; कौ १, २२९†; जै १, २४, ५†; शौ १९, ४६,१; २०,६८,४†; पै ४,२३,१; -ता तै ४,२,९,१[n]; -ते शौ १९,४६, ५; पै ४,२३,४.

अस्तृत-यज्वन्[p]- -ज्वनः ऋ ८,४३, १; -ज्वा खि ५,५,१०.

---

a) विप. (सूर्य-)। सस्व. कृते तु. टि. अव-गत-।

b) तु. टि. अस्तं-युत्-,-यते।

c) व्यु. ? भाप. (अन्तिक- ⌊तु. २उपाकु-, प्रतियोगिपदं पराकु- चेति⌋)। गस. अधिकरणे घञन्ते थाथादि स्वरः (पा ६,२, १४४)। उप. √*ईक् मौस्थि. √*ऋ इत्यत्र लब्धमूलः सन् √*इर्क् इत्यस्य नैप्र.विपरिणाम इति मतम्। यद्वा समस्तस्य धा. अनङ्गीकारे सति यनि. रूपे अस. सास्व. च सुपोऽलुकि सप्तम्याः स्थाने वैकल्पिकोऽम्भावाऽभावश्च (पा ६, १, २२३; २, ४, ८४ द्र.; तु. सव्यु. अभीक-, प्रतीक-, समीकु- यत्र स्वरभेदतः स. व्यवस्थेयस्तत्पर उक्तचरे प्रकरणे ⌊तु. टि. अभीक-⌋ प्रकृतया दिशा विशेषाधानपरः शोधश्च द्र.; वैतु. दे. ⌊२, १६⌋ अस्तं √मा⌊माने⌋+ कीकन् प्र. उसं. ⌊पाउ ४, २६⌋ इति कृत्वा धा. लोपं ब्रुवाणो नित्-स्वरस्य ⌊पा ६,१, १९७⌋ अभावं चाऽन्यथा-सिद्धस्य धा. कल्पनां च प्रति पर्यनुयोज्यः)।

d) तु. सस्थ. टि. ?उरपाम्।

e) विप. (प्रजा-)। बस. अन्तोदात्तः (पा ६,२,१७२)।

f) व्यु.? अ+√स्तृ (हिंसायाम्) >स्तर्य- (तु. पाम ३, १, १२३) इति कृत्वा तस. कृत्य- (पा ६, २, १६०) इत्यन्तोदात्ते प्राप्ते स्वरितः उसं.। अथवा (√अस् ⌊*दीप्तौ⌋ >भावे) *अस्- +(√तॄ ⌊*धरणे⌋> कर्तरि) *तरि- इति स्थिते उस. कृत्-स्वरः प्रकृत्या (पा ६, २, १३९)। *अस्तरि- इत्यतः प्रागिवीये उसं. (पा ५, ३,७) कपि प्र. निष्पन्नस्य सतः *अस्तरि-क- इत्यस्य नैप्र. विपरिणामः स्वरसंक्रमः (पा ८, २,४) चेति दिक्।

g) °र्या इति पाठः? यनि. शोधः (तु. विप. शरदः इति)।

h) तस. नञ्-स्वरः। उप. कर्मणि क्तः प्र.।

i) 'अस्तूर्भिः (=स्तूर्भिः ⌊=स्तृभिः⌋) मिशति' इति कृत्वा उस. क्विबन्ते कृत्-स्वरः प्रकृत्या। एस्थि. चतुरक्षरतया छन्दो नाक-विशेषणतया चार्थः सुसंगतः (तु. वैतु. ता. ⌊७४⌋ तुर् ⌊=स्तृ-⌋ विशम् इति शोधमुखः, RW. च अष्टाविंश->-शम् इति पठन्तौ यद्र.)।

j) विप. (⌊अहिंसित-⌋ मर्त्य- प्रभृ.), नाप. (मणि-विशेष-⌊शौ १९,४६,१-७⌋)।

k) मूको. अस्तृत। इमम्। इति पपा. भवति। यत्त्वत्र शंपा. अस्तृतः इति शोधम् इष्टवान् तद् अनपेक्षितमिव भवति। वाक्यादित्वात् षाष्ठिकस्याऽऽमन्त्रिताऽऽद्युदात्तस्य (पा ६,१,१९८) सूपपदत्वोपलम्भात्। एस्थि. आष्टमिकमामन्त्रितनिघातमिव (पा ८, १, १९) श्रावयन्ताविह RW. अपि चिन्त्यौ द्र.।

l) सपा. ऋ ९, ३, ८ अस्पृतः इति पाभे.।

m) सपा. ऋ ९, ६७, २ विशिष्टः पाभे.।

n) पाभे. आस्तृता द्र.।

o) पाभे. अक्षितम् मा ३८,२६ द्र.।

p) विप. (अग्नि-)। बस. पूप. प्रकृतिस्वरम् (पा ६,२,१)।

२अ-स्तृत[a,b]- -तः शौ १,२०,४‡[c]; ५,९,७.

¶**अ-स्तृति**[d]- -त्यै मै २,१,७.

¶**अ-स्तोमभाज्**[e]- -भाजः मै ३, ९, ४; ४, ७, १; काठ २८, ७; क ४४,७.

अस्त्र[f]- -स्त्रम् शौ ११, १२, १६; पै १०, ११, ८; -स्त्रा पै ९, २५, ५; -स्त्राणाम् पै ५, ३७, १.

अस्त्र-बुध्न- > **आस्त्रबुध्न**[g]- -ध्नाय ऋ १०,१७१,३.

अस्त्रा(स्त्र-आ)खण[h]- -णम् पै ९. २५,५.

?**अस्त्राम्** पै २०,१८,१०.

अ-स्त्रैण[a]- -णाः शौ ८, ६,१६; पै १६,८०,७.

?**अस्त्वा** √अस् (क्षेपणे) द्र.

अस्थन्[i]- -स्थन् मै ४, २, १३; -†स्थभिः ऋ १, ८४, १३; तै ५,६,६,३; ७, १८, १\$; मै २,१३,६; काठ ३९, १२; ५३, ८\$; कौ १, १७९; २, २६३; जै १, १९, ५; ३, २२, १०; शौ २०, ४१,१; -स्थभ्यः मा २३, ४४[j]; ३९, १०^{२}[k]; का २५,८,६[j]; ३९, ८,१^{२}[k]; तै ५, २, १२, २[j]; ७, ३, १६, २[k]; काठ ५०,६[j]; -¶स्थानि तै ४, ७, १, २\$[l]; ५, ६, ६, ३; ६, २,८, ५[m]; ६[m]; ७, ५,२५, १; मै २, ५,२; ११,२\$[l,n]; ३,८, ५; ६; ९, ६; काठ १३, २; १८, ७[l]; -स्थ्नः[o] शौ ४, १२, १; पै ४,१५, ४; -¶स्थ्ना[o] तै ६, ५, २, २; मै ४, ६,६; काठ २८, १¶; ३८, १४; पै ४, १५,२. [°स्थन्- अन्°, पुरुष°].

अस्थ- अधि°, अन्°, पुरुष°.

अस्थन्-वत्[p]- -वते तै ७, ५, १२, २; काठ ४५, ३; -¶वन्तः तै ६, २, ८, ५; मै ३, ७, ५; ८, ६; काठ २४, ५; क ३७, ६; -वन्तम् ऋ १, १६४,४; मै २, ३, १¶[q]; काठ १२, १¶[q]; शौ ९, १४, ४†; पै १६, ६६, ४†.

¶**अस्थन्वती**- -तीः तै ६, १ ७,१^{२}.

?**अस्था**[r] ऋ १०,४८,१०.

?**अस्थापू**[s] पै ११, १,८.

---

[a] बस. अन्तोदात्तः (पा ६,२,१७२)।

[b] उप. भावे क्तः प्र.।

[c] पाभे. अद्भुतः ऋ १०,१५२,१ द्र.।

[d] तस. नञ्-स्वरः।

[e] विप. (ऋतु-)। तस. नञ्-स्वरः। उप. स्तोम- + √भज्+ण्विः प्र. (पा ३,२,६२)।

[f] नाप. (इषु- प्रभृ.)। √अस् (क्षेपणे) + त्रः प्र. उसं. (पाउ ४,१६७)। तत्-स्वरः।

[g] व्यप.। अपत्येऽर्थे अण् प्र. (पा ४, १, ११२)। तत्-स्वरः।

[h] उप. मौस्थि. <आ√*क्षृ इत्येवं व्याचिख्यास्यमानं सत् यद्र. (तु. टि. वैप३ अपि)।

[i] व्यु. ? *अस्- (तु. टि. १अस्थि-) + (√*स्थृ ⌊स्थैर्ये⌋ > *स्थर्- >) *थर्- इति स्थिते तस. सास्व. (पा ६, १, २२३) *अस्थर्- (तु. *अष्ठिर्-) इति पूप. (√*भृ भरणे > *भर्ण्- >) *भन्- इति उप. चेति कृत्वा बस. पूप. प्रकृतिस्वरम् सतः (*अस्थर्भन्- >) *अस्थमन्- इत्यस्य यनि. विपरिणामः स्यात्।

[j] पाभे. अङ्गेभ्यः शौ १,१२, ४ इत्यत्र अस्थभ्यः मज्जभ्यः इत्यस्यापि समावेशः द्र.।

[k] सपा. काठ ४३,६ अस्थिभ्यः इति पाभे.।

[l] सपा. मा १८,३ प्रभृ. अस्थीनि इति पाभे.।

[m] सपा. काठ २५,६ प्रभृ. अस्थि इति पाभे.।

[n] अस्थानि इति पपा. सात. च ?

[o] अल्लोप उदात्तनिवृत्तिस्वरः (पा ६,४,१३४;१,१६१)।

[p] सस्व. कृते तु. टि. अक्षण्वत्-।

[q] सपा. तै २,३,१३,२ आत्मन्वन्तम् इति पाभे.।

[r] *अस्थ्- [= ⌊√अस् >⌋ *अस्- इति पूर्वांशो हिंसा-दीप्त्यन्यतरपर्यायः, *थ्- इत्युत्तरांशश्च *तर्- (<√तॄ) इत्यस्य *त्र- > *त- इत्येतद्-द्वारकः नैप्र. विपरिणाम इति कृत्वा वज्रपरः समुदितोऽर्थः द्र] इत्यस्येन्द्रकर्तृकाविष्करणे साधनवचनस्य सतः तृ१ सावेकाचीयः स्वरश्च (पा ६, १, १६८) संभाव्येत (वैतु. सा. अर्थतो नेदीयानपि सन् √अस् ⌊क्षेपणे⌋ इत्यतः व्यु. ब्रुवाणो भिन्नप्रस्थानः, उद्गी. १अस्थि- इत्यस्य द्वि३ इति, GW. ORN. NW. MVG. ⌊२५२, ४२८⌋ च अस्थन्-, १अस्थि-, नञ्-पूर्वः √स्था इत्याद्यन्यतममूलतया वा, था-प्रत्ययान्ततया वा व्यु. संकेतुकाः सन्तः स्वरूपमात्रतः यनि. अपि प्रदर्शयन्तः)।

[s] पाठः ? दृग्भ्रमाद् द्वितीयपादौपक्रमिकत्र्यक्षरीप्रयुक्तं लिपिप्रमादमात्रमानुष्टुभयोः पादयोर्मध्येऽन्तर्गड्डयमानं सदपाकरणेनैव सु-शोधं द्र. (तु. आपमं १, १३, १)।

१अस्थि[a]- -स्थि मा १९, ८२; २०, १३; का २१, ६,३;७,१४; ¶तै २,६,३,४; ३, ४, १, ४; ५,२, ३.७; ७,४,९,१; मै ३,३,३¶; ११, ८; ९; ४, १,९¶; ¶काठ १३, १०; २०, १^{२}; २१, ४; २५, ६[b]; ३१, ७; ३४, ११; १२; ३८, ३;४; ¶क ३१, ३^{२}; १९; ३९, ४[b]; ४७, ७; शौ ४, १०,७; १२,३; ४[c]; ५; १०,९, १८; ११, १०, ११; २९; पै ४, १४, २; १५, २; ५; २५, ७; ७, ७, ४; १४, ३, २९; १६ ५३,१३; ६१,७;८;८६,२; ८७, १०; -स्थिभ्यः काठ ४३. ६[d]; पै ४,७,५; -स्थिषु पै १६, १४९,४; -स्थीनि मा १८, ३[e]; का १९,२,३[e]; क २८. ७[e]; शौ ९,५,२३; ११, १०, १२; १२, ११, ९; पै १६,८६, १; १००, १; १३७, ८. [°स्थि- अन्°, रुधिर°].

अस्थि-चित्[f]- -चित् मै ३, ५,१. [°चित्- अन्°].

अस्थि-ज[g]- -जम् पै १, २६, ४; -जस्य शौ १, २३,४; -जाः पै ९,६,१०.

अस्थि-भूयस्[h]- -यान् शौ ५,१८, १३; पै ९,१७,४.

अस्थि-स्रंस[i]- -सम् शौ ६, १४, १; पै १९,१३,७.

?२अस्थि[j]- -स्थिभ्यः शौ २,३३,६.

¶अ-स्थि(त>)ता[k]- -ता मै ३, ४,६.

?अस्थिवांस[l]- -सेभिः पै ९, २५, ९.

¶१अ-स्थूरि[m]- -रिः तै ७,१,१, १; -रिणा तै ७,१,१,२.

†२अ-स्थूरि[n]- -रि[o] ऋ ६, १५,१९; मा २. २७; का २, ६, ७; तै ५, ७, २, १; मै १, ४, २; ४, १४, १५; काठ ५, ५; ७, ३; २२,६$;४०,२; क ५, २; ३४, १$; शौ २०,१३०, १९$[p].

अ-स्थेयस्[q]- -¶यसः तै ५, २, ६, २; काठ २०, ४; क ३१, ६; -†यसाम् ऋ १०, १५९, ५; पै २.४१,५.

अ-स्नातृ[r]- -ता ऋ १०, ४, ५; -तारा ऋ ४, ३०, १७; -तॄन् ऋ २,१५,५.

---

a) व्यु. ? तु. WW १, १५८ उ । √अस् (क्षेपणे)+क्थिन् प्र. नित्-स्वरश्च (पाउ ३,१५४; पा ६, १, १९७) इति संप्रदायः। मौस्थि. तु (√*अस् ⌊हिंसायाम्⌋>) *अस्- (=तैक्ष्ण्यविशिष्टत्वे सति हिंसाकर्तरि पाषाणादौ तात्पर्याद् *अश्- इत्यस्य पर्यायश्चाऽऽद्यकारतः अद्रि- इत्येतेन सागोत्र्यभाक् च द्र.)+(√*स्थृ ⌊स्थैर्ये⌋ >भावे *स्थिर्->*स्थि->*स्थि->) *थि- इति स्थिते बस. पूप. प्रकृतिस्वरम् (तु. टि. *अष्ठिर्-, अस्थन्-)।

b) पाभे. अस्थानि तै ६,२,८,५ द्र. ।

c) पाभे. असन्-> -स्ना पै ४,१५,३ द्र. ।

d) पाभे. अस्थभ्यः मा ३९,१० द्र. ।

e) पाभे. अस्थानि तै ४,७,१,२ द्र. ।

f) उस. क्विबन्ते कृत्-स्वरः प्रकृत्या ।

g) उस. उप. √जन्+डः प्र. (पा ३, २, ९८)।

h) विप. । बस. पूप. प्रकृतिस्वरम् (पा ६, २, १)।

i) विप. (⌊अस्थि-च्यावक-⌋ बलास-)। अण्णन्ते कृत्-स्वरः प्रकृत्या । j) पाप्र. क्थिच् प्र. उसं. (पाउ ३.१५४)। चित्-स्वरः इति कृत्वा मौस्थि. तस. सास्व. सतोः नापू. रूपान्तरमात्रतया सुवचत्वेऽप्यस्य सत्तां प्रति संदेहः । नापू. सरूपस्य श्रुतिसुभिक्षेऽप्येतस्य श्रुत्यन्तरस्य नितरां दुर्भिक्षात् । एस्थि. मज्जन्-, स्नावन्- इत्येतयोरन्नन्तयोः सतोरानुपदिकात् साहचर्यात् मूको. अपुष्टेऽपि सति अस्थन्-> -स्थभ्यः इति शोधः सावसरः संभाव्येत (वैतु. MVG २८७, <१अस्थि- इति)।

k) विप. (श्री-)। बस. अन्तोदात्तः (६,२, १७२)। उप. भाप. द्र.।

l) पाठः? प्रकरणतः अस्थिमांस- इति शोध. सूहः द्र.।

m) विप. । [(आ+⌊√स्था>भावे⌋ *स्थूरि->बस.) *आ-स्थूरि- (सम्यक्-स्थिति-मत्- ⌊शकट-⌋)] > नैप्र. यनि. इति मतम् (तु. ⌊अंशतः⌋ PW. प्रमृ.; वैतु. भा. =अन्यून- ⌊=ज्योतिष्टोम-⌋ इति)।

n) नाप [अनेकाश्वयुक्त-रथ-, (उपचारात् धन-धान्यादि-संपन्न-) गृहैश्वर्य- इति वें. सा. उ. म.; वैतु. भा. स्थौल्य रहित- इति ?)]। आ√स्था>गस. (कर्तरि) *आ-स्थूरि-(आस्थातृ-)>नैप्र. यनि. इति मतम् ।

o) गार्हपत्यानि इत्यन्वितं प्र३ इति भा. सा. GW. प्रमृ. ? वा. क्रिवि. इत्येव तु मतं पुष्टं भवति ।

p) तु. RW.; वैतु. शंपा. प्रमृ. अस्थिरः इति मुपा. चिन्त्यः । सपा. खि ५,१,५,१० भिन्नः पाठः द्र. ।

q) विप.>नाप. । तस. नञ्-स्वरः । उप. <√स्था कर्तरि कृत् । पाप्र. <स्थिर- (पा ६,४,१५७) इति ।

r) तस. वैभाषिकोऽन्तोदात्तः (पा ६, २, १६१) ।

अ-स्नावुक[a]- -काय तै ७, ५,१२,२; काठ ४५,३.

अ-स्नाविर्[b]- -रम् मा ४०, ८; का ४०,१,८.

?**अस्नाहि** पै ७,५,१०[c].

अ-स्पन्दमान[d,e]- -नः ऋ ४, ३,१०.

अ-स्पृत[d]- -तः[f] ऋ ⌊(८, ८२, ९)९, ३, ८⌋; -तम् ऋ ⌊८, ८२, ९; (९,३,८)⌋.

अस्मत् अस्मद्- द्र.

अस्मथत्वसुपधिर्[g] पै १,९८,४.

अस्मद्-

अस्म- -स्मभ्यम् ऋ १,७, ६;१०, ८; १७,८; २४, १४; ३४, ३; ४८,९; ६३,८; ७९, ५; ८१,६; ८५,१२; ९०,३; ⌊९२,१३; ४, ५५,९; (९, ७४, ५)⌋; ⌊१०२, ४; ६, ४४, १८⌋; १०८, १३; १११, ३; ११४, ५; ११७, २; १३२, ४; १४०, ११; १५९, ५; १७०, ३; १७६, ४; १८७, ११; १८९, ३; २, ११, १९; ⌊१३, १३;१४, १२⌋; १८, ८; ३८, ११; ४०, ४; ३, ३०, २१; ⌊२१ (३१, १४; ४, २२, १०)⌋; ३६, ९; ५०, ३; ५४, ११;५७,६;६२,१४;×× मा ३, ३८; ४, १२; ८, ६†; ९, २३; ११, ८०; १५, ३६†; १७, ४; ५;७; ११; १५; २५, ४६‡[h]; २७, ६; २९, ४८†; ३४, ३३†; ३६, २०; का ३, ४; २; ४, ५, ४; ८, ३, १†; १०, ७,१; १२, ७, १५; १६, ५, १८†; १८, १, ५; ६; ८; १२;१५; २७, १५, १‡[h]; २८, १२, १^{२}†; २९, १,६; ३१, २, ८†; ३३, २, २†; ३६, १, २०; तै १, ४, २३, १†; †५, ११, ३; ५ ; ७, १०, १; १३, ३†; ८,६, १; २.२, १२, २†; ४, ५,२; ६, १२, २‡[i]; ३, ५, १, २; ४, १, ७, ३; १०, ३; ४, ४, ५†; ६, १, १^{२}; ३^{२}‡[j]; ५; ६, ४†; ५, ४, ४, ५; ७, ४,१७, १†; मै १,४, १; १०, ४; ११, ४; २, २, ६; ७, ७; १०, १^{५}; १२, ३; ५; १३,८†; ३, १,९; ३,६¶; ४,९¶; १६, ३†; ४,९, ६; १०, ४^{२}†; १२, २†; ३; †१४, १; ३; ५; ८^{५}; ११; १२$; १७; काठ ५,३;६, १०†; ७,१२;१६†; ८, १७†; ९, ६; ७; १३, १५^{२}; †; १४, २; १६, ७; १७, १७^{५}; १९†; १८, १६; १९.१०;२६,११^{२}†; ३७,९; ३९, १५†; ४०, ८†; ११†; ४४, ६†; ४६, १†; क ८, ९; १०; २८, १^{५}; २९, ४; ३०, ८; †कौ १, १०$; ८१; ११८; ३१७; ५४८; ५७५; २, १८२; २२१;२७६;३४६;३९६; ४५१; ४५३; ४६२‡[h]; ४८६; ७६०; ७८७; ९०१; ९१२; ९७१; १०८१; †जै १, १, १०$; ९, १; १५, ४; ३३, ५;५६, ६; ५८, १०; ३, १७, ३; २०, ३; २३, ८; २९, ३; ३१, १६; ३४,९; ११; २०‡[h]; ३७, १; ४, १४, ५; १५, ५; ३०, १; शौ १, १६, १; १८, २[k]; २६, २; २,६, ५; ३, ५, ३; ८, १; १२,५; ४, १८, ६; ३१, ७†; ५, ३१, ११; ६, ९२, ३†; ११०, १†; ××; पै १, १८, १ ; ४२, ४ ; ४५, ३ ; ५१, १ ; ३ ; ९५, ४?[l] ; ३, १०, ५; ३३, ६; ३६, ५†; ४, १२, ७†; ५, ४, १३; २४, ५; ३९, ४†; †६, ३, ४; १६, ११; १०,९,१०†; १२, ३,७; १३,८, १६†; १५, ११, २†; १६, १०, ४†; २४, ६;२६,२; ७६, ३; ९८,९; ××;

-स्मान् ऋ १,९,६;१७,७;२४, १२; ३१,१८; ⌊४७,५;(८,५९, ३)⌋; ८१,३;८४, २०; ९५, ९; ९८, ३; १०९, ७; ८; १११, ५; ११२, २५; १६५, १४; १७४, १; १८९, १; २; २, ⌊१, १६; २, १३⌋; ११, १५; २८, १०; ३०, ५; ६; ८;३९, ४; ३, ८, १०; ३३, ६; ५३,

---

उप. √स्ना+तृन् प्र. । यद्वा उप. भाप. इति कृत्वा नञ्-पूर्वे बस. अन्तोदात्तः द्र. ।

[a] सस्त्र. कृते तु. टि. अ-चर्मक- ।

[b] बस. अन्तोदात्तः (पा ६,२,१७२) ।

[c] स्नाहि इति मूको. ।

[d] तस. नञ्-स्वरः ।

[e] उप. < √स्पन्द् ।

[f] पाभे. अस्तृतः कौ २, ६१३ द्र. ।

[g] अस्मद् अथ त्व् असूपधिर्''' इत्येवं शोधः संभाव्येत ।

[h] सपा. ऋ १०, १५७, ३ अस्माकम् इति पाभे. ।

[i] सपा. ऋ १०, १५, ४ नः इति पाभे. ।

[j] सपा. ऋ १०, १४२, ७ विशिष्टः पाभे. ।

[k] पाभे. अदित्यै पै २०, १७, ९ द्र. ।

[l] शोधस्य कृते तु. सस्थ. टि. ?प्रहुतेषु ।

२०; ६२, ३^{१}; **४**, ४, १५; ९, ८; ××; खिं **१**,६,५; **२**, ७, १; ८, १; **३**,९,७; **४**,५, ३; १६; २०; **७**,७, ४; मा **१**, ८; २५; २६^{२}; **२**,१०†; १५^{२}; २५^{३}; **३**, ३६†; **४**,२†; ५,७; ३६†; **६**, २२; **७**,४३†; ८,४४†; **११**,८०; ××; का **१**, ३, ४; ९, ३; ४^{२}; **२**,२, ९†; ४, १^{२}; ६, ३^{३}; **३**, २, ७; ३,२८†; ९, १; **४**, १, २†; **५**,२,६; ९,२†; **६**, ५, ४; ८, १८,१†; ××; तै **१**, १, ४, १; ९,१;२^{१}; †१४,३;४;२, १, १†; ५,१; १४, ६†; ३,१, १; ९, २; ११,१;४,४१, १; ४३, १†; २; ४५, ३; ६, ३, २†; ६, ४; १२, ३†; **२**, ६, १२, ३†; **३**. १, ९, १; २; २, ५, ४†; ××; मै **१**,१,४; १०^{३}; २, ६; १३†; १८; ३, ३; ३६; ३७;४,१†; ५,२^{५};४^{४};†; ११^{२}; १३†; ६,१; १०,१६^{२}¶; **२**,४, ३^{२}†;७;७,१२;९,२^{२}; १०,४†; **३**,१६,४^{१};५†;××; **४**,९,१२[a]; ११, २‡[b];××; काठ **१**,४; ९^{१}; **२**,१†;७; १५†; **३**,१†;८;१०; **४**,९; १३[c]; **५**,२†; ५; **६**,९^{५}; १०†;११†; ××; क **१**,४; ९^{१}; १३†; **२**, ८†; १५; १७; **३**,७; ११[c];**४**,८^{५}; **५**,२^{४}; †;५; **६**,२; **२५**,३; **२७**,१^{२}; **२८**,५†; **३०**, ८; †कौ **१**,२३९;३१९; ४१४; **२**, २१३; ३५४; ४४२; ६५५; ७३१; ७७१; ७७२; १०७४; ××; शौ **१**,१,४; १९, ३; २१, २†; २९,१†; **२**, ११,३; १९–२३, १–५; ३५, ४; **३**, १, ३; २, ६; २७, १–६; **४**,१०, ५; १९,५;४०,१-८;**५**,६,८‡[b];९; **६**, १९, ३‡[d]; ××; पै **१**, ३६, १-३;५७,३;६३,५;६५,१;८६, ३; ८८, ४; ९७, १; १००, ३; १०८, १; ३; ११०, २; **२**, १६, ४; ४८, १–५; ८८, ३†; **३**, ५, ६; ६, ३; २४, १–६; ××; **६**, ११, १०‡[b];

-स्मान्ऽ-स्मान् ऋ **४**, ३२, ४;

-स्माभिः ऋ **१**, ११३, ११; **३**, ६२, ७; **६**, ३४,२; **८**,८१, ८; **१०**, ३८, ३; ११२, ३; खि **४**,५, ४; १६; ३६; तै **१**, ४,३३, १†; शौ **६**, १२२, १; **१२**, ३, ४२; पै **२**, ६०, २; **१६**, ५१, ५; -स्माभिः पै **१७**, ४०,२;××; -स्माभ्यः[e] पै **३**,३९, २?; –स्मासु ऋ **१**, ४८, १२; ६४, १५; १२३, १३^{२}; १३९, ८; **२**, २, ६; ⌊२३, १५; (**१०**,३७, १०)⌋; **४**, ५१, १०; ५७, २; ८; ५८, १०; **५**, ४, १०; **६**, ७,३;४७, ६; **७**, ७७, ६; ८,४७, १०; ५९, ७; **१०**, ५९, ५; ६; ८३, ४; १४४, =; खि **१**, ६, ७; **५**, १, २; मा **८**, ५१; **१७**, ९८†; **१९**, ४८; **२६**,३†; **३७**, २०; का **९**, ६, ३; **१९**, १,११†; **२१**, ३,१९; **२८**,२,१†; तै **१**,१, १४, ३†; ४,४६,१†; ६, ३, २^{२}; ४, ३; ८, २२, ३†; २, ३, १४, ४; ४,१२,४¶;५¶;७¶;××; मै **१**, २,३‡[f]; ××; काठ **३**,१०; **४**, १५†;१६^{२}†; **५**,२; **६**,८; **९**,६; ८; **१०**, १२; १३; **२९**,२; **३०**, ४†;**३२**,२; **३३**,१;**३८**,२;**४०**, ७†; ११†; क **२**, १७; **४**, ७; ८, ९; ११; **४५**, ३; **४६**, ७†; शौ **४**, ३२,४†; **५**, ६, ८; **६**, ८४, २; **७**, ५, २; ५४, १; ८१, २†; ८७, १†; ××; पै **१**, १०६,६; १०९, ४‡[g]; **३**, ३०, २; ५; **४**,३२,४†; ३४,५; ××;

-स्मे[h] ऋ **१**, ९, ७; ⌊८; ४४, २; ८,६५,९⌋;२४,७; ⌊३०,२२; **१०**, २४, १⌋; ३४, ४; ३८, १५; ४३, ७; ४६,६; ४७, ६; ५४, ११; ७१, २; ७२, २; ७४, १; ७९, ४; ९२, १४; ९३, १२; १०२, २; ११२, २४; ११३, १७; ११४, ९;१०; ११७, २३; **२**, ३५, ४[i]; ××; **६**, ७४, ३[g]; **७**, १०१, ५[j]; ९,६३, १[k]; **१०**, ७, ४?[l];

---

[a] तु. सस्थ. टि. अन्तु॒र् ।

[b] सपा. ऋ **६**, ७४, ४ विशिष्टः पाभे. ।

[c] सपा. मै **१**, ३, ३९ युष्मा॒न् इति पाभे. ।

[d] सपा. ऋ ९, ६७, २५ मा॒म् इति पाभे. । तैब्रा **१**, ४,८,२;४ इ॒दम् इति पाभे. ।

[e] पाठः? परमाऽस्मभ्यं नः इत्याकारकः शोधो विमृश्यः ।

[f] सपा. ऋ ८,११,१ प्रभृ. विशिष्टः पाभे. ।

[g] पाभे. अन्तर् पै **१**,१०९,४ द्र. ।

[h] शे प्र. (पा **७**, १, ३९) प्रगृह्यत्वप्रयोजकः (पा **१**, १, १३ ⌊वैतु. टि. अस्मे॒-हेति-⌋) ।

[i] पाभे. अ॒ग्निः तै **२**,५,१२,२ द्र. ।

[j] पाभे. अस्मै काठ **२०**,१५ द्र. ।

[k] सपा. जै **१**, ५२; ५ ?अस्मै॒ इति पाभे. ।

[l] अस्मै॒ इति शोधः ।

१८, ९[a]; १९, १[b]; २२, २; १२; १३[c]; ८४, ३[d]; खि ३, ३, १०^{२};६,२; २२, ९; मा ३,११†; ४,२२^{२}; २६; ८, १८[e]; ३८†; ९, २२^{३}; २५; १०, ३०; १२, २९†; ५१†; ६९‡[f]; ××; २७, २०‡[g]; का ३, ३, १†; ४, ७, ३^{३}; ९, १; ८, १३, १†; ९, ३,४[e]; १०, ४, ४^{३}; ५, २; ××; १३, ५,८‡[f]; २९, २, १०‡[g]; †तै१,२,५,२\$;७,१^{२};१४,४;३, १४,८;४,४४,२\$[e]; ५,५,१;२; ६, ६, २; ७, १०, १\$; १३, ५; ८,२२,५[h]; २,२,१२,३;××; ४,१,८, ३‡[g];××; मै १, २,४^{२}; ५^{२}; ६; ३,३८[e];५,१^{२}†; २, ७, ८‡[i]; ९†; ११†; १२‡[i];××; ४,११,२[h]; काठ२,५^{२};६^{२};८;३, १;४,१२[e];१५†;××; ११,१२[h]; १६, ८‡[i]; ××; १८, १७‡[g]; २०^{३}; १९, ११‡[i]; क १,१८^{२}; १९^{२}; २,२; ८; ३, १०[e]; ४, ८†; २५,२†;५†; १०; २६, ५; २९,२†;५‡[g]; ३१, १‡[i]; ३७, ५^{१}; ७^{२}; †कौ १, ७६; ९९; ५०१[j]; २, ५५३; ७२९; ७५१; ८७०; ९११; ××; †जै १,८, ४; ११,३; ३,४३,९;४,३,१०; ११, ९; १२, ७; १५,४; १९ २^{२}; २१, ९; शौ ४, २१, १†; ५, १, ३; १८, †१, ३; ४२; ४,४६; १९, ४०, ४†; †२०, १३, १; ७१, १३; १४; ८९, ६; ७; ९४, ५; ११९, २^{१}; १४३, ६; ७; पै १, ५४, १; ४, १२, ३†; ६, २, ३; ९ १,१०‡[g]; १२, ६, १४†; २०, ४, ५; ६,६†;४०,६;७.

†**अस्म-त्रा**[k] ऋ १, १३२, २; ⌊१३७, १; ३⌋; ४, ३२, १८; ४१, १०; ८, १८, १४; ६३, ४; १०, ४८, ३; शौ २०, ९४.३.

अस्मत्रा(त्रा-अ)ञ्च्[l]- -त्राञ्चः ऋ ६,४४,१९.

अस्म-द्रुह्[m]- -ध्रुक् ऋ १, ३६,१६; १७६,३; ८,६०,७.

✓***अस्मयु**[n]- > **अस्मयु**[o]- -यु ऋ १०, ९३, १४; -†युः ऋ १,१३१, ७; १३५, २; ⌊२; (७,९०,१; ८, ८२,५)⌋; १४२, १०[g]; ३, ४१, ७; ४२, १; ५, ७४,८; ६, ४८,२; ⌊७, १५,८; ८, १९, ७⌋; ७०, १२^{२}; ९ २, ५; ६,१; १४,८;६४,१८; ७८, ५; १०,९३,११; मा २७, ४४; का २९, ५,१२; मै २, १३, ९; काठ ३९, १२; कौ १, ५०६; २,५४; ३९१; जै १, ५२, १०; ३, ५, १३; ३१,११; शौ २०, २३, ७; २४, १; -युम् ऋ २, २३,८; मा ११, १३; का १२, २, २; तै ४, १, २, १; मै २, ७, २; काठ १६, १; -यू ऋ १.१३५,५; १५१, ७; ७, ७४,

---

[a] सपा. शौ १८,२,५९; ६० सह इति पाभे. ।

[b] सपा. पै १९,२१,१४ **अस्य** इति पाभे. ।

[c] ***अस्मभ्य**>नैप्र. यनि. इति कृत्वा छन्दस्तः तत्परः शोधः द्र. (तु. सस्थ. टि. उपस्पृशः) ।

[d] सपा. शौ ४,३१,३ **अस्मै** इति पाभे. ।

[e] सपा. शौ ७, १०२, ३ **अस्मै** इति पाभे. ।

[f] सपा. ऋ ४,५७,८ तै ४,२,५,६ काठ १६,१२ प्रभृ. त्रिभे. । शौ ३,१७,५ **अस्मै** इति पाभे. ।

[g] सपा. **अस्मे**<>**अस्मयुः** इति, शौ ५, २७, १० **अस्य** इति पाभे. ।

[h] पाभे. **अन्तरू** पै १,१०९,४ द्र. ।

[i] सपा. ऋ १०,१७३,१ विशिष्टः पाभे. ।

[j] पाभे. **अस्मे** ऋ ९,६३,१ द्र. ।

[k] त्रा प्र. उसं. (पा ५,४,५६)। तत्-स्वरः । अव्ययत्वेनोपचारः द्र. (तु वें, सा. PW प्रभृ. ; वैद्व. ⌊पक्षे⌋ सा, ऋ १, १३७,१ इत्यत्र उप. ✓त्रा> *त्र- इति कृत्वा समस्तस्य ह्रस्वाऽकारान्तस्य च सतः प्राति. प्र२ इतीव व्याचक्षाणः) । इह च नाउउ. च पपा. पूप. **अस्म**- इत्येव द्र. ।

[l] विप. (⌊अस्मान् प्रति गच्छत्-⌋ हरि-) । कारकाऽर्थस्याऽपि कारकत्वमिति कृत्वा सप्तम्यन्तार्थे त्राऽन्ते कारके उपपदे सति क्विबन्नन्ते कृत्-स्वरः प्रकृत्या ।

[m] विप. (रिपु-), नाप. । उस. क्विबन्ते कृत्-स्वरः प्रकृत्या (पा ६, २, १३९) ।

[n] क्यजन्तः नाधा. (पा ३,१, ८ ⌊तु. या ६, ३१⌋) । ईत्त्वदीर्घत्वाऽभावः (पा ७, ४, ३५ ⌊तु. ✓**अमित्रय**⌋) । वस्तुतस्तु **अस्म**- इत्यस्य ***अस्मर्**- इत्येतज्जत्वात् यनि. ✓***अस्मर्य** इत्येतज्जत्वमिति मतं भवति ।

[o] विप. (⌊अस्मत्काम-⌋ अग्नि-, इन्द्र-, सोम-,बृहस्पति-प्रभृ.) । उः प्र. (पा ३,२, १७०) तत्-स्वरश्च । पपा. **अस्म-यु**- इत्येवं मूलप्रकृतिप्रत्ययविवेचनाऽर्थकः सावग्रहो निर्देशः द्र. ।

४; ८,२६,१४; खि १,५,१.

अस्मद्[a]- -स्मत् ऋ १, २४, ९; १५; ३३, ३; ६०, ३; ६३, ५; ९२,१६; ११४, ४; १२१,१५; १२९,६; १०; १३४, २;१३९, ५;८[२];१४४,३;१८९,१;३;××; ४, ११, ६?[b]; ७,३४, १[c]; मा ५,२६;३६†; ६,१;७,४३†; ९, १६†;१२, १२†; १८†; ४३†; ६२; १३, १३†;××; १७,७‡[d]; का ५,७,१;९,२†; ६,१,१; ९, २, ३†; १०, ३, ९†; १३,१, १३†; २, १†; ३, १४†; ५, १; १८,१.८‡[d]; ××; †तै १,१, १४,३; २,१, १‡[e]; १४, २;३, १, १$;२,२$;६, १$; १४,५; ४,४३, १;४५, १; ५, ११, ३; ७,८.२;८,२२,५[२]‡[f];××;४,६, १,३[२]‡[d]; †मै १,२,१०; ११$; १३; १४$; १८; ३, ३९; ४, ९¶; ११, २; २, ७, ८; ९; १०; १२$; १५; ९, ९$; ××; काठ २,१२;१५†; ३,१†; ३; ८†; ६, १०†; ११, १२†; १३,१४†; १५,१२†; १६,८†; ९†;१०†;१२;१५†; १७,११[g]; १६;१७[५];‡[h]; ××; ३४, १९†[i]; क २,६; ८†; १०; १५†; ३, ११†; २५, १†; ३; ६†; २७, १[g]; ६; २८, १[५]; ‡[h];३१,१†; †कौ १, २८४; २८७; २, ८५४$; ९६३; ९७५; १००९; १०२५; १०८४; ११५०; ३, १, ४; †जै १, ३०, २; ५; २, ५,१; ४,१६, ७; २३, ७; २६, ४; शौ १.२,३;९, २; ४; १८, ४; १९,१;२; २०, २; २६, १; ३, ७, ७; ४, १७, ५; ६, २०, १; २६, ३; ४५, २; ××; ६, १२४, ३; ७,२४,१; ४३, १†; २†[२]; ‡[j]; ५५, १[k]; ९७, १‡[l]; २०, १२५, ७‡[l]; पै १,१९,४; २०,१; २;८६,२; ६; १०९, १†; २, ३७, २; ३, २,६; १०,३; २६,३; ४,२४,३; ××;१५,२०,१‡[२][m]; ३‡[n].

अस्म(द्>)ज्-जिघांसा[o]- -सया खि ४,५,१५.

अस्मत्-सखि[p,q]- -खा ऋ ६, ४७, २६; मा ८, ५०; २९, ५२†; का ८, २२, ४; ३१, २,९†; तै ३, ३, ३,३; ४, ६, ६,५†; मै १,३, ३६; ३, १६, ३†; काठ ३०, ६; ४६, १†; शौ ६,१२५, १†; पै १५, ११, ८†; -खायः पै १, ४४,४.

‡**अस्मत्-सुतष्ट**[r]- -ष्टः मै ४, ९,१४.

अस्मद्-दा(त्र>)त्रा[q,s]- -त्राः[t] तै १ ४,४३,२; ६,६,१,४.

---

[a] व्यु. कृते परि. द्र. ।

[b] अस्मात् इति शोधः (तु. सस्थ. टि. दोषाः ; Barth ⌊BB १५,१९०⌋? ORN. ; वैतु. पपा. प्रभृ. यनि. इति) ।

[c] तु. टि. अस्मत्सुतष्टः ।

[d] सपा. ऋ १०, १४२, ७ विशिष्टः पाभे. ।

[e] सपा. ऋ १०, १७, १० विशिष्टः पाभे. ।

[f] सपा. ऋ ६, ७४, २ विशिष्टः पाभे. ।

[g] सपा. मै २ ९,२ अस्मिन् इति पाभे. ।

[h] सपा. ऋ १०,१४२,७ विशिष्टः पाभे. ।

[i] SI. अस्मात् इ ते चिन्त्यम् ।

[j] पाभे. अन्तुर् पै १,१०९,४ द्र. ।

[k] सपा. मा २७,९ का २९, १, ९ अस्मात् इति, पै २०, ६, ४ ते इति च पाभे. ।

[l] सपा. ऋ ६, ४७, १३ अस्मे इति पाभे. ।

[m] पाभे. सस्थ. वि···चातय द्र. ।

[n] सपा. ऋ २,३३,३ विशिष्टः पाभे. ।

[o] तस. सास्व. (पा ६, १, २२३) । °जिघांसा- इति स्वरः? यनि. शोधः द्र. ।

[p] विप. (वनस्पति-, सोम- प्रभृ.) ।

[q] बस. पूप. प्रकृतिस्वरम् (पा ६,२,१) ।

[r] एवं किल मुपा. ऐकस्वर्याद् एकपदत्वेन निरदेशि (वैतु. सपा. ऋ ७, ३४, १ अस्मत् । सुतष्टः इति द्विपदः पाभे. ⌊तु. संटि. पपा. ; तैआ ४,१७,१⌋) । द्वैपद्ये तावन् निष्क्लेशोऽन्वयश्च द्र. । यनि. तृस. पूप. प्रकृतिस्वरम् (पा ६, २, ४८) ।

[s] उप. √दा (दाने)> कर्तरि *दात्र- इति पाप्र. सुवचम् (तु. पाउ ४, १५९) । मौस्थि. तु दातृ*-> -*तारः> -त्राः इति कृत्वा तकाररेफमध्यस्थाऽवर्णलोपः उसं. [पा ६,४,१३४ (वैतु. भा. °दातृ- >-त्र- इति प्राति. समासान्ताऽजन्तं ⌊यस्मिन् पक्षेऽन्तोदात्तापत्तिः⌋) इति वा, अकारोपजनान्तमिति वा, सा. च दत्त- >दात्र- इतीवाभिसंधाय तृस. इति)] ।

[t] सपा. °स्मद्दात्राः (आपश्रौ १३, ६, १४ प्रभृ. च <> °स्मद्राता (काश ५,४,१, १५[९];१६ च) <> °स्मद्राताः (माश ४,३,४,२० शांश्रौ ७, १८, ९ प्रभृ. च) इति पाभे. ।

?अस्मद्द्विषः[a] मै ४, ९, १२.

*अस्मद्-ध्रि->*अस्मद्रि[b]-

‡अस्मद्रिय(द्रिय्-अ)च्[c]- -यक् तै १, ४, २१, १; ३,४, ११,१.

†अस्मद्र्यू(द्रि-अ)च्, ञ्च्[d,e]- -ध्र्यक् ऋ ⌊३,५४,२२; ५,४,२; ६,१९,३⌋; ४, २२,८; ६,१९,१; ७,७९,५; ९,९३,४; १०,११६, ६; मा ७, ३९; का ७, २१, १; मै १, ३, २५; ४, १२, ६; काठ ४, ८; १३, १५; २३, १२; क ३, ६; -द्र्यञ्चः ऋ ७, १९, १०; शौ २०,३७, १०.

?अस्मद्-यक्ष्म[e]- -क्ष्मम् मै ४, १४,१७.

अस्मद्-र(थ>) था[f]- -?‡थानाम्[f] मै ४, ९, ११.

अस्मद्-रा(त>)ता[g]- -ता[h] का ९,२,७; काठ ४,९; २८,४; क ३,७; ४४,४; –ताः[h] मा ७, ४६; मै १,३,३७; ४,८,२¶.

१अस्माक[i]- -कम्[j] ऋ १, ⌊७, १०; १३, १०⌋; २५, १५; २७, २; ३०,११; ३३,१; ७९, ११; ९४,८; ११४,३;१२९,१; १३२,६; १३८, २; १३९, ९; १४०, ⌊१०; ६, ८, ६⌋; १२; १५२, ७; १७४, १०; १८७, २; ३, ⌊(३०, २१) ३१, १४; ४,२२,१०⌋; ३९,४; ४,१,१३; ९,७[१]; २२,१०;३१, १४; ३२, १५; ५,४,⌊९; ७,३२,११;१०, १०३,४⌋; ३५,७;८; ४१, १६; ६५,६;७४,९;६,⌊(१.१४३,८) ८,७⌋; ⌊४५, ३०; ८, ५, १८⌋; ⌊४६, ४; ७, ३२, २५⌋; ४७, ३१; ५४,६; ७, २८, १; ५१, २; ५७,२;५९,३;६९, ६; ८२, ९; ८, १, १५; ⌊(१, ३०, १) ४–५, १८; ८८, ६⌋; ६, ४२; १२,१७; १७,४; २६,२०;३३, १५; ५२,८;५४,८;६४, ६;६७, १९;९२,३२; १०, २६,४; ३७, ११; ८१,६;८४, ५; ९७, २३; १०३,७; ११[३k];१०८,५;११२, ७; १३३, १; १३६, ३; १५७,

---

[a]) **अस्मत्, द्विषः** (लुङि मपु१) इति द्वि-पदः **शोधः** (तु. सपा. तैआ ४, २०, २ **अस्मान् ?द्विषा** इति पाभे. । **द्विषः, सुनीथः** इति सतः पाठस्य स्थाने तैआ. **?द्विषा सुनीते** इति च पाभे. द्र.) ।

[b]) व्यु. ? पपा. नावग्रहः । मौस्थि. **अस्मद्-** +*ध्रि-(<√धृ) इति तस. सास्व. (पा ६, १, २२३) । उप. **रि-** इत्याकारतया श्रुत्यवशेषो भवतीति तु संभाव्यमाने यनि. प्राति. ***अस्मद्-ध्रि-** इत्यस्य नैप्र. विपरिणामः स्यात् (वैतु. GW. पक्षे *द्रि- इत्युत्तरांऽशतया श्रूयमाणं शब्दरूपम् **आ**√दृ इत्यत आदरार्थादपि व्युत्पादुकः) ।

[c]) सपा. °**द्रिय**° <> °**द्र्यं**° इति पाभे. । शाखाभेदेनेकारस्य इयङादेश• इत्येव नाउ. विशेषः द्र. ।

[d]) बस. पूप. प्रकृतिस्वरं सन् स्वरितत्वेन विपरिणतः द्र. (पा ८, २, ४) । उप. भावे निष्पन्नं भवति वैतु. पा ६, ३, ९२ उस. इतीव कृत्वा उप. कर्तरि निष्पादयन् उप. प्रकृतिस्वरस्य (⌊पा ६, २, १३९⌋ अभावं प्रति चोद्यः) । एस्थि. उपपदाऽभावेऽपि √अञ्च् इत्यतः क्विन् प्र. सुवचः स्यात् (वैतु. पा ३, २, ५९) ।

[e]) पाठः? **अस्मद् यक्ष्मम्** इति द्वि-पदः **शोधः** द्र. (तु. पपा.; सपा. तैआ २,४,१ च) ।

[f]) पाभे. ऋ १०, १३९, ६ **अश्मव्रजानाम्** इत्यत्र व्यु. अर्थश्च द्र. । विभ. स्वरो विमृश्यः (तु. पपा.)। **अस्मद्-रथानाम्** इति पाभे. ।

[g]) तृस. पूप. प्रकृतिस्वरम् (पा ६, २, ४८) ।

[h]) पाभे. **अस्मद्-दात्राः** द्र. ।

[i]) तस्येदमीयेऽर्थे ठल् प्र. तस्य च कादेशः उसं. (पा ४, ३,१२०; ७,३,५१) । लित्-स्वरः । ***अस्मर्क-** इत्यस्य यनि. नैप्र. विपरिणामः द्र. (वैतु. सा. ⌊ऋ १,९७,३⌋ पा ४, ३,२ इत्यतो लब्धसंकेतः सन् **अस्मद्->अस्माक-** इत्येवं ब्रुवाणः साध्यसमं हेतुमिवाऽऽभासुकः) ।

[j]) यनि. प्राति. विप. इति कृत्वा तत्तद् रूपं तेन तेन संप. समानाधिकरणतया श्रूयते । प्रकृतस्य रूपस्य तूभयी श्रुतिर्भवति । संप. सामानाधिकरण्येन (तु. नाउ.) च वैयधिकरण्येन च । यत्र वैयधिकरण्यं भवति तत्र कः समाधिरिति । तत्राऽस्य रूपस्य मूलतः वा. क्रिवि. सतः कालेन भाषातत्त्वविकासपरंपरया ष३ इति कृत्वा व्यवहारवैशिष्ट्यसंभवः स्यादिति दिक् । तदेतद् व्यधिकरणमात्रं रूपम् इह समानाधिकरणं रूपं च पृथक् नाउ. इति विवेकः द्र. । अस्य नाउ. च संख्याभेदोऽतन्त्रः ।

[k]) **अस्माकमिन्द्रः** इति सतः पाठस्य स्थाने ⌊ ३३१ °**स्माकेन्द्रः** इति शोधं प्रस्तावुकः ।

३[a]; खि **२**,७,३; ९, ४;५; **३**, ४, ८; ६, ८; मा **२**, १०; **४**, १२; ८, ५३†; ९, ४०; **१०**, १८; **१२**, १०१†; †**१७**, २२; ३६; ३९; ४३^{१}; **२९**, ५७†; का **२**, २, ९; **४**, ५, ४; **८**, २०, १†; **९**, ६, ५†; **११**, ३, ३; **६**, ३; **१३**, ६, २५†; †**१८**, २, ८; ४, ४; ७; ११^{३}; †तै **१**, ५, ११, २; ६,१२,१; ७, १३, ५; \$८, १०, २;१२, २; **३**, १, ११,१; २,८, ६‡[b]; **४**, ६, २, ६; ४, २; ३^{३}; ४; ६, ७; **६**, ५, ६, २^{२}¶; मै **१**, २, ३; ४, १; **५**, १४^{९}; ६, १२¶; १०, ३; **२**, ४,३^{२}; ५, ९¶; ६,९;†१०,२;४^{५}; **३**,१६, ३†; **४**,२,३¶;४,३; १०, १†; †११,१; ४; १२,४; १३,१०†; †१४, २; ७\$; १२; १४; काठ **४**, १६†; **५**, २; **७**, ३[c]; **८**, १७†; **१५**, ७; **१८**,२†; ५^{५}†; **२१**, १३†; **२४**, १^{२}; **३२**, २; **३८**,१२; १३; **४०**,८†; ११†; **४६**,१†; क **५**,२; †**२८**,२;५^{५}; **३७**, २^{२}¶; †कौ **१**, २४१; **२**, ९३९; ९७०; ९८५; ११५१; १२०२; १२०५; १२०९^{३}; †जै **१**, २५, ९; **४**, १, ४; **६**, २; १०, १; २४, ६; शौ **२**, २६, ४; ५; ३१,५; **३**,१०, १३; **४**, ३१, ५†; **५**, ३, ११; **६**, १५,१†; ९३, १; १२६, ३†; **७**, ४२, २; **१२**, ३, ५५–६०; **१६**, ८, १^{४}; ५^{४}–३०^{४}; **१८**, ४, ६८; †**१९**, १३, ७; ८; ११^{१}; †**२०**, ४, १; ३९, १; ६३, २[a]; ७०, १६; ९५, २; १११,२; १२४,५[a]; पै **२**, १२, ४; ५;१५,५;७०,३;**४**,१२,५†; **५**, ४, ९; १०; १६, ७; ३८, ३†; **६**,१६,२†; †**७**,४, ७;८; ११^{३};**१०**,१,१०;××.

२अस्माक[d]- -कम् ऋ **१**, २७, ४; ९४, १६; १०२, ४; ५; १२९,४^{२}; १५२, ७; १५७, २; **२**,२,१०; ३०, ४; ३१, १; **३**, ६२, १५; **४**, ९, ७; २०, ३; ३१, १५; ३२, १; ४^{२}, ८; **५**, ⌊(**६**, ५२, १२; **७**,४२,५) ४, ८⌋; ३५,७; ८; ४४,७; **८**, १, ⌊३ (१५, १२; ६८, ५)⌋; ३३, १५;४५, ९; ५७, २; ६४, ६; **१०**, २२, ७; २६, ९; ३२,१; ३६, ६; ९७, २०; १५१, ३; खि **१**,४,३; **२**,२,२; †मा **१२**, ९५; **३३**, ६५; †का **१३**, ६, २२; **३२**,५,११; †तै **१**, ६,१, ३; **४**,२,६,५; मै **१**, ४, ४;९; ९, १^{२}; ४; ५; ¶**३**, ७, ९; ८, ३[e]; †**४**,९, ११; ११, ४; १४,१२; काठ **५**,६; **६**, १०†; ९, ९; **३२**, ६†; क **८**, १२¶; †कौ **१**, २८; १८१; २९८; **२**, ८४७; ११०९; †जै **१**, ३,८; १९,७; ३१, ६; **४**, ११, १०; शौ **२**, १२, २;३; **७**, ५२,४†; **१०**, ५, ३६^{१}; **१६**, ८, १^{६}; ५^{६}–३०^{६}; ९, १^{२}; **१९**, ३४, १†; ५७,५; **२०**, ८५, ३†; पै **१**, ६५, ३†; **२**, ५,२; ३;३९, ३; **३**,३०,६; ३६, ४; ५†; **४**, १८, ७; **८**,१६,९; **११**,३,१†; **१२**, १, १६†; **१५**,१५, २†; **१८**, २९, १^{२}; –†कासः ऋ ⌊**१**, ९७, ३; **५**, १०, ६⌋; **६**, २५, ७; **७**, ७८, ५; काठ **१७**, १८; शौ **४**,३३,३; पै **४**, २९, ३; –†केन[f] ऋ **६**, ४५, १५; ⌊**१०**, ४२, १०; ४३, १०; ४४, १०⌋; शौ **२०**, १७, १०; ९४,१०; –केभिः ऋ **१**, १००, ६; **२**, ३०, १०; ⌊(**५**, ४१, १०) **६**, १२, ४⌋; **८**, ⌊(१,३) १५,१२; (६८,५)⌋; ४०,७.

आस्माक[g]- -कः[h] मा **४**, २४; का **४**, ८,२; मै **१**, २,५; **३**,७,४; काठ **२**,६; **२४**, ५; क **१**,१९; **३७**,६. [°क- अन्°].

*?**अस्माका**[i] ऋ **१**, १७३,१०;

---

[a] पाभे. **अस्मभ्यम्** मा **२५**,४६ द्र. ।

[b] सपा. ऋ **१०**, १४१, ४ विशिष्टः पाभे. ।

[c] तु. सस्थ. टि. आ ।

[d] व्यु.? १**अस्माक-** टि. द्र. ।

[e] सकृत् संपा. तै **६**, २, ४, ४ नः इति पाभे. ।

[f] पाभे. **अरिष्टासः** शौ **७**,५२,७ द्र. ।

[g] स्वार्थे **अण्** प्र. **उसं.** (पा **५**,४,३८) । तत्-स्वरः [वैतु. पा. (**४**, ३, २) यनि. प्र. (तस्येदमीये सति ⌊पा **४**, ३, १२०⌋) परतः प्रकृत्यंशे **अस्मद्->अस्माँक-** इतीव शासुकः संश्चिन्त्यः (तु. टि. १**अस्माक-**)] ।

[h] पाभे. **अमात्यः** तै **१**,२,६,१ द्र. ।

[i] नैप्र. २**अस्माक-** इत्यस्याऽन्त्याऽकारस्य लोपे तृ१ सत् वा. क्रिवि. द्र. (वैतु. यनि. स्थ. सर्वत्र ?**अस्माक** इति पपा. ⌊तु. ?**युस्माक->** -क ऋ **७**, ५९, १०⌋ ; तच्च शब्दरूप लुप्तान्त्यमकारं

शौ १,७,६; ३,२४,४[a]; ७,८२, १‡[b].

अस्मे[c]- > **अस्मे-हिति**[d]- -तिः ऋ १०,१०८,१.

अहम्[e] ऋ १, ११,६; १७, १; ७; ⌊२३,२२; १०, ९,८⌋; ३३, २; ४४, ५; ५०, १३; १०५, ७; १२०,६;१०; १२६, ७; १३८, १; १६५,६; ८;१०, १७१, १; ४; १७९,१; २, १४,१०; ⌊२७, १७; २८,११;२९, ७⌋; २८,९; ३२, ४; ३, १५, १; ४३, ३; ५३,१२; ४, १८, २; २६, १^{४}; २^{१}; ३; २७, १; ४२, २–६; ५, ⌊२,८; १०, ३२,६⌋; ९,६?; १२, २; ३; ४२, २; ४३, ९; ⌊४४, १४; १५⌋; ××; खि १, १,१;१०,१; २, ६, २; ८;१५; ६,२, १७;६, ३,२९; ××; खिसा ३,१[f]; मा १,५;२,२७;२८; ३, १९; ४,२३;५, ११;२२;२३^{४}; २६; ३९; ६, १; १६^{३}; ८,९^{४}; १३; ३७; ३८; ३९; ४०; ××; १८, ३५[g]; का १, ३, १; २, ३, १; ३^{२}; ६, ६; १०; ३, ३, ११; ९, २; ४, ७, ४; ५, ४, २; ६, १;××, २०, १,६[g]; तै १, १, १०, २; २, ३, २; ५,१;२; ३,१,१;२, १; ४, २^{१}; ९, २; ५,६, १; ४; ७, ६; ८, १; १०, १; ६, २,१^{३}; ३^{२};४^{५}; ४,१^{६}; २^{२}–४^{२}; ६,१; २^{१}; ३; १०, १^{३}; ११, ५^{२}; ६^{२}¶; ७^{३}; ७, ४,१^{१}; २; ४^{२}; ५^{२}; ६, २; ३; ८, १^{१}; ९, १; २^{१}; †१३, १; २;८, ७, २; १५, १^{२}; १६, १; ××; ३, २, ८, ५[h]; ५, ६, १^{३}[i]; ४, ६, ५, १; २; ४;७, ३[g]; मै १, २, १; १०^{७}; १३; १६^{२};३,२६^{४}; ४, २^{१}; ३; ७^{४};१०; १२¶; ५,२;३;४^{३};८; १०;११^{१};१४^{३};××;२, १२,१[g]; ४, १२, ३[h]; काठ १, १२^{१}; २,१; ४; ५^{४}; ९^{२}; ११^{६}; १२^{२}; ××; ५, १^{३४}; २[h]; १३, १६^{३}[h]; ३२, २[h]; ४०, ९^{६}[j]; क १,१२^{२};१३; १६;१८^{२}; २, ३; ५^{६}; ६; ८; १०; १३^{२}; ४,४¶;६;८; ५,१; २^{५}; ५^{२};¶; ××; कौ १, १२२; १५२^{१}; ३०७; ३१०; ५१६; २, २७२;

सत् **अस्माकम्** इति रूपम् एवेत्येवं सा. प्रभृ. व्याख्यानं च)। ननु किमिति तत्र नैवाऽऽदर इति। तथात्वे मूलतोऽभ्युपेयमाने शौ. स्थ. छन्दोवैषमी प्रसज्येतेति। कथमिति। उच्यते। तथाहि। १मे स्थ. २यस्य पादस्याऽऽदितः १मस्य पादस्याऽन्त्येनाऽचैकरूपतायाः सुवारायाः सत्या व्यवच्छेदे **अस्माकमर्थाय** जज्ञिषे इति नवाक्षरोऽनुष्टुप्पादो जायेत। अपि च। यत्र नैप्र. अज्मध्यस्थो हल् लुप्यते, तत्राऽनुदात्तोदयोऽसौ भवति। इह तु न तथेत्यतदपरं पराऽभिप्राये बाधकं द्र.। अथ २ये स्थ. **धान्यं**- इत्यस्य ***धानिका**- (व्यु. यद्र.) इत्येतन्मूलकत्वेनेति कृत्वा परप्रस्तावेन च संगमय्य मौस्थि. एवास्माकमिदं **धानिकम्** इत्यधिकाक्षरः पादः संजायेत। ३ये स्थ तावत् पराभिप्रायतोऽधिकाक्षरत्वं निगदसिद्धम्। एवं शौ. स्थ. सर्वत्र छन्दोदृशा यनि. सुवचतरत्वेनाभ्युपेयत्वे सति ऋ. स्थ. अपि **अस्माका असदिन्द्रो वज्रहस्तः** इतीदं पादस्य मौलिकं स्वरूपं द्र. इति दिक्।

[a]) सपा. तैआआ ६७ मे इति पाभे.।

[b]) सपा. ऋ७,५९,९ *?युष्माका इति पाभे. (तु. एपू. टि.)।

[c]) ***अस्मर्**- +(√*ऋ ⌊गतौ⌋>भावे) ***य**- इति स्थिते बस. पूप. प्रकृतिस्वरे सति ***अस्मर्य**- इत्यत्र नैप्र. ***अस्मय्**- इत्येवं विपरिणते च वा. क्रिवि. इति कृत्वा न. द्वि१ व्यवह्रियमाणे चाऽवसाने **अय्**>**ए** इति संक्रमः द्र.। एवं व्यु. पार्थक्याद् निर्देशपार्थक्ये प्राप्तेऽपि यथाप्रसिद्धिस्थलानुक्रमणं त्वस्य **अस्म**- इत्यत्रैव गपू. द्र. (तु. तत्र टि. पाप्र. अपि)।

[d]) '**अस्मे** ⌊=अस्मद्गता⌋ यथा स्यात्तथा **हितिः** यतः' इति कृत्वा बस. पूप. प्रकृतिस्वरम् इति मतम् द्र.। उप.?< √**धा** (धारणे ⌊तु. वें. सा.⌋) इति वा, <√हि (गतौ) (तु. ⌊पक्षे⌋ सा., GW. प्रभृ.) इति वा। तस. दासीभारादित्वात् (तु. पा ६,२,४२ ⌊तु. या ११,२५⌋ पूप. प्रकृतिस्वरं द्र.⌋)।

[e]) व्यु. कृते तु. टि. **अस्मद्**-। त्वाहौ सौ (पा ७, २, ९४) इति **अस्मदः** आदेशमात्रमिति विकारमात्रमिति वा प्राञ्च आहुः। मौलिककण्ठ्यस्पर्शद्वितीयं पृथक् प्राति. इत्यर्वाञ्चः (तु. WW १, ११५)।

[f]) =सपा. आश्रौ १, १०, ७; ८ शांश्रौ ९, २८, ३ या ११, ३३। शौ ७, ४९, १ वैताश्रौ १, १६ **देवीम्** इति पाभे.। [g]) तु. सस्थ. टि. **सः**।

[h]) =सपा. काश्रौ १०, ५, ३। शौ २, २९, ३ **अयम्** इति पाभे.। [i]) पाभे. सस्थ. **अद्य** द्र.।

[j]) सकृत् सपा. मा ८, ४६ प्रभृ. माश ४, ६, ४, ६ च **अयम्** इति, तै ३, ४, ४, १ पागृ १, ५, ९^{२} **सः** इति च पाभे.।

२७३; ३४०; ८५०^{2}; ८५१; ××; †जै १, १३, ८; १६, ८^{2}; ३२, ५;८;५३, ६; $२, २,२^{2}; ४, ७; ३,२३,४; ५; २८, १२; ४८,१८; ४,१२,३^{2}; ४; शौ १, ९, ४; १०, ३; २९, ५;६†; २,१०,२-८; २५, २; २७, ५; ३०,५^{2}; ३२,३; ३,५,२; ५,६, १;३;५; ७, ६;××; ४,९,७‡[a]; ६, ७१, १[b]; ९७, १[c]; ७, १०५, १[d]; ११५, २[e]; ११९, १[f]; १४, १, ३८;५१[g]; पै १, ६, ४; ९, ३; ११, ४; ५†; १५, १; ३७, १; ३८,१; ४३,१; ५९, ३^{2}; ५^{2}; ६०,१; ३^{2}†; ६६, ४; ८३,४; ५, ३४, २?[h]; ××; १३, १४, ९[i]; १७, ११, ६‡[j];××; १९, १०, ६[k];३३,११[l].

✓***अहंयु**[m] > **अहंयु**[m]- -युः ऋ १,१६७,७..

अहं-सन्न[n]- -०न ऋ८,६१,९[o]; -०ना ऋ ५, ७५, २?[p]; कौ २, १०३४?.

?**अहं-नमस्**- -माः[q] पै १,१८, ३?.

अहमु(म्-उ)त्तर[r]- -रे शौ १२, ४,५०; पै१७,२०,१०; -रेषु शौ ४,२२,१[s]; पै ३,२१,१.

*?**अहमुत्तर-त्व**[t]- -त्वे शौ ३,८,३; पै १,१८,३.

अहं-पूर्व[u]- -र्वः ऋ १, १८१, ३.

---

[a] सपा. ऋ १०, ९७, ४ प्रभृ. वासः इति पाभे.।

[b] पाभे. सस्थ. टि. प्रतिजग्रह द्र. ।

[c] सपा. पै १९, १२, ७ अयम् इति पाभे. ।

[d] पाभे. सस्थ. टि. कृण्वे द्र. ।

[e] पाभे. कृते तु. सस्थ टि. प्र···हुवे ।

[f] पाभे. अधि पै २०,१६,३ द्र. ।

[g] पाभे. अग्निः शौ २०, ४९, १^{2} द्र. ।

[h] द्र. टि. ?२अहस्त-> -स्ताभ्याम् ।

[i] तु. सस्थ. टि. ?अहं पिचरुकः ।

[j] सपा. ऋ १०, ८५, १७ शौ १४, २, ४६ इदम् इति पाभे. ।

[k] सपा. शौ ६, ५८, १ इहु इति पाभे. ।

[l] सपा. शौ ६,११३,१ ते (<युष्मद्-) इति पाभे. ।

[m] क्यजन्तः नाधा. द्र. (तु. टि. ✓*अस्मयु)। वा. च व्यु. च पपा. च कृते तु. टि. अस्मयु- (वैतु पा. [५, २, १४०] यनि. भिन्नात् तत्प्रतिरूपकीकृतादिव सतः प्राति. मत्वर्थे युस् प्र. इत्यन्यथासिद्धमिव सन्तं दवीयांसं पन्थानं यायुकः) ।

[n] तस. सास्व. (पा ६, १, २२३) । अथवा उस. उप. ✓सन्+अच् प्र. इति कृत्वा थाथीयः स्वरः (पा ६, २, १४४)। पूप. समासस्य च कृते तु. टि. अहं-पूर्व- ।

[o] पूर्वाऽऽमन्त्रिताऽविद्यमानवत्त्वाऽभ्युपगमात् पादादित्वात् षाष्ठिक आद्युदात्तः द्र. (पा ८, १, ७२; ६, १, १९८) ।

[p] मन्त्रपाठः पपा. वें. सा. च अहम्। सुना इति पदद्वयमत्र पिपाठयिषन्ति। तथा स्थितेऽर्थस्य नितरां विशदेतरत्वात् यनि. च देवताविशेषणतौपयिकत्वाद् अर्वाचां समस्तैकपदत्वे प्रायिक्यभिमतिर्भवति । एस्थि. अपि स्वरादिनिर्दिष्टिं प्रति भवत्येव कियानपि मतभेदः (तु. ORN.) ।

[q] -नमाः इव> -नमेव इत्यभिसंधिकः मुपा. द्र. (तु. सपा. शौ ३,८,३ यत्र दीर्घम् एव इति पाठः श्राव्यते)। अहंनम् एव इति मुपा. त्वत्र प्रतिपत्तिशून्य इव भवति । यनि. शोधे समासादिकार्यम् अहमुत्तर्- प्रभृ. समाननिष्पत्तिकेषु प्राति. उक्तया दिशैव किञ्चिन्मात्रभेदपूर्वकं व्याख्येयमिति पिष्टपेषणे नादरः । अग्नेः विप. एतदिति तु विशेषः द्र. । छान्दसेऽत्र संधौ इव इति वा, एव इति वोत्तरांशः द्र. ।

[r] तस. सास्व. (पा ६, १, २२३) ।

[s] एवं किल पपा. प्रकरणाऽनुरोधश्च भवति (वैतु. सा. अत्र पदद्वयीमिव पठित्वा व्याचक्षाणः)। यच्चात्र देवानामप्युपरि स्वं यजमानं प्रतिष्ठापयितुमलंभूष्णुरपि पुनस्तस्य प्राधान्यप्रतिष्ठायै देवानामेवान्यतमस्य याच्ञामिव सा. कारयति तद्विरुद्धार्थप्रतिपत्तिकरत्वाद् अतितरामिवोपेक्ष्यम् ।

[t] भावे त्वः प्र. तत्-स्वरश्च । अत्र अहम् । उत्तरत्वे इति पदद्वयाऽऽत्मकः मुपा. भवति । सा. चापि तथैव पठित्वेव व्याचष्टे । प्रकरणाऽनुरोधात्तु यनि. प्राति. मौलिकतया संभाव्यते । तद् विमृश्यम् ।

[u] अत्राविहितलक्षणो मयूरव्यंसकाद्याकृतिगणीयः तस. (पा २, १, ७२) सास्व. च । एहीडादयः पाग. इत्येतदनु चान्यपदार्थे वृत्तिर्भवति । अथवा, 'अहं पूर्वः इत्याकारकं शब्दोच्चारणमस्मिन्नस्ति' इति *अहं-पूर्व- इत्याकारक बस. मूलत आस्थेयो वचनपरः । ततस्तद्धति

आव[a]- -¶वत् तै २,५, ६, ६; ६, ४,८,३; -¶वम् तै २, ५,२,३; ५, ६,५; ६, ७, १; मै १, ६, १२; -¶वयोः तै २,१,९,४;५, २,५; मै १, ६,१३; -वाभ्याम् काठ १२, ७; -¶वाम् काठ ८, १०; क ७,६.

